यमः, एवं यदा यस्येत्यपि नियम एव, अन्यथा पूर्वनियम·

न्यायलीलावतीकण्ठाभरणम्

न्यायः। स च वह्निव्याप्यधूमवानयमिति संक्षेपो तेनापि कण्टकोद्धारात्। संक्षेपविस्तराभ्यां न्यायस्यापि द्वैविध्यम्, आद्यं गुर्वादेः शिष्यादीन्प्रति, द्वितीयन्तु वादिनो वादिनं प्रतीत्यप्याहुः। ननूपनयेन व्याप्तस्य पक्षधर्मता दर्शिता निगमनेन चाबाधितत्वमसत्प्रतिपक्षितत्वं च दर्शितम् तत्किमपरमवशिष्यते यदर्थं प्रतिज्ञादीत्यत आह— न चेति। तदवगतिरिति। पञ्चरूपाधिगतिरित्यर्थः। तयोरिति। साध्यस्वरूपहेतुस्वरूपव्याप्त्यानामुपस्थितिसम्भवेनोपनयनिगमनार्थस्यानाकांक्षितत्वादित्यर्थः। ननूपनयनिगमनप्रतिपाद्योऽप्यर्थश्चेदपेक्षितस्तदा कथं न तदुपस्थापकापेक्षेत्यत आह अपेक्षितमिति। अन्यथेति। तत्कालानपेक्षिताभिधानेऽपेक्षितं वाच्यमित्यपि नियमो भिद्येतेत्य·

न्यायलीलावतीप्रकाशः

दुदाहरणोपनयावेव न्यायावयवावित्यत आह नचेति। शब्दानित्यत्वे प्रमाणं वदेति मध्यस्थनियोगात्तस्य प्रमाणमात्रे न जिज्ञासा, किन्तु विशिष्टे, विशिष्टं च न विशेषणं साध्यमनभिधाय शक्याभिधानं, नवा साध्यनिर्देशं विना हेतोराकांक्षा नवाऽन्वयबोधकत्वमिति प्रतिज्ञा साधनाङ्गमित्यर्थः। तयोरिति। तत्प्रतिपाद्ययोः प्रथममनाकांक्षितत्वे द्वयोरनवतारादित्यर्थः। तदेव स्पष्टयति अपेक्षितमिति। आकांक्षितत्वाविशेषेऽपि यद्यदाऽऽकांक्षितं तत्तदा वक्तव्यमित्यपि नियम इत्यर्थः। पूर्वनियमस्येति। अपेक्षितं वाच्यमिति नियमस्येत्यर्थः। अन्यथा अनाकांक्षिताभिधान इत्यर्थः। ननु साध्याभिधानं विना हेत्वादिवचनान्वया·

न्यायलीलावतीप्रकाशविवृतिः

हेत्वभिधानपरत्वसंशयादतुष्यन्नाह नच साध्यनिर्देशमिति। अनाकांक्षत्वाचेति। इदमुपलक्षणम्, प्रतिज्ञायां ज्ञानलक्षणया विप्रतिपत्त्या तादृशसा·

---

(१) तदवगतिरिति कण्ठाभरणाभिमतः प्रा० पु० पाठोऽत्र बोध्यः।

(२) ...क्षित—प्रा० पु० पाठः।

स्यैव भङ्गात् । तथा च प्रतिज्ञार्थ एव पूर्वमपेक्षित इति प्रतिपाद्यः, अन्यथा निग्रहात् । न च गङ्गायां घोषः पीनो देवदत्तो दिवा न भुङ्क्ते इत्यादिवाक्यवत् झटित्यप्रतीतावपि न दोष इति वाच्यम् । वादिनः संदिग्धाप्तत्वात्, अन्यथा विपरीतान्वयदृष्टान्ताभा-

---

न्यायलीलावतीकण्ठाभरणम्

र्थः । तथाचानपेक्षिताभिधानेनानवधेयवचनत्वापत्तेरिति भावः । प्रतिज्ञार्थ एवेति । उद्देश्यानुमित्यन्यूनानतिरिक्तविषयकशाब्दज्ञानाजनकन्यायावयवः प्रतिज्ञा तदर्थ एव पूर्वमपेक्षित इत्यर्थः । अन्यथेति । प्रतिज्ञाऽनभिधानेऽप्राप्तकालनिग्रहापत्तेरित्यर्थः । ननु लक्षणया आक्षेपेण वा हेत्वभिधानेनैव प्रतिज्ञार्थोपस्थितौ किं तेनेत्यत आह नचेति । वादिन इति । अनाप्तवाक्ये तदुभयानन्तरभावात् । अन्यथा वादी क्वापि न निगृह्येतेत्यर्थः । अन्यथेति । यो वह्निमान्धूमादित्यादावपि

न्यायलीलावतीप्रकाशः

न्यथानुपपत्त्या साध्यविशेषे तदुपपादके लक्षणा स्यादित्यत आह नचेति । झटितीति । मुख्यवृत्त्या प्रतिज्ञार्थाप्रतीतावित्यर्थः । ननु विप्रतिपत्तित एव पक्षपरिग्रहे हेत्वभिधानमेवोचितम् । मैवम् । तस्याः प्रतिवादिविप्रतिपत्त्या समयबन्धेन चान्तरितत्वात्, परविप्रतिपत्ति समयबन्धं च विना स्थापनाया अभावात्, विप्रतिपत्तिवाक्यस्य पक्षपरिग्रहेण पर्यवसिततया निराकाङ्क्षत्वाच्च । आवृत्तौ तु सैव प्रतिज्ञा, तस्मात्साध्याभिधानं विना न हेतोराकाङ्क्षा, नवान्वयबोधजनकत्वमिति प्रतिज्ञा साधनाङ्गम् । तल्लक्षणं च लिङ्गपरामर्षप्रयोजकवाक्यार्थधीकारणत्वे सति उद्देश्यानुमित्यन्यूनानतिरिक्तविषयकशा

न्यायलीलावतीप्रकाशविवृतिः

ध्यानुपस्थापनादित्यपि द्रष्टव्यम् । लिङ्गपरामर्षेति । उदासीनप्रतिज्ञासमानाकारवाक्यातिव्याप्तिवारणाय सत्यन्तं न्यायप्रविष्टवाक्यपरम् । अवयवान्तरवारणाय विशेष्यपदम् । तत्रापि वह्निमानित्युदाहरणावयवेऽतिव्याप्तिरित्यन्यूनपदम् । शब्दत्वेनैव यत्र शब्दे नित्यत्वानुमानं तत्रोपनयेऽतिव्याप्तिरित्यनतिरिक्तपदम् । न च तत्रान्वयव्याप्तिस्वीकारे व्याप्तिग्रहकाले सिद्धसाधनं, व्यतिरेकव्याप्तौ तु न पक्षतावच्छेदकसाध्य-

सानुपपत्तेः। अत एव हेतुपदमपि साध्यस्वरूपमात्रवत् साधन-

न्यायलीलावतीकण्ठाभरणम्

व्यत्यासेनावयवकल्पनापत्तेरित्यर्थः। अत एवेति। साध्यस्वरूपोप-

न्यायलीलावतीप्रकाशः

ब्दज्ञानविषयकवाक्यत्वम्, हेत्वभिधानप्रयोजकीभूतजिज्ञासाजन-
कवाक्यत्वं वा। अतएवेति। साध्यनिर्देशान्तरं हेतोराकाङ्क्षा नतु तद्व-
मकत्वेपीत्याकाङ्क्षाक्रमनियमादेवेत्यर्थः। साध्यरूपमात्रेत्यत्र मात्रप-
देन निगमनप्रयोजकाकाङ्क्षानिवृत्तिः, साध्यस्य विषयत्वेऽपि तदुपर-
कसाधनस्यापि विषयत्वात्। साधनस्वरूपमात्रस्येतिमात्रपदेन
हेतुगमकत्वविषयकाकाङ्क्षानिवृत्तिः। अनुमितिहेतुतृतीयलिङ्गपरा-
मर्शप्रयोजकशाब्दज्ञानकारणसाध्याविषयशाब्दधीजनकहेतुविभक्तिम-
च्छब्दत्वं हेतुलक्षणम्। यद्यपि हेतावुक्ते कथमस्य गमकत्वमित्याका-
ङ्क्षायां व्याप्तिपक्षधर्मतयोरुपदर्शनप्राप्तौ कथं विनिगमना यतो नोभ-
यजिज्ञासा, न वा प्रथमं पक्षधर्मताजिज्ञासा, तथापि वह्निव्याप्यधू-
मवानयमिति परामर्शोऽनुमितिजनक इति व्याप्तेर्विशेषणत्वेन प्रथमो-

न्यायलीलावतीप्रकाशविवृतिः

सामानाधिकरण्यविषयत्वमिति न्यूनविषयतेति वाच्यम्। पुरुषश-
क्तिपरीक्षार्थमन्वयव्याप्तिमभ्युपगम्य सिद्धसाधनग्रहपरिहारेणैव स-
म्बन्धकथायां तादृशोपनयेऽतिव्याप्तिसम्भवात्। वस्तुतः सत्यन्तं
न्यायावयवपरम्, अन्यूनानतिरिक्तपदयोश्च विकल्पेनान्वये लक्षणद्वय-
मेवेदम्। यदि पूर्वोदाहृतोपनयो न स्वीक्रियते इति सारम्। पदानां
प्रत्येकमेव तादृशज्ञानजनकत्वादतिव्याप्तिरिति वाक्यपदं तादृशफ-
लोपहितसमुदायपरम्। हेत्विति। हेत्ववयवेत्यर्थः। तेन नोदासीनाति-
व्याप्तिः। अनुमितीति। अत्र कारणेत्यन्तं धीविशेषणमुदासीनातिव्या-
प्तिवारणाय, तच्च न्यायजन्यज्ञानप्रयोजकेत्यर्थकम्। निगमनैकदेशेऽ-
तिव्याप्तिवारणाय साध्यविषयकेति। साध्यविषयधीजनकनियता-
न्यत्वं च तदर्थोऽतो न प्रत्यक्षस्पर्शाश्रयत्वादित्यत्राव्याप्तिः। उदाहर-
णैकदेशेऽतिव्याप्तिवारणाय हेतुविभक्तिमदिति। शब्दपदं तु सामा-
न्यवत्त्वे सतीत्यादावव्याप्तिवारकं शब्दपदेन हेतुविभक्त्यर्थान्वितार्थक-
त्वस्य लाभादिति। पुरुषस्य दण्ड इति ज्ञानानन्तरं दण्डो पुरुष इति

स्वरूपमात्रस्य तद्धेतुतामात्रेण तदनन्तरं जिज्ञासितत्वात्। आभ्यां हेतुहेतुमद्भावप्रतीतौ धर्मधर्मिभावबोधनार्थमुपनयोऽपि। तस्मादनित्य एव न त्वस्मान्नित्योऽपीति विपक्षशङ्कानिरासार्थं

न्यायलीलावतीकण्ठाभरणम्

स्थितावाकांक्षाबलादेवेत्यर्थः। साध्याविषयकशाब्दज्ञानजनकहेतुविभक्तिमन्न्यायावयवत्वं हेतुत्वम्। अवयवमेवाह साध्यस्वरूपेति। उदाहरणस्य सर्वविषयत्वात् तदुल्लंघ्य उपनयमाह आभ्यामिति। प्रतिज्ञाहेत्ववयवाभ्यामित्यर्थः। धर्मधर्मिभावेति। व्याप्तस्य पक्षधर्मभावो धर्मत्वमित्यर्थः। सल्लिङ्गपरामर्शसमानविषयकशाब्दज्ञानजनकन्यायावयवत्वमुपनयत्वम्। तस्मादनित्य एवेति। बाधशङ्कानिवृत्तिप्रयोज

न्यायलीलावतीप्रकाशः

पस्थितिर्वाच्या। न च पक्षधर्मनिष्ठो धूमो वह्निव्याप्य इत्येव परामर्षः पक्षधर्मताविशेषणकः पक्षविशेषानुमितिजनकं इति वाच्यम्। असाक्षात्कारिण्यनुभवे विशेष्यतायां स्वातन्त्र्येणोपास्थितेः प्रयोजकत्वादिति व्याप्त्युपदर्शकोदाहरणाकाङ्क्षायामुदाहरणवचनम्। तल्लक्षणं तु अनुमितिहेतुतृतीयलिङ्गपरामर्षपरवाक्यजन्यज्ञानजनकव्याप्यत्वाभिमतवन्निष्ठनियतव्यापकत्वाभिमतसम्बन्धबोधजनकं वाक्यमुदाहरणमिति सर्ववादिसिद्धत्वादत्र नोक्तम्। आभ्यामिति। तृतीयलिङ्गपरामर्षस्य व्याप्तिपक्षधर्मतावगाहिनोऽवयवान्तरादलाभात्, तदनभ्युपगमेऽपि पक्षधर्मताया अलाभात्, हेतुवाक्यस्य च हेतुस्वरूपोपस्थापकस्यात्परत्वात्, वादिवाक्यस्यासिद्धार्थत्वेन तदनाक्षेपकत्वात् पक्षनिष्ठव्याप्तपक्षधर्मताबोधकं वाक्यम् उपनय इति लक्षणमिति भावः। तस्मादनित्य

न्यायलीलावतीप्रकाशविवृतिः

ज्ञानदर्शनेन व्यभिचार इत्यत उक्तं असाक्षात्कारिणीति। विशेष्यतायामित्यनन्तरं जनकीभूतज्ञान इति शेषः। अनुमितिहेत्विति। उदासीनातिव्याप्तिवारणाय जनकेत्यन्तं बोधविशेषणं न्यायजन्यज्ञानजनकेत्यर्थकम्। उपनयातिव्याप्तिवारणाय विशेष्यपदं, तस्य च व्याप्यत्वाभिमतमुद्दिश्य व्यापकत्वाभिमतसम्बन्धबोधजनकत्वमर्थोऽतो नोपनयातिव्याप्तिः। वाक्यपदं च तादृशबोधोपहितसमुदायपरं प्रत्येकपदातिव्याप्तिवारकम्। पक्षनिष्ठेति। समस्तावयवेन यत्र तादृशबोधजनन-

निगमनमपीत्यास्ताम् इति पञ्चावयवाः।

न्यायलीलावतीकण्ठाभरणम्

कशाब्दज्ञानजनकन्यायावयवत्वं (निगमनत्वम्)। केचित्तु प्रमा सामग्रीबलसंपादितेति मध्यस्थावगमविषयीभावितव्यमिति वादिनोः समयबन्धः, स च त्र्यवयवादिप्रयोगेणापि सम्पद्यत एव, अन्यथा नियमानिर्वाहे बौद्धादयोऽनिगृहीताः स्युस्तथाच शास्त्रे यथा सूत्रकारेण प्रयोगोऽभ्युपगतस्तथा तच्छास्त्रानुवर्तिना कथायां वक्तव्यो, अन्यथा न्यूनाधिकनिग्रहापत्तेरिति वदन्ति।

न्यायलीलावतीप्रकाशः

एवेति। यद्यपि व्याप्तपक्षधर्मलिङ्गप्रतिपादनमवयवचतुष्टयेन जनितं विपरीतशङ्कानिवृत्तिरपि लिङ्गपरामर्षाज्जाता, अन्यथा निगमनेऽपि शङ्कापत्तेः, नहि तद्विशेषदर्शनतामनादृत्यैव तन्निवर्त्तकम्, तथापि बाधसत्प्रतिपक्षत्वाभावबोधफलं निगमनम्, तच्चावयवान्तरान्न जातम्। अथ बाधसत्प्रतिपक्षत्वाभावः स्वरूपसन्नेवानुमितिहेतुर्न ज्ञातः; तस्मिन्सति तज्ज्ञानवैधुर्येणानुमित्यनुत्पादादर्शनादिति किमर्थं तदभावो बोधनीयः। तत्र बाधसत्प्रतिपक्षयोर्हेत्वाभासत्वेनानुमितिप्रतिबन्धकत्वे सति यदवगमे यन्न भवति तत्तदभावज्ञानसाध्यं यथोपाध्यभावज्ञानसाध्यानुमितिरिति व्याप्तेर्बाधाद्यभावस्यापि बोधनीयत्वात्। निगमनलक्षणं तु अनुमितिहेतुलिङ्गपरामर्षप्रयोजकशाब्दज्ञानकारणव्याप्तपक्षधर्मताज्ञानप्रयुक्तसाध्यज्ञानजनकवाक्यत्वम्॥

न्यायलीलावतीप्रकाशविवृतिः

मित्यर्थोऽतो न निगमनैकदेशातिव्याप्तिः। यदवगम इति। यदि चेयं व्याप्तिरप्रयोजकतया नाङ्गीक्रियते स्वरूपसन्नेव बाधाभावः कारणं तदा बाधाभावसम्पादनायैवाबाधितत्वं बोध्यत इति यदवगम इत्यादिप्रयोक्तुरभिप्रायकथनं, तथाच यदवगमे सति यन्न भवति तत्तदभावावगमे भवत्येवेत्यभिप्रायो निगमयतीति भावः। अनुमितिहेत्विति। उदासीनातिव्याप्तिवारणाय कारणेऽत्यन्तं ज्ञानविशेषणम्। तस्य न्यायजन्यज्ञानकारणेत्यर्थः। ज्ञानपदं ज्ञानज्ञानपरम्। निगमनेऽपि प्रतिज्ञायामिव साध्यपदे ज्ञानलक्षणास्वीकारात्।

तदाभासास्तु चत्वारः। असिद्धविरुद्धसव्यभिचारानध्यवसिताः। बाधप्रतिरोधावपि स्त इति चेत्। न। उभयो(१)र्व्याप्तिग्रहपक्षधर्मतापहारेणैवानुमानदूषकत्वात् सिद्धसाधनवत्, अन्यथा

न्यायलीलावतीकण्ठाभरणम्

तदाभासा इति। पञ्चभिरवयवैर्यस्य सम्पत्तिर्गम्यते तदाभासा इत्यर्थः। अनुमितिप्रतिबन्धकतावच्छेदकरूपवत्त्वं हेत्वाभासत्वम्। विभागमाक्षिपति बाधेति। सन्देहसिषाधयिषयोः पक्षताघटकयोरभावादाश्रयासिद्धिः, तत्र हेतुसत्त्वे व्यभिचारो, सत्प्रतिपक्षे तु व्याप्तिसन्देहात् व्या

न्यायलीलावतीप्रकाशः

तदाभासा इति योग्यतया तच्छब्देन हेतुपरामर्षः। हेत्वाभासत्वं तु ज्ञायमानत्वे सत्यनुमितिप्रतिबन्धकत्वम्। तयोरिति। बाधे पक्षत्वाभिमते साध्याभावप्रमायां साधनत्वाभिमतस्य वृत्तेर्व्यभिचारः, साध्यसन्देहाभावान्न पक्षत्वं, सत्प्रतिपक्षे त्वन्यतरत्र तत्सत्त्वेऽपि तत्प्रतीतिर्नास्तीत्यसिद्ध एव तयोरन्तर्भाव इत्यर्थः। ननु व्याप्तिपक्षधर्मताप्रमित्यभावोपजीव्यत्वात्तौ पृथक् स्यातामित्यत आह अन्यथेति। सिद्धसाधनस्यापि तदुपजीव्यत्वादित्यर्थः। नन्रुपजीव्यत्वेऽपि सिद्धसाधनं स्वतोऽदूषकं नहि साध्यज्ञानं साध्यज्ञानपरिपन्थि, साध्या-

न्यायलीलावतीप्रकाशविवृतिः

ज्ञायमानत्वे सतीति। यद्यपि साक्षादनुमितिप्रतिबन्धकत्वे विवक्षिते व्यभिचाराद्यव्याप्तिः, परम्परासाधारण्यविवक्षायां उपाधावतिव्याप्तिस्तथाप्यनुमितिपरामर्षान्यतरविरोधिघटितशरीरत्वमेव लक्षणम्। विरोधश्च क्वचित्परस्पराभावात्मकत्वं क्वचिदभावव्याप्यत्वम्। अत एव च न सिद्धसाधनप्रसङ्गः। इदं च लक्षणं ज्ञायमानस्यैव हेत्वाभासत्वमिति मते, ग्रन्थकृन्मते त्वनुमित्यसाधारणदोषत्वमेव लक्षणमसिद्ध्यादेरज्ञायमानस्यैव प्रतिबन्धकत्वाद्बाधस्यासङ्ग्राह्यत्वाच्चेति तदेवानेनोपलक्षितमित्यवधेयम्। मूले साध्याभावपरिच्छितिरूपत्वादित्युपलक्षणं, तद्व्याप्यपरिच्छि-

---

(१) तयोरिति प्रकाशाभिमतः पाठः न० पु० बोध्यः।

तस्यापि दूषणान्तरतापत्तेः । ताद्रूप्यपरिच्छेदो न तस्य विरोधी स्वभावादिति तस्य परापेक्षित्वात्, बाधप्रतिरोधयोस्तु साध्याभावपरिच्छित्तिरूपत्वादाभासान्तरत्वमिति चेत् । न । सर्वोपसंहारप्रवृत्तबाह्याभ्यन्तरनियमस्यानुमानसहायत्वात् । तदेकदेश-

---

न्यायलीलावतीकण्ठाभरणम्

प्यत्वासिद्धिरित्यर्थः । ताद्रूप्यपरिच्छेदः साध्यवत्तया धर्मिपरिच्छेदः सिद्धसाधनमिति यावत् । तस्य न साध्यसिद्धिविरोधित्वं धारावहनादिदर्शनात् । साध्याभावपरिच्छित्तिस्तु साध्यसिद्धिपरिपन्थिनीति तयोः स्वातंत्र्येणैव दोषत्वमित्यर्थः । बाह्यः सपक्षः, आभ्यन्तरं पक्षः,

न्यायलीलावतप्रकाशः

भावप्रमा तु स्वतो दूषिका तथा, सत्प्रतिपक्षोऽपि व्याप्त्यादिप्रमाप्रतिबन्धकत्वेन तथेत्याह ताद्रूप्येति । साध्यवत्तया धर्मिणः परिच्छेदः सिद्धसाधनमित्यर्थः । सर्वेति । बाह्याभ्यन्तरं सपक्षपक्षसाधारण्येनेत्यर्थः । वह्नौ कृतकत्वदर्शनात् पूर्वं पक्षधर्मताज्ञानाभावादेव नानुमितिस्तद्दर्शने च साध्याभाववति हेतुदर्शनादनैकान्तिकत्वमेव दूषणम् । न च वह्नौ प्रत्यक्षेण साध्याभावग्रहात्पूर्वं हेतुदर्शने सत्यनैकान्तिकत्वज्ञानाभावादनुमितिसामग्री निःप्रत्यूहैवेति वाच्यम् । विशेषादर्शनदशायामुत्पन्नस्यापि व्याप्तिज्ञानस्य वह्नौ साध्याभावप्रमया बाधेनानुमितिसामग्रीवैकल्येनानैकान्तिकस्यैव दूषणत्वादिति भावः । ननु पक्षत्वाभिमतादन्यत्र साध्याभाववति हेतुसत्त्वेनानैकान्तिकमत्र

न्यायलीलावतीप्रकाशविवृतिः

त्तिरूपत्वादित्यपि द्रष्टव्यम् । व्याप्त्यादिप्रमेति । अन्यतरत्वेन व्याप्तिपक्षधर्मान्यतरभङ्गनिर्णयेऽसाधारणरूपेण सन्देहादिति भावः । पौनरुक्त्याभिया सर्वोपसंहारप्रवृत्तत्वमेव परिच्छिद्याह बाह्याभ्यन्तरमिति । यद्यपि बाह्याभ्यन्तरे सपक्षपक्षौ न तदुभयसाधारण्येनेति फक्किका युज्यते, तथापि पर्यवसितार्थोत्कीर्त्तनमिदम् । नच वह्नाविति । व्याप्तिपक्षधर्मताज्ञानोत्तरं यत्र पक्षे साध्याभावग्रहस्तत्र बाधस्य प्रतिबन्धकत्वमिति शङ्कार्थः । उत्पन्नस्यापि व्याप्तिज्ञानस्याप्रामाण्यस्य शङ्का तत्र बाधात्मकव्यभिचारज्ञानेनाधीयत इति तच्छङ्काशून्यपरामर्षाभावादेव

प्रवृत्तविपरीतपरिच्छेदस्यैव बाधस्य सव्यभिचारत्वात् । स च व्यभिचारो बहिरन्तश्चेति व्यभिचारदेहान्तर्भूतत्वात् । प्रतिरोधे च प्रतिरोध्यनियमग्राहकप्रत्यक्षबोधस्य सत्त्वे तस्यानुद्भावनात् ।

न्यायलीलावतीकण्ठाभरणम्

तथाच बाधे पक्षे एव व्यभिचारान्न हेत्वभासान्तरत्वम् । ननु नहि न पक्षे पक्षसमे वा व्यभिचार इत्यत आह सचेति। दोषे सति नेयं परिभा-

न्यायलीलावतीप्रकाशः

तु न तथेत्याशयेनाह स चेति । पक्षातिरिक्तत्वस्य गौरवकरत्वादित्यर्थः । नच बाधोत्तरमनैकान्तिकत्वापक्षधर्मत्वयोऽदूषकत्वादुपजीव्यत्वाद्बाधः पृथक्, उपजीव्यत्वं हि न तावत्तमवगम्यैवावगमः, बाधमनवगम्यापि शब्दादनुमानाद्वा अनैकान्तिकत्वस्य सुग्रहत्वात् । वस्तुत एकत्र धर्मिणि हेतुसाध्याभावाविति समूहालम्बनैकैव प्रतीतिर्हेतुसाध्याभावयोः सामानाधिकरण्योल्लेखिनी, अन्यथा साध्याभावप्रमायां यदि हेतोरज्ञानं तर्ह्यसिद्धिरेव स्यादित्येकवित्तिवेद्यत्वं तयोरिति नोपजीव्यत्वम् । नापि बाधमुद्भाव्यैवोद्भावनम् असिद्धेः, नहीदमनैकान्तिकमित्युक्ते, कथमिति परानुयोग आवश्यको, येनावश्यकोद्भाव्यता स्यात, तथात्वेऽप्युजीवकमेव दूषणमस्तु क्लृप्तत्वात, अतएवावश्योद्भाव्यत्वं तदिति परास्तम । अथार्थान्तरोपनायकस्मृ-

न्यायलीलावतीप्रकाशविवृतिः

तत्र नानुमितिरिति परीहारार्थः । शब्दादनुमानाद्वेति । एतच्च प्रत्यक्षरूपमेव ज्ञानं नोपजीव्यमिति प्रतिपादनाय । ज्ञानान्तरसाधारण्येनोपजीव्यत्वनिरासायाह वस्तुत इति। नहीदमनैकान्तिकमिति। यद्यपि बाधोद्भावनानन्तरमेव व्यभिचारोद्भावनमिति शङ्कायां व्यभिचारोद्भावनानन्तरं न बाधोद्भावनमिति परिहारो व्यधिकरणस्तथाप्युद्भावयितुर्विमर्षशरीरमेतत् ; तथा च व्यभिचारे उद्भाविते कथमिति यदि परकथं तावश्यं, तदा प्रथमं बाध एवोद्भाव्यतामावश्यकत्वादित्यालोचयतां प्रथमं बाधोद्भावननियमः स्यान्न त्वेतदस्तीति नाशङ्कितो नियम इति भावः। यद्वा बाधोद्भावनपूर्वतानियतं न व्यभिचारोद्भावनमित्येवाशङ्काफक्किकार्थ इति यथाश्रुतैव परिहारफक्किका । अत एवेति । पूर्वोत्तरसाधारण्येनेति शेषः । रत्नकोशकृन्मतमाशङ्कते अथेति । एत-

न्यायलीलावतीकण्ठाभरणम्

षेत्यर्थः । ननु पक्षे साध्याभावप्रमा बाधस्तदुत्तरञ्च प्रमितसाध्याभाववद्भासितया हेतोरनैकान्तिकत्वं ग्राह्यमेव न पक्षधर्मतापि तदुपजीव्येति बाधः पृथगेवेति चेत् । न । उपजीव्यत्वेऽपि क्लृप्तत्वादुपजीवकस्यैव हेत्वाभावात् । ननु संस्कारवशतः काञ्चनमयत्वं च यत्र वह्नौ भासते तत्र काञ्चनमयवह्निमानयमित्यनुमितिरवश्यमाभासेति हेत्वाभासान्तरसत्त्वे बाध एव हेत्वाभास इति चेन्न । विप्रतिपत्तिविषयेण साध्येनैव हेत्वाभासनिरूपणात् । सदर्थविशिष्टश्च विप्रतिपत्तिविषयः, अन्यथा सर्वप्रमाऽनाश्वासप्रसङ्गः, असदर्थ एव संस्कारवशादत्र भात इति शङ्कायाः सुलभत्वात् । ननु महानसीयो वह्निः पर्वते बाधादेव न भास्यत इति चेन्न । पर्वतीयधूमेन तस्य व्याप्तेरभावात् । ननु गन्धप्रागभावावच्छिन्नपृथिवी पक्षवती गन्धवती पृथिवीत्वादत्र बाधात्साध्यासिद्धिरिति चेत् । न । गन्धकृताभावस्य विशेषणत्वे स्वरूपासिद्धिः, उपलक्षणत्वे साध्यसिद्धिसम्भावनायां कबाधोऽपीति विशेषात् । तत्रापि वा व्यभिचार एव, पक्ष एव तद्विशेषणविशिष्टसाध्यात्यन्ताभावसामानाधिकरण्यात् । किञ्च बाधस्य सकलप्रमाणदोषत्वेऽनुमित्यसाधारणदोषत्वाभावात् अहेत्वाभासत्वादिति दिक् । प्रतिरोध्यं यत्प्रमानुमानं तन्नियमग्राहकेण प्रत्यक्षेण साध्यस्य सत्त्वे तस्य सत्प्रतिपक्षस्यानुद्भावनात् । नहि बाधितेन सत्प्रति-

न्यायलीलावतीप्रकाशः

त्यादिसहकारिता सामान्यत एव प्रत्यभिज्ञादौ क्लृप्ता, तदिह व्याप्तिपक्षधर्मताकलिङ्गपरामर्षस्यासदर्थकाञ्चनमयत्वादिस्मृतिसहकारिवशाद्यत्राभासधीकारणत्वं तत्राभासः पृथक् । मैवम् । व्याप्तिपक्षधर्मतोपनीतादन्यस्य व्याप्तौ भाने मानाभावात्, प्रत्यभिज्ञादौ प्रत्यभिज्ञाप्रमाणबलेन तत्कल्पनात्, अन्यथा पूर्वानुभूतसकलार्थज्ञानेऽनुमितेर्याथार्थ्योच्छेदापत्तेः । अथ प्रत्यक्षादौ प्रमामात्रं प्रति स्वातन्त्र्येण बाधस्य दोषत्वेन क्लृप्तत्वादनुमितावपि स एव दोषः । मैवम् । त-

न्यायलीलावतीप्रकाशविवृतिः

न्मते चानुमित्याभासताप्रयोजकत्वमेव हेत्वाभासत्वमिति ध्येयम् । याथार्थ्योच्छेदापत्तेरिति । इदं चापाततो ज्ञानस्य प्रत्यक्षत्वेऽपि न विषयतानियामकत्वं तत्त्वेन, किन्तु सन्निकर्षत्वेनानुमितौ न सन्निक-

न्यायलीलावतीप्रकाशः

थासति बाधस्य हेत्वाभासत्वव्याघातात्, अनुमित्यसाधारणदोषस्यैव हेत्वाभासत्वात्। अथ पक्षाभिमते साध्याभावग्रहवत् साध्याभावव्याप्यग्रहोऽपि दूषकः विरोधित्वाविशेषात्, एवञ्च साध्याभावसामानाधिकरण्यमनैकान्तिकत्वम्, साध्याभावव्याप्यसामानाधिकरण्यं च बाधः, साध्याभावव्याप्यं च वह्नित्वाद्येव। मैवम्। पक्षत्वाभिमते साध्याभावग्रहस्यैव दूषकत्वासिद्धौ तद्दृष्टान्तत्वानुपपत्तेः, सिद्धौ वा तस्योक्तरूपबाधाऽनन्तर्भावे षष्ठहेत्वाभासत्वापत्तेः। उक्तरूपश्च बाधः पक्षाभिमतविषयकसाध्याभावबुद्धौ सत्यामसत्यां वा? आद्येऽनैकान्तिकमेव, साध्याभावसामानाधिकरण्यग्रहात्। अन्त्ये लिङ्गत्वाभिमतसाध्याभावव्याप्ययोरगृह्यमाणविशेषतया सत्प्रतिपक्ष एव दूषणं, न बाधः। न च तुल्यबलत्वं तन्त्रम्, गमकताप्रयोजकरूपसम्पत्तेरेव बलत्वेन तस्य द्वयोरपि ज्ञानत्वात्। प्रतिरोध्येति। प्रतिरोध्यं स्थापनानुमानं तस्य व्याप्तिग्राहकं यत्प्रमाणं तस्य प्रत्यक्षेण द्वितीयानुमानमूलव्याप्तिग्राहकेन बाधः, तत्सत्त्वे तस्यानुद्भावनात्—प्रतिरोधानुद्भावनात्, अन्यथा हीनबलतया सत्प्रतिपक्षत्वानुपपत्तेरित्यर्थः। ननु द्वितीयानुमानमूलव्याप्तिग्राहकं यत्प्रत्यक्षं तद्विरोधि प्रथमानुमानमूलव्याप्तिग्राहकं प्रत्यक्षान्तरमस्ति, (१)तथाच

न्यायलीलावतीप्रकाशविवृतिः

षस्य विषयतानियामकत्वं किन्तु व्याप्तिपक्षधर्मतयोरिति नोपनीतस्य विषयत्वमिति सारम्। अनुमित्यसाधारणत्वादिति ध्वनितम्। वस्तुतः प्रत्यक्षे ग्राह्याभावप्रत्यक्षत्वेन प्रतिबन्धकता शब्दस्तु मानान्तरं न भवत्येवेति ग्राह्याभावज्ञानत्वेनानुमितावेव प्रतिबन्धकत्वं वाच्यं, तच्च न व्यभिचारसांकर्यादिति रहस्यम्। षष्ठेति। हेत्वाभासपञ्चत्ववादिन इति शेषः। सत्प्रतिपक्ष एवेति। त्वन्मत इति शेषः। ननु परस्परव्याप्तिग्राहकप्रामाण्यासिद्धिर्न स्वतो दूषिका विरोध्यविषयत्वात्, न चान्यतरव्याप्त्यनिश्चय एव दोषस्तत्रापि ग्राहकप्रमाणस्य सत्प्रतिपक्षतयोपजीव्यत्वादित्यरुचेराह तथात्वेपीति। दूषकत्वेऽपीत्यर्थः। विरोधिसामग्रीत्वेन शब्दादिसाधारणेन प्रतिबन्धकत्वादि

(१) अत्र तथात्वेपीति विवृतिकारसम्मतपाठो युक्तः।

तस्याप्येतन्नियमग्राहकं विपक्षान्तरमस्तीति चेत् । न । तस्यैव प्रतिबन्धासिद्धिरूपत्वात् अलं तदुपजीविनाऽन्येनेति तयोरसत्त्वात् ॥

लिङ्गत्वेनानिश्चितो हेतुरसिद्धः । स एवैकोऽस्तु, अन्येषा-

न्यायलीलावतीकण्ठाभरणम्

पक्षत्वमुद्भावयितुमुचितमिति भावः । तस्यापीति । प्रथमानुमानस्यापीत्यर्थः । तस्यैवेति । परस्परविरुद्धप्रत्यक्षद्वयप्रतीघातस्यैवेत्यर्थः । प्रतिबन्धासिद्धिरूपत्वादिति । उभयत्र व्याप्तिसन्देहापादकतया तादूप्योपचारः अलमनेन प्रतिबन्धेनेति । तयोरिति । बाधप्रतिरोधयोरित्यर्थः । तथाच हेत्वाभासानां चतुष्ट्वाव्याघात इति भावः ।

लिङ्गत्वेनेति । व्याप्तपक्षधर्मत्वेनेत्यर्थः । तथा च व्याप्तपक्षधर्मत्वा-

न्यायलीलावतीप्रकाशः

विरोधिप्रत्यक्षयोरेव सत्प्रतिपक्षत्वं दूषणमस्तु इत्यत आह तस्यापीति । तस्यापि द्वितीयानुमानस्यापि, एतन्नियमग्राहकं स्थापनानुमानमूलव्याप्तिग्राहकं विपक्षान्तरं, प्रत्यक्षान्तरेण दूषणत्वरूपाभासत्वासिद्धेः तथाभूतस्यैव हेत्वाभासत्वादित्याह तस्यैवेति । वादिप्रत्युपन्यस्तविरोधिप्रत्यक्षस्यैव, प्रतिबन्धासिद्धिरूपत्वात्-प्रतिबन्धासिद्धिनिरूपकत्वात्, तदुपजीविना-असिध्युपजीविना, तयोर्बाधसत्प्रतिपक्षयोर्बाधादित्यर्थः ।

लिङ्गत्वेनेति । लिङ्गत्वेन व्याप्तिपक्षधर्मतावत्त्वेन, अनिश्चितोऽप्रमित इत्यर्थः । तेनाश्रयासिद्धिव्याप्यत्वासिद्धिस्वरूपासिद्धयः संगृहीताः । ननु प्रत्येकसमुदायाभ्यामव्यापकम् । न च प्रत्येकाभावानुगतो व्याप्तिपक्षधर्मताविशिष्टाभावः, विशिष्टाभावाज्ञानेऽपि व्याप्त्याद्यन्यत-

न्यायलीलावतीप्रकाशविवृतिः

ति भावः । प्रत्यक्षस्य न प्रतिबन्धासिद्धिरूपत्वमित्यत आह निरूपकत्वादिति । निष्पादकत्वादित्यर्थः । असिद्ध्युपजीविनाऽसिद्धिनिष्पादकेन । तेनेति । व्याप्तिपक्षधर्मताप्रमितिविरहात्मकलक्षणेनेत्यर्थः । स्वरूपासिद्धय इत्यन्तमुपलक्षणम्, मितिविरहोऽपि द्रष्टव्यः । अत्र शङ्कते ननु प्रत्येकेति । विशिष्टाभावज्ञानेपीत्युपलक्षणं लक्ष्यताभिमतप्रमितिवि-

मत्रैवान्तर्भावादिति चेत्। व्याप्यत्वासिद्ध्यादेरन्यत्र व्यभिचा-

---

न्यायलीलावतीकण्ठाभरणम्

ष्यामप्रमितिरसिद्धिः, तेनाश्रयासिद्धिव्याप्यत्वासिद्धिस्वरूपासिद्धीनां सङ्ग्रहः। विशिष्टानुमितिश्च विवक्षिता, तेन प्रत्येकप्रामितावपि विशिष्टाप्रमितित्वे नानुमानादेव हेत्वाभासत्वम्, प्रत्येकाप्रमितावपि विशिष्टाप्रमितत्वप्रतिसन्धानमन्तरेण नानुमितिप्रतिबन्धकत्वम्।

वस्तुतः स्वरूपसत्या एवाऽस्या आभासत्वम्, न हि कारणविघटनमपि ज्ञातं सत्कार्यं विघटयति व्यभिचारादावपि व्याप्तिपक्षधर्मअन्यतरानिश्चयस्यावश्यकत्वादित्यर्थः। व्याप्यत्वासिद्ध्यादेरित्यादिपदादाश्रयासिद्धिसङ्ग्रहः। बाधस्थले पक्ष एव व्यभिचारेणाश्रयासि-

न्यायलीलावतीप्रकाशः

राभावज्ञानेनोद्भावनेन च स्वपरानुमितिप्रतिबन्धात्, अन्यथा तेषां हेत्वाभासान्तरतापत्तेः, प्रमितिविरहाज्ञानेऽपि प्रत्येकज्ञानस्यादोषत्वाच्च। किञ्च स्वप्रमितिविरहस्य विवक्षितत्वे सद्धेतुसाधारण्यं, कदाचित्तत्रापि प्रमितिविरहात्। सकलप्रमितिविरहस्य च तत्त्वे तज्ज्ञानमशक्यं, परप्रमितीनामयोग्यत्वेन तदभावस्यायोग्यत्वात्, स्वरूपतश्च तस्य प्रतिबन्धकत्वे ज्ञानगर्भहेत्वाभासत्वानुपपत्तिः। अत्राहुः व्याप्तिपक्षधर्मताभ्यां निश्चयः सिद्धिस्तदभावोऽसिद्धिः, सा च स्वरूपसत्येव दूषिका कारणाभावत्वात्। न चैवंसति सव्यभिचारादेरप्यत्रैवान्तर्भावप्रसङ्गः, स्वरूपसत्या एवासिद्धेर्दोषत्वेन स्वज्ञानार्थमसिद्ध्यनुपजीव्यत्वादिति वाच्यम्। स्वज्ञानार्थमसिद्ध्यनुपजीव्यत्वेऽपि व्यभिचारादिसत्त्वात् सिद्धिर्नोत्पद्यत एवेति सव्यभिचारादेरुपजीव्यत्वात् स एवैक इति व्याप्तिपक्षधर्मतां तत्प्रमितिं चाविरुन्धतां हेतुदूषणत्वाभावादित्यर्थः। व्याप्यत्वासिद्ध्यादेरिति। आदिप-

न्यायलीलावतीप्रकाशविवृतिः

रहाद्व्याप्तिश्चेत्यपि बोद्धव्यम्। ननु प्रमितिविरह एवासिद्धिस्तत्त्वं च तल्लक्षणमित्यत आह प्रमितिविरहाज्ञानेपीति। प्रत्येकेति। व्याप्त्यभावपक्षधर्मताविरहेत्यर्थः। ज्ञानगर्भेति। ज्ञायमानस्यैव हेत्वाभासत्वमिति स्वमते पूर्वपक्षिणो निर्भरतयेदं दूषणम्। अतएव तदनभ्युपगमेनैव सिद्धान्तः। व्यभिचारादेरुपजीव्यत्वादिति। यद्यप्यव्यभिचारात्मकव्याप्त्य-

राद्युपजीवकत्वात् । ननु नियमनिश्चयप्रागभावस्यात्यन्ताभावस्य वाऽहेतुकत्वेनोत्पत्तावनपेक्षत्वात् ज्ञप्तेरपि मानसप्रत्यक्षाधीनत्वात् न प्रतिबन्धासिद्धेर्व्यभिचारोपजीवकत्वमिति (चेत् । न) व्यभिचारिषु प्रतिबन्धानुपलम्भस्य प्रतिबन्धाभावहेतुकत्वात् , कारणाभावात्कार्याभावस्य सर्वमतसिद्धत्वादुपजीवकत्वस्थितिरिति

न्यायलीलावतीकण्ठाभरणम्

ध्यादेरप्युन्नयनात् । अन्यत्रेति । यत्र न सिद्धसाधनात्पक्षताहानिरित्यर्थः । तत्र व्यभिचारादीनामसत्त्वान्नोपजीव्यत्वमिति भावः । ननु चासिद्धिरनिश्चयः, स च नोत्पत्त्यर्थं व्यभिचाराद्युपजीवति, न वा ज्ञप्त्यर्थमतः कथमुपजीव्यत्वमित्याशङ्कते नन्विति । मानसेति । निश्चयाभावस्यापि मनोवेद्यत्वात्तथाच पारमर्षं सूत्रम् "ज्ञानविकल्पानां भावाभावसंवेदनादध्यात्मम्-" इति । तथाचोत्पत्तौ ज्ञप्तौ वा नासिद्धेर्व्यभिचार उपजीव्य इत्यर्थः । परिहरति व्यभिचारिष्विति । प्रतिबन्धाभावो हि व्यभिचारस्तदधीन एव तदनुपलम्भः, यदि हि प्रतिबन्धः स्यादुपलभ्येत, तथाच प्रतिबन्धाभावाधीन एव उपलम्भाभाव इत्यर्थः । आक्षिप्तैवैकग्रन्थेनाह कारणाभावादिति । कारणं हि विषयतया

न्यायलीलावतीप्रकाशः

देनापक्षधर्मत्वसंग्रहः , बाधरूपव्यभिचारेण सन्देहाभावादपक्षधर्मतोन्नयनात् । तत्र व्याप्यत्वासिद्धिसम्भवेऽप्युद्भावनप्रकारभेदेनापक्षधर्मत्वस्याप्युद्भावनात् । व्यभिचारिष्विति । तथाच व्यभिचारोपजीवकत्वमेवासिद्धेरित्यर्थः । कारणाभावादिति । कारणाभावस्य प्रतिबन्धाभा-

न्यायलीलावतीप्रकाशविवृतिः

नुपलम्भस्यापि व्यभिचारनिश्चायकत्वे वैपरीत्यमपि, तथापि स्वार्थानुमाने इत्यादिमूलेन वक्ष्यमाणमेवात्र समाधानम् । व्याप्यत्वासिद्ध्यादेरन्यत्रेति मूलं व्यभिचारिप्रयुक्तसिद्धिविरहस्थल इत्यर्थः । नन्वित्यादिमूले व्यभिचारोपजीवकत्वमित्यनन्तरामिति चेदिति क्वचित् पाठः । व्यभिचारिष्विति । पूर्वं नपदं च । क्वचित्तच्छून्यः, न शब्दलोपश्च । तत्र प्रथमपक्षे नेत्यादिना हेतुकत्वादित्यन्तेन प्रथमपूर्वपक्षसमाधाने पुनः पूर्वपक्षिणा कारणाभावादित्यादिनाऽभावावगतिरिति बोध्यम्

चेन्न, व्याप्यत्वानुपलम्भस्य तन्निश्चायकत्वेन विपरीतापत्तेः। नह्यत्र योग्यानुपलम्भं विनाऽभावावगतिरिति चेत्। मैवम्। स्वार्थानुमाने यदेव स्फुरति तदेव दूषणमित्युपजीव्योपजीवकभावाविचारात्। परार्थानुमाने तु व्यभिचारिणि न व्याप्त्यसि-

---

न्यायलीलावतीकण्ठाभरणम्

उपलम्भस्य प्रतिबन्धस्तदभावो व्यभिचारधीलक्षणस्तस्मात् कार्यस्योपलम्भस्याभावोऽसिद्धिरिति चेदुपजीव्यं दूषे, तन्न सम्भवति यतः प्रतिबन्धाभावस्यैव ग्रहः प्रतिबन्धानुपलम्भाधीनः, नहि योग्यानुपलम्भमन्तरेणाभावग्रहे कारणान्तरमस्तीति व्यभिचार एवोपजीवकत्वसिद्धिरिति विपरीतापत्तिरित्यर्थः।

परार्थानुमाने त्विति। पर्वतो धूमवान्वह्निमत्त्वादित्यत्र यद्वह्निमत्तद्धूमवदित्युदाहरणावयवेन वादिना व्याप्तौ दर्शितायां व्याप्यत्वासिद्धिस्तावदाहत्योद्भावयितुं न शक्यते, व्याप्तिनिश्चये चानौपाधिकत्वमप्यातो निश्चितमेवातो यद्यपि व्यभिचारशङ्कापि नोदेतुमर्हति, त-

न्यायलीलावतीप्रकाशः

वस्यैव व्याप्यत्वेनोपजीव्यत्वं कार्याभावस्य च प्रतिबन्धानुपलम्भस्यासिद्धिरूपस्योपजीव्यत्वमित्यर्थः।

व्याप्यत्वानुपलम्भस्येति। व्याप्यत्वानुपलम्भस्य प्रतिबन्धाभावनि-

न्यायलीलावतीप्रकाशविवृतिः

न्तेन पुनः शङ्का, कारणाभावादित्यादिना सिद्धान्तमनूद्य इति चेन्मन्यसे सिद्धान्तिन्, तन्न तत्र हेतुर्व्याप्यत्वानुपलम्भस्येत्यादि इति योजना। द्वितीयपक्षे व्यभिचारिष्वित्यादिस्थितिरिति चेदित्यन्तेनावान्तरशङ्का, नेत्यादि अभावावगतिरिति चेदित्यन्तेन तन्निराकरणे प्रथमशङ्काया उपसंहार इत्येवं योज्यम्। प्रतिबन्धाभावस्यैवेति। यद्यप्येवं प्रतिबन्धाभावोपजीवकत्वेऽपि न व्यभिचारोपजीवकत्वं तथाप्यव्यभिचारस्यैव प्रतिबन्धकत्वमित्यभिप्रेत्येदम्। व्याप्यत्वेनेति। यद्यपि प्रतिबन्धभ्रमस्थले व्यभिचारस्तथाप्युपलम्भपदस्य प्रमाणत्वमभिप्रेत्येदम्। ननु व्यभिचारशङ्काया अप्युत्पाददर्शनेऽसम्भव एवेत्यतो मूले तदुपाध्यभावेनेति। तथासत्यतिपीडाऽतिनिर्बन्धः स्यादिति तत्प्र-

द्धिः, दृष्टान्ते सर्वोपसंहारात्तदुपलम्भात्। उपाध्यभावेन व्यभिचारशङ्काहानावतिपीडया पुनरनुत्तरव्यभिचारस्योद्भावनात्, तस्यैव तदुपजीवकत्वात्, (१)आयासगौरवाच्च। विरुद्धे तु विपरीत-

न्यायलीलावतीकण्ठाभरणम्

थापि स्फुटे व्यभिचारे नोपाधिरनुसर्तुमर्हतीति अतिनिःपीडनेन व्यभिचार एवोद्भाव्यः, स ह्यनुत्तरो यतस्तत्र वाद्युत्तरावकाशो नास्ति व्यभिचारस्य स्फुटत्वात्, तथा चासिद्धेर्व्यभिचार एवेत्यर्थः। ननु व्यभिचारश्चेत् दृष्टस्तदा तन्नान्तरीयकतया असिद्धिरपि ज्ञातैवातः सोद्भाव्यतामत आह आयासेति। कथमत्रासिद्धिरिति वादिप्रश्नानन्तरं व्यभिचारोपदर्शनमावश्यकम्, तथा च स एवोद्भाव्यो नान्त-

न्यायलीलावतीप्रकाशः

श्रायकत्वेनोपलम्भाभाव एवोपजीव्य इत्यर्थः। सर्वोपसंहारादिति। यत्कृतकं तदनित्यमेवंरूपतया तदुपलम्भाद्व्याप्त्युपलम्भादित्यर्थः। नन्वेवं परार्थानुमानेऽसिद्धिः क्वापि न स्यात् उदाहरणेन सर्वोपसंहारेण व्याप्त्युपलम्भात्, उदाहरणाभावे च न्यूनतापत्तेः। किञ्च यथा सर्वोपसंहाराद्व्याप्तिः तथा व्यभिचारव्यतिरेकोऽपि, यदि च सर्वोपसंहारो न व्यतिरेकानियतस्तर्हि व्याप्तिनियतोऽपि नायमिति कथमसिद्धिव्यतिरेकोऽपि। अत्राहुः। स्वयं यदेव स्फुरति तदेव परस्याप्युद्भाव्यते तथाच यत्रासिद्धिर्न स्फुरिता व्यभिचार एव स्फुरितस्तत्र परस्यापि व्यभिचार एवोद्भाव्यः द्वयोरपि व्यभिचारासिद्ध्योर्हेत्वाभासत्वव्यवस्थापनान्नो प्राप्तकालत्वम्। यत्र तु व्यभिचारासिद्धी युगपदेव स्फुरिते तत्रासिद्धावुद्भावितायां कथमित्यपेक्षायां व्यभिचारस्यावश्यकत्वाद्व्यभिचारोद्भावने तु नासिद्धेरपेक्षेति लाघवाद्व्यभिचार एव वाच्य इत्याह आयासेति। तत्र यद्यपि व्यभिचारित्वं न साध्याभाववद्गामित्वं, संयोगादिसाध्यकद्रव्यत्वे भूर्नित्या गन्धव-

न्यायलीलावतीप्रकाशविवृतिः

दर्शनमसिद्धमेवेति भावः। तथा व्यभिचारव्यतिरेकोपीति। अव्यभिचारस्य व्याप्तिशरीरत्वमभिप्रेत्येदम्। ननु सिद्धावुद्भावितायां कथमित्यपेक्षा-

(१) प्रयासेति पाठान्तरम्।

प्रतिबन्धे वाक्यार्थे परिस्फुरति अन्येषामनन्तरङ्गत्वमेवोपजीवक-त्वम्। असिद्धौ त्वनुपलम्भस्यैवासत्त्वनिर्वाहकत्वेनोपजीव्यत्वम्।

न्यायलीलावतीकण्ठाभरणम्

रीयकतयैवासिद्धेरित्यर्थः। अन्तरङ्गत्वमुद्भटत्वम्, विरोधो ह्युद्भट-विरोधः, तथा च तमपहाय कथमप्युद्भावयेत्। यद्वा अन्तरङ्गत्वं वादिवाक्यादेव प्रतीतत्वं व्यभिचारादीनां च स्वयमन्वेषणीयत्वेन बहिरङ्गत्वं यत्र न स्फुटो व्यभिचार उपाधिः स्फुरति तत्रासिद्धिरेव व्यभिचारस्योपजीव्येत्याह असिद्धाविति। असत्त्वनिर्वाहकत्वेन प्रति-

न्यायलीलावतीप्रकाशः

त्वादित्यनध्यवसिते चातिव्याप्तिः, नापि निश्चितसाध्यवत्तदन्यवृ-त्तित्वं,साध्यवदन्यवृत्तित्वस्यैव दूषकत्वे शेषवैयर्थ्यात्। तथापि वि-पक्षवृत्तित्वं तत्त्वम्, तन्मात्रस्य दूषकत्वात्, विरुद्धस्यापि तत्त्वाज्ञाने विपक्षवृत्तिताज्ञानदशायां सव्यभिचारत्वमेव, अन्यथा तस्य हेत्वाभा-सान्तरतापत्तेः, उपाधेयसंकरेऽप्युपाध्यसांकर्यस्येष्टत्वात्, अनुपसं-हार्यस्यापि वस्तुतस्तादृशत्वात्। विरुद्धस्याप्युपजीव्यत्वेनासिद्धेर्भे-दमाह विरुद्धे त्विति। विपरीतेति। साध्याभावव्याप्यत्व इत्यर्थः। अन्येषामिति। असिद्ध्यादीनामनन्तरङ्गत्वं विरुद्धप्रतीत्यनन्तरप्रतीयमानत्वं, साध्या-भावव्याप्यत्वेन निश्चितस्य विरुद्धत्वात्। नन्विदमयुक्तं साध्याभाव

न्यायलीलावतीप्रकाशविवृतिः

यां व्यभिचारावकाश इति प्रथमं व्यभिचारोद्भावनेऽप्राप्तकालत्वमि-त्यत आह द्वयोरपीति। तथापि विपक्षवृत्तित्वमिति। साध्यवदन्यवृत्तित्व-मित्यर्थः। अनुपसंहार्यस्यापीति। सर्वमनित्यं मेयत्वादित्यादेरित्यर्थः। सङ्केतोऽश्च तादृशस्यासिद्धत्वेनैव सङ्ग्रहः। यद्यपि साध्यवदन्यत्वांश-निश्चयीभूतसाध्यवदन्यगामित्वं प्रतिबन्धकतावच्छेदकमनुपसंहार्ये नास्ति, तथापि प्रतिबन्धकतावच्छेदकमन्यदेव साध्यवत्तदन्यवृत्तित्वं तु विभाजकम्। विरुद्धस्यापीत्यादिग्रन्थस्थदूषकतावच्छेदकमभिप्रेत्य साध्यव्यापकेति। न चेदमाकाशसाध्यकविरुद्धाव्यापकम्, तत्र साध्ये हेतुसामानाधिकरण्यविरहस्य प्रतिबन्धकतावच्छेदकत्वात्, न चा-धिक्यम्, सामानाधिकरण्यज्ञानविरोधित्वेनानुगमात्। अव्यभिचार-

एवंसति सोपाधित्वमेव दूषणं स्यादिति चेन्न। तस्य स्वतोऽदूषणत्वात्, ताद्रूप्यपरिच्छेदवत्, तेन व्याप्त्यसिद्ध्युपजीवनात्।

न्यायलीलावतीकण्ठाभरणम्

बन्धाभावरूपव्यभिचारज्ञापकत्वेन योग्यानुपलब्धेरभावनिश्चायकत्वादित्यर्थः। ननूपाधिस्फुरणे स एव दोषः स्यादित्याह एवमिति। तस्येति। साध्यव्यापकत्वसाधनाव्यापकत्वज्ञानमन्यत्रातन्त्रमित्युपाधेः परमुखानिरीक्षकत्वं सिद्धसाधनवदित्यर्थः। निरपेक्षणीयमाह

न्यायलीलावतीप्रकाशः

सम्बन्धस्यैवासाधकतासाधकत्वात् नियमांशस्य व्यर्थत्वात्, अत एव साध्यवदन्यत्वव्याप्यत्वमित्यपास्तम्, व्याप्यत्वविवेचने व्यर्थत्वात्। मैवम्। साध्यव्यापकाभावप्रतियोगिनो विरुद्धत्वात् साध्याभावव्याप्यश्चेद्धेतुरवश्यं हेत्वभावव्याप्यं साध्याभावाभावरूपं च साध्यम्, ययोर्यथा व्याप्तिस्तदभावयोर्वैपरीत्येन व्याप्यव्यापकभावात्। न च साध्यहेत्वभावयोर्व्याप्तिग्रहे हेतोः साध्याभावव्याप्यत्वग्रहः कारणम्, तद्ग्रहेऽपि तयोः सहचारदर्शनेन व्याप्तिग्रहसम्भवात्। यद्वा वृत्तिमत्त्वे सति साध्यवदवृत्तित्वं विरुद्धत्वम्, नहि वृत्तिमत्त्वे साध्यवदवृत्तित्वज्ञानं विना साध्याभाववद्गामित्वज्ञानं भवतीति तस्योपजीव्यत्वम्। असत्त्वनिर्वाहकत्वेन-प्रतिबन्धासत्त्वनिर्वाहकत्वेनत्यर्थः। अनुमितिव्यतिरेकनिर्वाहकत्वमित्यन्ये। ननु यद्युपजीव्यत्वादनुपलम्भस्य पृथक् दुषणत्वं तदा यत्रोपाध्युपजीवकं दूषणान्तरं तत्रोपाधिः पृथक् दूषणं स्यादित्याह एवंसतीति। नोपजीव्यमात्रं पृथक् दूषणं किन्तु स्वतो दूषकं सत्, न चोपाधिस्तथा, न ह्यन्यस्य साध्यव्यापकत्वसाधनाव्यापकत्वज्ञानमन्यस्य साध्यव्याप्यत्वे स्वतो दूषकम्, किन्तु व्याप्तिविघटनद्वारा, अतो न पृथगुपाधिर्दूषणमित्याह तस्येति। ताद्रूप्येति। सिद्ध·

न्यायलीलावतीप्रकाशविवृतिः

ज्ञानविरोधितयेव व्यभिचारोपाधीनामेवमेवान्यत्रापि यथासम्भवमनुगमाश्चिन्त्यः। उपस्थित्यनियमेन व्यवस्थितविकल्पाभिप्रायेणाह यद्वेति। वृत्तिमत्त्व इत्यसंकीर्णस्थलकथनाय। प्रतिबन्धकतावच्छेदकं तु विशेष्यभागमात्रम्। अनुमितिव्यतिरेकेत्यादि प्रकृत्यर्थमात्रविवरणम्।

व्याप्त्यनुलम्भस्य तु कारणाभावत्वेन स्वरूपदोषत्वात् । अत एव व्यभिचारसंदेहस्य विपक्षव्यावृत्त्यपरिच्छेदोपजीवित्वेन संदिग्धानैकान्तोऽपि न पृथक् दूषणम् । पक्षैकदेशवृत्तिरनध्यवसि-

---

न्यायलीलावतीकण्ठाभरणम्

तेनेति । नन्वसिद्धिरपि कथं दोष इत्यत आह अनुपलम्भस्य त्विति । प्रतिबन्धानुपलम्भस्येत्यर्थः । अतएवेति । कारणविरहोपजीविकत्वादेवेति, विपक्षव्यावृत्तिज्ञानमनुमितिकारणं सन्दिग्धानैकान्तिकं च तद्विघटनद्वाराऽनुमितिप्रतिबन्धकमित्यर्थः । पक्षैकेति । सति सपक्षे सपक्षाद्व्या-

न्यायलीलावतीप्रकाशः

साधनं यथा पक्षताविघटनद्वारा दूषकं न स्वत इत्यर्थः । तेनोपाधिनेत्यर्थः । अतोऽसिद्धावन्तर्भाव इति भावः । कारणाभावत्वेनेति । अनुमितिकारणव्याप्तिज्ञानाभावत्वेनेत्यर्थः । नन्वेवं सन्दिग्धानैकान्तिकमपि व्यभिचारात् पृथक् दूषणं स्यात्, नहि तत्रानैकान्तिकमेव दूषणं विपक्षवृत्तित्वेनानिश्चितत्वादित्यत आह अतएवेति । अनुमितिकारणविपक्षव्यावृत्तिनिश्चयविरहोपजीवकत्वादसिद्ध एव तस्यान्तर्भाव इत्यर्थः । पक्षैकेति । सर्वसपक्षविपक्षव्यावृत्त इत्यर्थः । अनैकान्तिकस्य संशयफलकहेत्वाभासत्वादसाधारणधर्मस्यानध्यवसायज्ञानजनकत्वादिति भावः । ननु सपक्षत्वं न साध्यवन्मात्रत्वं विपक्षावृत्तेर्वृत्तिमतः साध्यवद्वृत्तित्वनियमात्, नापि पक्षान्यसाध्यवत्त्वं शब्दोऽनित्यः शब्दत्वादित्यत्र व्याप्तिग्रहदशायां सद्धेतावतिव्याप्तेः । मैवम् । सर्वनिश्चितसाध्यवद्विपक्षव्यावृत्तस्यासाधारणतयाऽनध्यवसितत्वात्, शब्दत्वाऽनित्यत्वव्याप्तिग्रहदशायां शब्दे साध्यनिश्चया-

न्यायलीलावतीप्रकाशविवृतिः

व्याप्तिज्ञानकारणाभावत्वभ्रमनिरासायाह अनुमितिकारणेति । तस्यान्तर्भाव इति । इदं च समाधिसौकर्यात् । वस्तुतः साध्यवदन्यत्वांशनिश्चयीभूतसाध्यवदन्यवृत्तित्वज्ञानं तत्राव्यविकलमेवेति ध्येयम् । व्यतिरेके हेतोरतिव्याप्तिभयेन व्याचष्टे सर्वसपक्षेति । व्यभिचारिणोऽभेदमाशङ्क्याह अनैकान्तिकस्येति । एतन्मते संशयानध्यवसाययोर्भेदादिति भावः । शब्दत्वानित्यत्वेति । व्यतिरेकव्याप्तिग्रहदशायां यद्यपि न सा-

तः। न चात्र प्रतिबन्धासिद्धिः, व्यभिचारिवद्व्यतिरेकसाहचर्यप्र-
तीतिनियममादर्शयति तदनुद्भावनात्। न च व्यभिचार एव, सप-
क्षविपक्षयोरप्रमितेरेवानध्यवसायहेतुत्वेन शबलदूषणतया विल-

न्यायलीलावतीकण्ठाभरणम्

वृत्तो धर्म इत्यर्थः। ननु तत्रापि व्याप्यत्वासिद्धिरेव दोषो न त्वन-
ध्यवसित इत्यत आह नचेति। तत्रापि वादिनोदाहरणावयवेन व्य-
तिरेकव्याप्तिरुपदर्शितैवेति व्याप्यत्वासिद्ध्युद्भावनानवकाशादित्य-
र्थः। सपक्षविपक्षयोरिति लुप्तम्यन्तम्। शबलदूषणत्वं-सपक्षविपक्षो-

न्यायलीलावतीप्रकाशः

न्नातिव्याप्तिः। तत्रापि विवक्षितविवेकेन सर्वसपक्षव्यावृत्तिरेव दो-
षो नतु विपक्षव्यावृत्तिरपि, विरुद्धं च तेनोपाधिनाऽनध्यवसितमेव,
अन्यथैतदवगमे विरुद्धत्वाज्ञाने हेत्वाभासान्तरतापत्तेः। ननु व्या-
प्त्यप्रमितेरस्यासिद्धावेवान्तर्भावः स्यादित्यत आह नचेति। व्यभिचारि-
वदिति। यथाऽनैकान्तिके सत्यप्यसिद्धिर्नोद्भावनार्हा, तथाऽनध्यवसि-
तेऽपि व्यतिरेकयोः सपक्षविपक्षव्यावृत्तत्वयोः पक्षे या साहचर्यप्र-
तीतिस्तन्नियममादर्शयति वादिनि तदनुद्भावनात् असिद्धेरनुद्भाव-
नात्, नहि यत्र सपक्षविपक्षव्यावृत्तिरुद्भाव्यते तत्रासिद्धिरुद्भावना-
र्हेत्यर्थः। सपक्षेति। सपक्षविपक्षवृत्तित्वज्ञाने सत्येवानैकान्तिकत्वज्ञा-

न्यायलीलावतीप्रकाशविवृतिः

ध्यवसानिश्चयो हेत्वधिकरणे, तथापि विरोधिव्याप्तिग्राहकसामग्र्या
प्रतिबद्धव्याप्तिकत्वमेव तल्लक्षणम्। अत एव विरोधिव्याप्तिग्राहक-
शब्दस्थलेऽप्यसाधारण्यम्। यदि चासाधारणव्यतिरेकव्याप्तिद्वयग्रह-
स्तदा विरोधिव्याप्तिद्वयग्रहविषयत्वं लक्षणम्। नचैवं सत्प्रतिपक्षा-
न्तर्भावादेतन्मतेऽसिद्धान्तर्भावः। तत्र पक्षधर्मताविषयत्वेनापि प्रति-
बन्धकत्वादत्र तु व्याप्तिमात्रविषयतया तथात्वात्, पक्षधर्मताया उ-
भयसाधारणत्वात्, तदुक्तं चिन्तामणौ 'अत्र त्वेक एवेति ततो भेद' इति।
नतु विपक्षव्यावृत्तिरपीति। तस्या व्यतिरेकव्याप्तिग्राहकतयाऽनुमानत्वादिति
भावः। व्यतिरेकव्याप्तिमादर्शयतीत्यर्थेऽसङ्गतिस्तत्प्रदर्शनेऽपि तदु-
द्भावनाविरोधादत आह व्यतिरेकयोरिति। सपक्षव्यावृत्तत्वयोरिति स-

म्बितप्रतीतिकस्य व्यभिचारस्यानुद्भावनात् ॥ इति हेत्वाभासाः ॥

स्मृतिरपि मानान्तरमेव, अर्थनिश्चयहेतुत्वात् । अनुभवपारतन्त्र्यान्नैवमिति चेत् । न । उत्पत्तिपारतन्त्र्यस्य प्रमाणान्तरसाम्यात्, फलाभावेन ज्ञप्तिपारतन्त्र्याभावात् । इच्छावद्विषये

न्यायलीलावतीकण्ठाभरणम्

भयनिरूप्यत्वम् ।

मानान्तरं मित्यन्तरमित्यर्थः । अर्थनिश्चयहेतुत्वात्-अर्थपरिच्छेदात्मकत्वात् । नैवमिति(१) । न मानान्तरमित्यर्थः । उत्पत्तीति । अनुमित्यादीनामपि लिङ्गपरामर्षादितन्त्रत्वात् । ननु स्मृतिः फले जनयितव्ये प्रमाणान्तरमपेक्षत इति नेयं मानान्तरमत आह फलाभावेनेति । ननु विषयलाभ एवास्याः पूर्वानुभवाधीन इत्येव पारतन्त्र्यमत आह इच्छावदिति । स्वभावत एव चेदियं सविषया न स्यात्तदा ज्ञानमेव न

न्यायलीलावतीप्रकाशः

नादित्यर्थः । ननु पक्षस्य साध्यतदभावान्यतरवत्त्वनियमेन तत्रोभयोरपि सम्भावनायां व्यभिचारशङ्कावतार एव तत्र दोषः स्यादित्यत आह अनध्यवसायेति । अनध्यवसायानन्तरं पश्चाद्व्यभिचारो गम्यत इति व्यभिचारस्याप्यनध्यवसितमेवोपजीव्यमिति तदेव स्वतो दूषणं तत्रोद्भाव्यं न तूपजीवको व्यभिचार इत्यर्थः । विलम्बप्रतीतिकत्वे हेतुः शबलेति । शबलदूषणत्वं सपक्षविपक्षोभयनिरूप्यत्वमित्यर्थः ।

मानान्तरमिति । प्रमित्यन्तरमित्यर्थः । ननु मानान्तरसापेक्षज्ञानजनकत्वान्न स्मृतिर्मानान्तरमित्यत आह फलाभावेनेति । ज्ञानजनकत्वाभावेनेत्यर्थः । नन्विच्छाप्रयत्नयोरिव स्मृतेर्विषयं प्रति नियमे स्वज-

न्यायलीलावतीप्रकाशविवृतिः

त्मा । शबलेति । अनध्यवसायः पक्षमात्रनिरूप्यो व्यभिचारस्तु सपक्षविपक्षोभयनिरूप्य इति विलम्बितप्रतीतिक इत्यर्थः । एवं च मूले विलम्बितप्रतीतिकस्येत्यन्तरं चकारोऽध्याहार्य इति भावः ।

तज्जन्यप्रमाविरहेण मानान्तरत्वमसम्भवतीति व्याचष्टे प्रमित्यन्तरमिति । यद्यप्येवं स्वार्थनिश्चयहेतुत्वादितिमूलासङ्गतिस्तथापि स्वा-

(१) अत्रमूले-नैवम् उत्पत्तीति-पाठो मिश्राभिमतः पठनीयः ।

परापेक्षायां ज्ञानत्वव्याघातः। अनधिकपरिच्छेदस्य गृहीतानुभवसाधारण्यात्। कारणज्ञानप्रामाण्यापेक्षया यथार्थत्वस्यानुमितिसाधारण्यात्। स्वविषयज्ञानप्रामाण्यापेक्षत्वस्य शब्दसाधारण्यात्। अधिकपरिच्छेदे च प्रमाणत्वात्, अन्यथा तद्व्यवस्थानुपपत्तेः। तत्तावच्छिन्नं हि स्मृतिरर्थमाकलयति, सा च यदि

न्यायलीलावतीकण्ठाभरणम्

स्यादित्यर्थः। ननु गृहीतमात्रगोचरत्वान्नेयं प्रतीतिरित्यत आह अनधिकेति। एवंसति धारावगाहिधियामपि प्रमितित्वं न स्यादित्यर्थः। नन्वनुमितिः पूर्वानुभवस्य भिन्नविषयस्य प्रामाण्यमपेक्षते स्मृतिस्तु स्वसमानविषयकस्यैव स्वजनकानुभवस्येति वैषम्यमत आह स्वविषयेति। शाब्दज्ञानस्यापि समानविषयकस्यैव वक्तृज्ञानस्य प्रामाण्यमपेक्षते इति तदपि प्रमा न स्यादित्यर्थः। स्मृतेः प्रमात्वे युक्त्यन्तरमाह अधिकेति। अधिकं तत्ताभागः, एतदेव स्फुटयति-तत्तेति।

न्यायलीलावतीप्रकाशः

नकानुभवापेक्षणान्न तथेत्यत आह इच्छादिवदिति। अनधिकेति। पूर्वानुभवविषयविषयकत्वेनाप्रमात्वे धारावाहिकज्ञानप्रामाण्यापेक्षणात्तथाऽनुमितौ च भिन्नविषयकतादृशज्ञानापेक्षणान्न तथेत्यत आह स्वविषयेति। शब्देऽपि स्वप्रयोगहेतुसंसर्गज्ञानप्रामाण्यापेक्षणादित्यर्थः। स्मृतेर्मानान्तरत्वे युक्त्यन्तरमाह अधिकेति। अन्यथेति। यदि स्मृतिः प्रमा न स्यात्तदा तत्तावच्छेदस्तत्र न भासेतेत्यर्थः। तदेव व्युत्पादयति तत्तावच्छिन्नमिति। स्मृतेः पूर्वानुभवमात्रविषयविषयकत्वेऽनुभवा-

न्यायलीलावतीप्रकाशविवृतिः

र्थनिश्चयात्मकत्वादित्येव तदर्थ इति भावः। ज्ञानजनकत्वेति। यदि चानुव्यवसायजनकत्वेन तथात्वं तदा प्रामाणान्तरसाधारण्यमिति भावः। स्मृतेर्मानान्तरत्व इति। जनकीभूतमानविषयकसमानाधिकरणज्ञानप्रामाण्याधीनसामान्यकत्वमप्रमितित्वव्यवहारप्रयोजकमिति पूर्वत्रारुच्येति शेषः। तत्तावच्छेदस्तत्रेति। यद्यप्यप्रमात्वेऽपि भानमविरुद्धमेव, तथापि तत्तावच्छेदोऽनुभवे न भासत एव स्मृतिश्च त्वन्मतेऽप्रमैवेति स

पूर्वानुभवस्यापि गोचरः, तदा तत्रापि तदित्युल्लेखः स्यात् , न च क्वचिदिदमिति स्यात् । न चेत्, स्मृतिरेव तत्रानपेक्षेति मानम् ।

तत्ता च न ज्ञातता । ज्ञातोऽयं सोऽयमित्यनयोरविशिष्ट विषयतापत्तेः। नाप्यतिवृत्तानुभवविशिष्टता, तस्याः पूर्वानुभ(१)-वेनानुल्लेखात् । स्मृतिबलादेव तत्कल्पनेति चेत् । न । अननुभूत एव स्मृतिस्तत्तांश इति कल्पनापत्तेः । नापि पूर्वकालवि

न्यायलीलावतीकण्ठाभरणम्

ननु ज्ञाततैव तत्ता, सा च ज्ञातोऽयमित्यनुभवव्यवस्थितैवेत्यत आह तत्ता चेति । स्मृतिबलादिति । स्मृतौ तत्ताभानान्यथानुपपत्त्यैव पूर्वानुभवविशिष्टता तत्ता कल्पनीयेत्यर्थः । यद्वा पूर्वानुभवस्यापि स्वगोचरत्वं कल्पनीयमित्यर्थः । कल्पना चेत्तदेवमेव कल्पना स्यादित्याह अननुभूत इति । इत्यत्रापीति । स्मृतेरप्येवंप्रकारापत्तेरित्यर्थः । अ-

न्यायलीलावतीप्रकाशः

विषयतत्ताविषयकत्वानुपपत्तिरित्यर्थः । तत्रापि पूर्वानुभवेपीत्यर्थः । नचेदिति । तत्ता पूर्वानुभवगोचर इत्यनुषङ्गः । तत्रेति । तत्तायां स्मृतिः पूर्वाऽनुभवानपेक्षेति तत्र प्रमैव स्यादित्यर्थः ।

ननु ज्ञाततैव तत्ता सा च पूर्वानुभवगोचर इति तत्र सापेक्षैव स्मृतिरित्यत आह तत्तेति । तस्या इति । अतीतानुभववैशिष्ट्यानुभवाविषयत्वेन स्मृत्या तदुल्लेखानुपपत्तेरिति भावः । परेणानुभूयत इति ज्ञानेऽपि स इति प्रयोगाभावाच्च । नाप्येतज्जन्मातीतस्वानुभववैशिष्ट्यं, तदवगमेऽपि तत्तासंशयविपर्ययदर्शनात् । अत एवातीतानुभवविषयत्वमेव तत्, तच्चानुभवाविषयेऽपि यदा ज्ञानान्तरेणोल्लिख्यते तदा स घट इति स्मृतिर्नो चेत् प्रमृष्टतत्ता सा इत्यपास्तम् । सहप्रयोगानुपपत्तेश्चेति भावः । स्मृतिबलादेवेति । अनुभूतमात्रविषयत्वात् स्मृतेरनुभवस्य तत्ता विषय इत्यर्थः । अनुनभूत एवेति । तत्तांशेऽननुभूतविषयैव स्मृतिरित्येव किन्न कल्प्यते इत्यर्थः । ननु पूर्वकाल-

न्यायलीलावतीप्रकाशविवृतिः

पारमार्थिक एव न स्यादिति भावः । ननु ज्ञाततैवेति । यद्यप्ययं घट

---

(१) पूर्वमनुल्लेखात्- इति मा० पु० पाठः ।

शिष्टता, पूर्वमासीदयमित्यत्रापि प्राप्तेः। घटमात्रावसायिनी स्मृतिरनुमिततत्तांश इत्यभिलाप इति चेत्। न। तं घटमहं स्मरामीत्यनुव्यवसायानुपपत्तेः। प्रमाव्यवहाराभावादप्रमात्वमिति चेत्। न। लौकिकानां प्रामाणिकानां च सत्यज्ञान एव प्रमाव्यवहारदर्शनात्। स्मृतिर्हि पूर्ववर्त्तमानकालावच्छिन्नमर्थमाकलयति, न च तदिदानीं तादृशमिति श्यामे रक्तताप्रतीतिवदयथार्थेति चेत्। न। तस्य तत्कालावच्छिन्नकालतावभास-

---

न्यायलीलावतीकण्ठाभरणम्

नुमानोपनीतस्तत्ताभागो भासते स्मृताविति पूर्वानुभवविषयतैवास्या काचित्तत्ता स्यादित्याह घटमात्रेति। तं घटमिति। घटविशेषणत्वेन तत्तानुव्यवसीयते पूर्वानुभवस्तु अविद्यमानतया न घटे विशेषणमित्यर्थः। ननु स्मृतिर्यदि प्रमा स्यात्तदा ताद्रूप्येण व्यवह्रियेतेत्याह प्रमेति। सत्यज्ञान एवेति। सत्यज्ञानत्वमेव प्रमाव्यवहारे तन्त्रं तादृशी च स्मृतिरपीत्यर्थः। सत्यत्वमेव स्मृतौ नास्तीत्याह स्मृतिर्हीति। स घट इति तत्कालीनो घट इति स्मृतौ भासते, घटस्यैतत्कालीनतैव इदानीं तत्कालविशिष्टो घट इति स्मृतेर्न विषय इदानींकालस्य

न्यायलीलावतीप्रकाशः

वैशिष्ट्यं तत्ता, तच्च पूर्वानुभवगोचर एवेत्यत आह नापि पूर्वकालेति। प्राप्तेस्तत्तोल्लेखस्येति शेषः। अनागतगोचरस्मृतिप्रत्यभिज्ञयोस्तत्तोल्लेखात् अतीतसमयसम्बन्धावगमेऽपि सोयं नवेति संशयाच्च। एतेनातीतधर्मान्तरवैशिष्ट्यं तत्तेत्यपास्तम्। तं घटमिति। तत्ताविशिष्टघटगोचरस्मृतेरनुभवादित्यर्थः। सत्यज्ञान एवेति। स्मृतिरपि तथेति तत्रापि प्रमाव्यवहारोस्त्येवेत्यर्थः। स्मृतिर्हीति। वर्त्तमानकाले तत्तावच्छिन्नोऽर्थः स्मृतौ भासते, न च स्मृतिकाले सोऽर्थस्तथेति बाधितविषयतया स्मृतिरयथार्थेत्यर्थः। श्याम इति। आमश्यामतादशायां भाविपाकजरागे घटे यथा रक्तोऽयमिति धीरयथार्थेत्यर्थः। तस्येति।

न्यायलीलावतीप्रकाशविवृतिः

इति ज्ञाने ज्ञाततापि न विषयस्तथाप्येतदनन्तरं ज्ञातताागोचरज्ञाने स-

नात् । न च तन्न तत्कालावच्छिन्नम्, तदानीमसत्त्वापत्तेः । नापीदानीं तदवच्छेदमाकलयति, अनवभासात्तस्येदानींकालस्य पूर्वानुभवेन स्मरणायोगात् । मुनीनामव्यवहारादिति चेत् । न । वादिनं प्रति मुनित्वस्यैवासिद्धिरिति । तत्कथं द्वे एव प्रमाणे इति चेत् । अत्रोच्यते । न ह्यत्र सत्यज्ञानत्वं सत्यानुभवत्वं वा प्रामाण्यं साध्यम्, यथाक्रमं सिद्धसाधनबाधयोः सत्त्वात् । नापि प्रमाणशब्दवाच्यत्वम्, अनीश्वरेच्छाप्रयुक्तप्रमाणशब्दाभिधेयत्वे सिद्धसाधनात् । ईश्वरेच्छापरतन्त्रप्रमाणशब्दवाच्यत्वस्य तदभियुक्तपुरुषव्यवहारगम्यत्वात् । प्रमाणाभियुक्तानां चाक्षचरणकणभक्षादीनां स्मृतौ प्रमाणव्यवहाराभावात्, इन्द्रपाणिनिप्रभृति-

---

न्यायलीलावतीकण्ठाभरणम्

पूर्वानुभवागोचरत्वादित्याह तस्येति । स्मृतिविषयस्येत्यर्थः । कथमिति । स्मृतिकरणीभूतस्य तृतीयप्रमाणस्यावश्यं वाच्यत्वादित्यर्थः । निग-

न्यायलीलावतीप्रकाशः

तत्तावच्छेदस्तत्र भासते स च वस्तुगत्या घटे कदाचिदस्त्येवेति तद्विषया स्मृतिर्यथार्थैव, इदानीमयं रक्त इति प्रतीतेराकार एव नेति भावः । नापीति । इदानींकालं तत्कालत्वेन नाकलयति स्मृतिरिति शेषः । अनवभासात्तस्येति । इदानींकालविशिष्टत्वेनाननुभूतस्येदानीं स्मृत्ययोगादित्यर्थः । प्रमाणशब्दवाच्यत्वमाधुनिकसङ्केतविषयतया ईश्वरसङ्केतविषयतया वा ? आद्ये अनीश्वरेति । अन्त्ये ईश्वरेच्छेति । त-

न्यायलीलावतीप्रकाशविवृतिः

त्येव तत्ता भासतेऽन्यथा तु प्रमुष्टतत्तांशैव स्मृतिरिति भावः । अनुभवस्य तत्ता विषय इति तत्कल्पनमिति मूलस्य चानुभवे तत्ताविषयकत्वकल्पनमित्यर्थ इति भावः । आकार एव नेति । रक्तो घट इति प्रत्ययस्य न तथाकार इत्यर्थः । इदानींकालं तत्कालत्वेनेति । इदमुपलक्षणम्, तत्कालमिदानींकालत्वेन तत्कालस्येदानींकालावच्छिन्नत्वं चेत्यपि मूलार्थो द्रष्टव्यः । इदानींकालेति । इदानींकालस्याननुभूतस्य स्मृत्ययो-

व्यवहारात् वाचकतानियमवत् पूर्वानुभवापेक्षतयैव वा विषय-प्रतिनियमात्, इच्छादिवत्। न चैवमज्ञानत्वापत्तिः, अर्थस्व-भावप्रत्यासत्तेरविरोधात्। न हि ज्ञानस्यार्थे(न) प्रत्यासत्त्यन्तरम-स्ति।। न चेच्छाया अपि ज्ञानत्वम्, इच्छात्वस्यानुभवसिद्ध-

---

न्यायलीलावतीकण्ठाभरणम्

द्व्याख्यातमितरत्। स्मृतेरप्रमात्वे युक्त्यन्तरमाह पूर्वेति।। स्मृतिर्न प्रमितिर्विषयसम्बन्धे परतन्त्रत्वादिच्छावदित्यर्थः। तर्हीच्छावदेवा-स्यार्थज्ञानत्वमपि साध्यमित्यत आह अर्थेति। अर्थस्वभावप्रत्यासत्ति-शून्यत्वमत्रोपाधिरित्याह अर्थेति। नचेति। स्वभावप्रत्यासत्तेस्तत्रापि सत्त्वादित्यर्थः। यद्यपि तत्र ज्ञानं प्रत्यासत्तिः स्मृतौ चानुभवस्य चि-रातीतत्वेन न प्रत्यासत्तित्वं तथापि विलक्षणमनुभवविशेषमाह इच्छात्वस्येति। इच्छात्वेनैव ज्ञानवैधर्म्यविषयप्रवणत्वं ज्ञानत्वं व्यभि-चार्यैवेत्यर्थः। यद्यन्याधीना विषयप्रवणता स्मृतेरिति स्मृतिर्ज्ञानं

न्यायलीलावतीप्रकाशः

दभियुक्ताः-अक्षचरणादयः। स्मृतेरप्रमात्वे युक्त्यन्तरमाह पूर्वानुभवे-ति। स्मृतेः पूर्वानुभवेन सहैकविषयत्वनियमादित्यर्थः। तथा च स्मृतित्वं न प्रमावृत्ति कारणीभूतज्ञानविषयविषयकमात्रवृत्तिजाति-त्वात् इच्छात्ववदिति भावः। नचैवमिति। पूर्वानुभवापेक्षविषयप्रति-नियमे सतीत्यर्थः। नन्विच्छाया अप्यर्थेन प्रत्यासत्त्यन्तराभावात् स्वभावप्रत्यासत्तिरस्तीति सापि ज्ञानं स्यादित्यत आह न चेच्छाया इति। इच्छायाः इच्छामीत्यबाधितानुभवान्न जानामीत्यतोऽर्थप्रत्यास-त्तिसत्त्वेऽपि न ज्ञानत्वमत इच्छायत्नान्यत्वे सत्यर्थप्रवणत्वस्य ज्ञान लक्षणत्वात् तच्च स्मृतावप्यस्तीत्यर्थः। ननु प्रमाणान्तराधीनविषय-

न्यायलीलावतीप्रकाशविवृतिः

गादित्यपि द्रष्टव्यम्। तदभियुक्ता इन्द्रपाणिन्यादय इति क्वचित्पाठः। स चातद्गुणसंविज्ञानबहुव्रीहिणा अक्षचरणादिपरस्तेनोत्तरमूलाविरोधः। वाचकतानियमवदिति मूले पदान्तरस्येति शेषः। नन्वेवमिच्छात्व-स्वीकारेऽपि न ज्ञानत्वव्यतिरेक इत्यत आह न जानामीति। एवं स-त्यर्थप्रवणत्वं ज्ञानलक्षणमतिप्रसक्तमेवेत्यत आह अत इच्छेति। एवं

त्वेन विषयप्रवणताया ज्ञानत्वव्यभिचारात् । न चैवमध्यक्षादौ, अध्यक्षस्येन्द्रियसन्निधानाद्विषयनियमात् । लिङ्गस्य स्वविषयप्रतिबन्धेन वाक्यस्याकाङ्क्षायोग्यतादिना आभासस्यापि दोषहेतुत्वादिति । तत्ता चातीतज्ञानवैशिष्ट्यमतीतसमयावच्छेदो वा, स चानुभवोत्तरकालमवभासत एव । नच तादित्युल्लेखः ।

न्यायलीलावतीकण्ठाभरणम्

न स्यात्, तदा विशिष्टज्ञानमात्रे ज्ञानत्वनिवृत्तिः विशिष्टज्ञानानां सर्वेषामपि परापेक्षयैव सविषयत्वादित्याह नचैवमिति । परापेक्षामेवाह अध्यक्षस्येति । पूर्वं दोषं परिहरन्नाह—स चेति । स चेत्युभयस्यापि परामर्शः, तथाच यत्रानुभवोऽनुव्यवसीयते यत्र वा अतीतसमयावच्छेदो ज्ञानान्तरेण गृह्यते तत्रैव स्मृतौ तत्तोल्लेखः, यत्र तु तथा न, न तत्र अदुष्टतत्तांशा स्मृतिरित्यर्थः। नन्वेवं पूर्वानुभवविशिष्टो घटोऽनुभूतो ज्ञातो वा घट इत्यत्रापि तत्तोल्लेखः स्यादित्यत आह नच तदि·

न्यायलीलावतीप्रकाशः

प्रतिनियमे विशिष्टज्ञानान्तरेऽपि प्रमात्वं न स्यादित्यत आह नचैवमिति । तत्तल्लक्षणे पूर्वानुपपत्तिं परिहरति स चेति । अनुभवानन्तरं ज्ञानान्तरेणातीतज्ञानादिवैशिष्ट्यं यत्र भासते तत्रैव स्मृतौ तत्तोल्लेखो नान्यथा, तथाचानुभूततत्तागोचरैव स्मृतिरित्यर्थः । नन्वेवं द्वितीयानुभवे तदित्युल्लेखः स्यादित्यत्र आह न च तदितीति । नन्वेवमतीतधर्मवैशिष्ट्यानुमितौ तत्तोल्लेखापत्तिः, अतीतज्ञानवैशिष्ट्यं यदि तत्ता, तदा चाक्षुषि न स्यात् । अथ तत्तेदन्ते स्मृत्यनुभवभासिन्यौ अखण्ड एवोपाधी क्लृप्तधर्मातिरेकिणौ, एवंचेदन्तासंस्कारेणेदन्तैव तत्तया स्मर्यते । न च तत्तायाः क्वचिदप्यनारोपे कथमारोप इति वाच्यम् । प्र·

न्यायलीलावतीप्रकाशविवृतिः

धर्मेऽज्ञानसमयवैशिष्ट्यरूपजात्यादिव्याप्तितया जातित्वं न सम्भवतीत्यत आह उपाधीति । एवञ्चेदन्तेति । तत्तात्वस्य प्रत्यभिज्ञाने अनुभूतत्वात् पूर्वानुभूता इदन्तैव तत्तात्वेन स्मरणविषय इति कल्प्यते, तत्तात्वं च यद्यपि न जनकीभूतानुभवविषयस्तथापि दोषवशादेव भासते, दोषश्च संस्कार एव उपनायकश्चापूर्वानुभवजन्यसंस्कार एवेति भावः ।

सर्वपर्यायावच्छेदस्य नियमेनानाकलनात् । अनुभूतदिवसादि-

न्यायलीलावतीप्रकाशः

त्यभिज्ञायां तत्तांशे यथार्थत्वात्, इदन्तानुल्लेख्यनुभवप्रभवस्मृतावपि धर्मान्तरमेव तत्तया भासते, अत एवायं घट इति न स्मरणमतः सर्वा स्मृतिरयथार्थेति । तन्न । स्मृतेः पूर्वमिदन्तोपस्थितिं विना तत्तारोपासंभवात् । उच्यते । अनुभवे कालो धर्मान्तरं वा प्रमाणत्वेन यो विषयः स एव स्मृतेः, स्मृत्यनुभवयोरेकविषयत्वेऽपि तत्र स्मृतौ तच्छब्दप्रयोगः संस्कारजज्ञानस्यैव तच्छब्दप्रयोगहेतुत्वात् । अत एव प्रत्यभिज्ञायां तच्छब्दप्रयोगः, प्रत्यक्षानुभवे च तत्रैवेदंशब्दप्रयोगः, न तु विषयकृतः स्मृत्यनुभवयोर्विशेषः, अत एवायं घट इत्यनुभवादयं घट इति न स्मृतिः, स घट इति स्मृतिकारणं, स घट इति नानुभवः । अन्ये तु अतीतधर्मवैशिष्ट्यं तत्तासजातीतो धर्मः क्वचित् ज्ञानं क्वचिदतीतः समय एव अतीतधर्मविशिष्टः, स इति सहप्रयोगश्च धर्मविशेषमादाय द्रष्टव्य इत्याहुः । सर्वपर्यायेति । न च प्रत्यभिज्ञानभिन्ना·

न्यायलीलावतीप्रकाशविवृतिः

नन्वेवं यत्र घट इत्येव स्मरणं तत्र कथं तत्ताविशिष्टस्मरणमित्यत आह इदन्तानुल्लेखीति । सर्वा स्मृतिरिति । प्रमुष्टतत्तांशा च स्मृतिरसिद्धैवेति भावः । स्मृतेरिति । आरोपविषयज्ञानस्यारोपहेतुत्वादिति भावः । संस्कारजज्ञानस्यैवेति । न च यन्मते प्रत्यभिज्ञा स्मृतिजन्यैव तन्मते प्रत्यभिज्ञायामव्यापकमिदम्, प्रयोजकत्वविवक्षायां तु रजतस्मृतिजन्यरजतभ्रमातिव्यापकमिति वाच्यम् । तत्रैतस्य सत्त्वेऽपि प्रमुष्टतत्ताकस्मरण इव दोषादेव तत्तानुल्लेखात् । केचित्तु यज्जातीयं संस्कारप्रयोज्यं तत्र तत्तोल्लेखः, भ्रमजातीयं तु न तथा अनुभूयमानारोपे व्यभिचारादिति वदन्ति । अयं घट इति इदंशब्दोल्लेखिनी न स्मृतिरित्यर्थः । स घट इति न तच्छब्दोल्लेख्यनुभव इत्यर्थः। क्वचिज्ज्ञानमिति । नच चाक्षुषत्वानुपपत्तिरुपनीतस्य तथात्वाविरोधात्, अनुमितौ च संस्काराजन्यत्वादेव न तदुल्लेखः पूर्वकल्पवदिति भावः । धर्मविशेषमादायेति । कश्चनातीतधर्मपदेन कश्चन तत्पदेन तत्रोच्यते इति भावः । इदन्तातत्तयोरभेदे प्रतिकूलतर्कमाह न च प्रत्यभिज्ञानभिन्नेति । प्रत्यभिज्ञानस्मृतिवृत्तितयेष्टापत्तिनिरासाय भिन्नान्तापन्नानुभवत्वगर्भा ।

रूपकालभेदो वा स्मृतिगोचरः । तस्य च वृत्ततामिदानीमन्यतोऽनुसंधाय तदिति तद्वाचकोल्लेखी व्यवहार इति । इति स्मृतिः ॥

आर्षं च ज्ञानं ऋषीणाम्, कन्यायाश्च यथा श्वो मे भ्राता आगन्तेति । न चैतदध्यक्षम्, कारणाभावात् । न च मनस्तथा । तस्य बहिरप्रवृत्तेः, अनुमानविलयाच्च । न चैतन्नयनस्पन्दादिलिङ्गकम्, तेषां व्यभिचारात । न च धूमादिवदवान्तरजा-

न्यायलीलावतीकण्ठाभरणम्

ति । केचित्तु नन्वेवं द्वितीयानुभवे तत्तोल्लेखः स्यादित्यतोषमाहुः ।

चतुर्थीं विद्यामाह आर्षमिति । कारणाभावादिति । इन्द्रियसन्निकर्षाभावादित्यर्थः । अनुमानेति । अनुमितिरप्येवं मानसी स्यादित्यर्थः । ननु नयनस्पन्दमात्रस्य व्यभिचारेऽपि तद्विशेषो लिङ्गं भवेदित्यत आह नचेति । ननु यस्यां कोटौ भूयः सहचारस्तन्मात्रकोटिकः संशय एवायं

न्यायलीलावतीप्रकाशः

नुभवत्वं यदि तत्ताविषयकवृत्ति स्यात्तत्ताप्रयोगजनकवृत्ति स्यादिति वाच्यम् । संस्कारजन्यवृत्तित्व(१)स्योपाधित्वात् । तस्य चेति । अतीतदिवसाद्यवच्छेदस्येत्यर्थः । अन्यत इति । तत्तानुमितौ हि सत्यां या स्मृतिर्जायते तस्य तत्तानुव्यवसायो न सर्वत्रेत्यर्थः ।

कारणेति । इन्द्रियसन्निकर्षाद्यभावादित्यर्थः । तथा कारणमित्यर्थः । बहिरिति । निरपेक्षस्य बहिर्विषयकज्ञानाजनकत्वादित्यर्थः । अनुमानेति । अनुमितेरपि मानसाध्यक्षरूपतया तद्भिन्नत्वानुपपत्तेरित्यर्थः । अवान्तरेति । व्यभिचारिव्यावृत्तं नेत्रप्रस्पन्दादिवृत्तीत्यर्थः ।

न्यायलीलावतीप्रकाशविवृतिः

नच प्रयोगजनकत्वं फलोपाधानमेव वाच्यमन्यथेष्टापत्तिरिति शब्दप्रयोगाजनकस्मृतिविशेषमात्रधर्मे व्यभिचार इति वाच्यम् । शब्दप्रयोगजनकत्वेनापादकविशेषणात् । संस्कारजत्वस्येति । तथाच विषयसाम्यमप्रयोजकं कारणविशेषजन्यत्वस्य प्रयोजकत्वादिति भावः । अनुमिताविति । तत्र च संस्काराजन्यत्वादेव न तत्तोल्लेख इति भावः । तत्तानुव्यवसायः—तत्तोल्लेखः ।

(१) अत्र विवृत्तिकारमतेन संस्कारजत्वस्येति पाठो बोध्यः ।

तिभेदावलम्बनम्, तदप्रतिसन्धानेऽपि जायमानत्वात्। न चैतत्संभावनात्मकम्, कोटिद्वयानुल्लेखात्। न च भूयःसहचरितधर्मदर्शनजन्मैष न्यूनैककोटिः संशयः, आगमिष्यत्येवेति निश्चयाकारेण जायमानत्वात् अनुमानवत्, अन्यथा तस्याप्येवंविधसंशयतापत्तेः। यथा वा स्वेच्छास्मृतपदार्थसार्थे भवति शालिवाहनो नृपतिरिदानीं शृङ्गारसरसीतीरे देव्या लीलावत्या सह ललितमधुरं सङ्गीतकमनुतिष्ठतीति ज्ञानम्। न चैष विपर्ययः, संवादात्। नन्विदमपरोक्षत्वेऽध्यक्षमन्यथानुमानमिति चेन्न। परोक्षत्वेऽपि लिङ्गानपेक्षत्वात्(१)। लिङ्गानपेक्षमपि अनुमानमिन्द्रियानपेक्षपारमेश्वरप्रत्यक्षवदिति चेन्न। अपरोक्षत्वस्य प्रत्य

न्यायलीलावतीकण्ठाभरणम्

स्यादित्यत आह नच भूय इति। कालविप्रकर्षेणार्षमुदाहृत्य देशविप्रकर्षेण उदाहरति यथावेति। नन्विदमिति। परोक्षत्वापरोक्षात्वाभ्यां प्रकारासम्भवादित्यर्थः। अपरोक्षत्वस्येति। साक्षात्त्वमपरोक्षत्वं तदस्मदादीनामिन्द्रियजन्यत्वव्यङ्ग्यमीश्वरज्ञाने च धर्मिग्राहकमानसिद्धमित्यर्थः।

न्यायलीलावतीप्रकाशः

न च भूय इति। भूयसा एककोटिरूपेण स्थाणुत्वादिना सहचरितो धर्मः ऊर्ध्वत्वादिस्तज्ज्ञानजन्यत्वेन न्यूनैककोटिक एवायं संशय इति नेत्यर्थः। आर्षज्ञानोदाहरणान्तरमाह यथावेति। अन्यथा परोक्षत्व इत्यर्थः। लिङ्गानपेक्षणादिति। अनुमितेश्च लिङ्गज्ञानजन्यत्वादित्यर्थः। अपरोक्षत्वस्येति। अपरोक्षत्वं नेन्द्रियजन्यत्वं, येनेश्वरप्रत्यक्षाव्याप्तिरपि तु जातिविशेषः, स चेश्वरज्ञाने धर्मिग्राहकमानसिद्ध इत्यर्थः। ननु प-

न्यायलीलावतीप्रकाशविवृतिः

भूयसेति। स्थाणुत्वादिना भूयःसहचरितो यो धर्म ऊर्ध्वत्वादिस्तज्ज्ञानाद्यथोत्कटकोटिकः संशयस्तद्वदयमपि न्यूनैककोटिक इत्यर्थः।

(१) नपेक्षणादिति प्रकाशाभिमतः पाठः।

क्षत्वात् । नच(१) परोक्षत्वमनुमानत्वम्, शब्दादेरुच्छेदापत्तेः । अपरोक्षमेव चार्षज्ञानम्, न तु तत् प्रत्यक्षम्, अनिन्द्रियकरणकत्वात् । न चेश्वरज्ञानस्य प्रत्यक्षप्रमात्वविरोधः, प्रत्यक्षप्रमातुल्यतयाऽपरोक्षत्वेन तत्र प्रत्यक्षव्यवहारात् । आर्षेऽपि तत एव

न्यायलीलावतीकण्ठाभरणम्

शब्दादेरिति । त्वन्मत इति शेषः । अपरोक्षत्वेऽपि न तत्प्रत्यक्षत्वमित्याह अपरोक्षमेवेति । प्रत्यक्षप्रमातुल्यता लिङ्गाद्यजन्यत्वं, तर्हि लिङ्गाद्यजन्यत्वेनार्षमपि प्रत्यक्षत्वेन व्यवह्रियतामित्यत आह आर्षेपीति ।

न्यायलीलावतोप्रकाशः

रोक्षत्वेनानुमानान्तर्भावोऽपि भवत्वित्यत आह नच परोक्षत्वमिति । शब्दादेरिति । त्वन्मते इति शेषः । अतद्गुणसंविज्ञानबहुव्रीहिणा स्मृत्यादिर्विवक्षित इत्यन्ये । परोक्षत्वापरोक्षत्वे विहाय तृतीयकोटेरभावादार्षज्ञानं क्वान्तर्भवतीत्यपेक्षायामाह अपरोक्षमेवेति । अपरोक्षत्वं जातिः, सा चार्षप्रत्यक्षे वर्त्तत इत्यर्थः । तर्हि प्रत्यक्षमेव तदस्त्वित्यत आह नत्विति । प्रत्यक्षत्वव्यञ्जकेन्द्रियकरणकत्वाभावादित्यर्थः । प्रत्यक्षप्रमातुल्यतयेत्यभ्युपगमवादः । वस्तुतस्तु तदपि प्रत्यक्षम् । प्रत्यक्षत्वं हि जातिः क्वचिच्चक्षुःकरणकत्वादिव्यंग्या, क्वचिद्धर्मिग्राहकमानासिद्धा अननुगतस्य सास्नादेरिव व्यञ्जकत्वाविरोधात्, प्रत्युताऽनुगतस्य व्यञ्जकत्वे जातिरेव न सिध्येत् तत एव तदर्थसिद्धेः । आर्षस्योदाहरणं यथा पाणौ पञ्चवराटकान् पिधाय कश्चित्कंचित्पृच्छति कति वराटका इति । पृष्टश्चाजाकृपाणीयन्यायेन ब्रवीति पञ्चेति । तस्य यथार्थत्वेऽपि प्रत्यक्षादावनन्तर्भावात् । एवं सति द्वे एव माने इति वैशेषि-

न्यायलीलावतीप्रकाशविवृतिः

अतद्गुणेत्यादौ स्मृत्यादीत्यादिपदेनानुमानाभाससङ्ग्रहः, प्रमाणापरत्वादनुमानपदस्येति ध्येयम् । क्वान्तर्भवतीति । यद्यपि परोक्षेऽपीत्यादिना परोक्षाभावदर्शनान्नेयमाशङ्का, तथापि मतान्तरमाहेत्यत्र तात्पर्यमत एव वाशब्दोऽपि सङ्गच्छते । वस्तुतस्तदपीति । नचैवमीश्वरज्ञानवदार्षेऽपि प्रत्यक्षत्वं जातिरस्त्विति वाच्यम् । इन्द्रियकरणकत्वस्य धर्मि-

---

(१) ननु इति प्रा० पु० पाठः ।

प्रत्यक्षव्यवहारोपपत्ति(१)रिति चेत्। न, सतो ह्युपचारस्य निमित्त-कल्पनम्, नतूपचारनिमित्ते सति सर्वत्रोपचारप्रवृत्तिः। आर्षस्य प्रमाणान्तरत्वे प्रत्यक्षानुमाने एव प्रमाणमिति त्ववधारणं लौकिकप्रमाणापेक्षयेति सर्वं(२) सुस्थम्। इत्यार्षम्॥ इति बुद्धिः॥

ननु गुरुत्वं न (३)तावत्प्रत्यक्षम्, ऊर्ध्वदेशकरस्पर्शेना-

न्यायलीलावतीकण्ठाभरणम्

ईश्वरज्ञाने प्रत्यक्षत्वेनोपचारोऽस्ति तत्र च लिङ्गाद्यजन्यत्वं निमित्तं कल्पयितुमुचितम्, आर्षे तूपचार एव नास्तीत्यर्थः। एवंसति विभागं समर्थयति आर्षस्येति। लौकिकप्रमाणापेक्षयेत्यर्थ इति। इदमुत्प्रेक्षासहकृतमनोजन्ययोगजधर्मानुगृहीतमनोजन्ययोगिज्ञानवदलौकिकज्ञानमित्यर्थः। एवं मुद्रिते पाणौ काकतालीयसंवादिपञ्चवराटिकादिज्ञानमार्षं वेदितव्यम्।

प्रमाणाभावाद् गुरुत्वमेव नास्तीत्याह न भवेदिति। प्रत्यक्षं स्पार्शनं

न्यायलीलावतीप्रकाशः

कस्मृतिमुपपादयति आर्षस्येति। लौकिकेति। यत्प्रमाणं विषयसम्बन्धं सत् प्रमाजनकं तल्लौकिकम, सम्बन्धश्च क्वचिच्छोढेन्द्रियप्रत्यासत्तिः, क्वचिच्च व्याप्त्यादिः, आर्षन्तु विषयाप्रत्यासन्नमनोजन्यमित्यलौकिकमित्यर्थः।

न प्रत्यक्षमिति। न स्पार्शनप्रत्यक्षमित्यर्थः। इतरेषामसम्भावितत्वा-

न्यायलीलावतीप्रकाशविवृतिः

ग्राहकस्य वा तद्ग्राहकस्याभावात्। षोढेति। इदमुपलक्षणं, सामान्यप्रत्यासत्तिरपि द्रष्टव्या। न च सामान्यप्रत्यासत्त्या लौकिकत्वस्वीकारेऽपसिद्धान्तः, उक्तपरिभाषया तथात्वाविरोधात्। अत एवानुमानस्यापि तथात्वमविरुद्धम्, ज्ञानं तु प्रत्यासत्तिरेतन्मते नास्त्येव, यथावा स्वेच्छास्मृतेत्यादिना तत्स्थाने आर्षप्रमाणाभ्युपगमादिति मन्तव्यम्। इदं च सर्वं योगजधर्मज्ञानयोः प्रत्यासत्तित्वानभ्युपगमे. वस्तुतस्ते अपि प्रत्यासत्ती एव। पाणौ पञ्च वराटकानित्यादिस्थलेऽपि तथैवेति मन्तव्यम्। इति बुद्धिः॥

---

(१) रापत्तिरिति मु० पु० पाठः। (२) पेक्षयेत्यर्थ इति कंठाभिमतः पाठः।
(३) न भवेत् प्रत्यक्षमिति शंकरमिश्रधृतः पाठोऽत्र बोध्यः।

ग्रहात् । अधोदेश(१)स्पर्शात्तद्ग्रहणमिति चेन्न । अवनतिं प्रत्यहेतूनां तृणादीनां अधःस्पर्शेऽपि गुरुत्वाग्रहात्, स्पर्शव्यतिरिक्तस्य च स्पर्शनेन्द्रियप्रत्यक्षगुणस्य चाक्षुषतानियमोपलब्धेः, स्पर्शनेन्द्रियग्राह्यस्य चोद्भूतानुद्भूतस्पर्शप्रत्यक्षतानियमोपलब्धेः । अस्तु तर्हि पतनानुमेयमिति चेन्न । अदृष्टत(२)त्क्षेत्रज्ञसंयोगादेव पतनोपपत्तेः । अदृष्टहेतुकत्वे पतननियमो न स्यादिति चेत् । न । दहनोर्ध्वज्वलनवदुपपत्तेः । अन्यथा तत्राप्युद्गमनहेतोर्लघुत्वस्य कल्पनापत्तेः । अदृष्टहेतुकत्वे उर्ध्वज्वलनवद्यावदाश्रयं पतनमनुवर्तेतेति चेन्न । अदृष्टहेतुपरमाणुकर्मणां यावदा

न्यायलीलावतीकण्ठाभरणम्

वाच्यं तच्चोर्ध्वावच्छेदेन नास्ति नास्त्येवेत्यर्थः । अधोदेशादिति । तथैवानुभवादिति भावः । अवनतिं प्रत्यहेतूनामिति तृणादिगुरुत्वेऽनुमानमपि नास्तीति द्योतनाय । किञ्च यदि गुरुत्वं स्पर्शान्यत्वे सति स्पार्शनप्रत्यक्षं स्यात् गुणजातीयं स्यात चाक्षुषप्रत्यक्षं स्यादित्याह—स्पर्शव्यतिरिक्तेति । तथाच त्वङ्मात्रगृहीतनष्टे परिमाणादौ व्यभिचारः । पतन नियम इति । अधःसंयोगजनननियम इत्यर्थः । अदृष्टहेतुकत्व इति । अदृष्टहेतुक्रियात्व इत्यर्थः । अत्र व्यभिचारमाह अदृष्टेति ।

न्यायलीलावतीप्रकाशः

त् । स्पर्शनेन्द्रियप्रत्यक्षगुणस्येति । स्पर्शनेन्द्रियप्रत्यक्षगुणजातीयस्येत्यर्थः । तेन स्पर्शनेन्द्रियमात्रगृहीते पटपरिमाणे न व्यभिचारः । स्पर्शनेन्द्रियेति । संख्यादौ तथा सहचारादित्यर्थः । ननु पतनासमवायिकारणत्वेन गुरुत्वमनुमेयम् अन्यस्य तथात्वासम्भवादित्याह अस्त्विति । अदृष्टतदिति । दहनादिक्रियायां तत्कल्पनादित्यर्थः । पतनानियम इति । भूम्यादाविवान्यत्रापि पतनं स्यात् असमवायिकारणसमवधानाविशेषादित्यर्थः । अन्यथेति । यद्यदृष्टवदात्मसंयोगस्य साधारण्येनान्यद-

न्यायलीलावतीप्रकाशविवृति

गुणजातीयस्येति । यद्यप्येवमपि घटपरिमाणे व्यभिचार एव, तथापि

(१) अधोदेशाद्ग्रहणमिति शंकर० पाठः । (२) अदृष्टवदिति मु० पु० पाठः ।

श्रयमनुवृत्तेः ।

नन्वदृष्टवदात्मसंयोगस्य पतनहेतुत्वे गुरुत्वतारतम्याभावात् पतने चिरक्षिप्रतारतम्यविरोधात् । न चातिरिक्तक्षित्यादिप्रवेशात्तदिति वाच्यम् । तेजःप्रवेशेऽपि प्रसङ्गात् । तेजो न गुर्विति चेत् । तुल्यम्, क्षित्यादौ गुरुत्वास्वीकारात् । पतनानुकूलवेगतारतम्येनैव पतनतारतम्यसन्तानस्य चिरक्षिप्रतोपपत्तेः । तथाभूतवेगजनकपतनोत्पत्तौ तर्हि किं कारणम् ? अदृष्टवदात्मसंयोगो विशिष्टवेगोत्पादकपवनचलनकर्मवत् । (१)भूगतकर्मविशेषोत्पत्तिरदृष्टेतरकारणविशेषजन्या शरीरादिषु दृष्टेति चेन्न ।

न्यायलीलावतीकण्ठाभरणम्

ननु गुरुत्वतारतम्याधीनं मृत्पाषाणादौ पतनतारतम्यं तदभावे न स्यादित्याह नन्विति । नन्वदृष्टवदात्मसंयोगाविशेषेऽपि यत्र द्रव्यान्तरानुप्रवेशस्तत्राधिकं पतनमित्याह न चेति । तुल्यतामेव दर्शयन्ति क्षित्यादाविति । तेजोवत् क्षितावपि न गुरुत्वमित्यर्थः। आद्यमेव पतनं कथं स्यादित्याह तथाभूतेति । अदृष्टवदिति । अदृष्टवदात्मसंयोगादाद्यं पतनं तज्जनितवेगाच्च उत्तरोत्तरमित्यर्थः । विशिष्टवेगेति । पतनतारतम्यप्रयोजकत्वमेव वेगे वैशिष्ट्यम । नन्वधःसंयोगफलिका तालफलादिक्रिया अदृष्टवदात्मसंयोगभिन्नासमवायिकारणजन्या पार्थिवावयविक्रियात्वात् शरीरक्रियावदिति गुरुत्वसिद्धिं शंकते भूगतेति । विशेषपदं दृष्टान्तीकृतशरीरक्रियाभेदकं परमाणुक्रियाभेदकं वा । द्वितीयविशेषपदं समवा-

न्यायलीलावतीप्रकाशः

समवायिकारणं कल्प्यमित्यर्थः ।

वेगतारतम्येनैवेति । तस्य कारणविशेषप्रयोज्यत्वादित्यर्थः । भूगतेति । भूगतवेगजनकपतनोत्पत्तिरित्यर्थः । कारणेति । स एव गुरुत्व-

न्यायलीलावतीप्रकाशविवृतिः

स्पर्शव्यतिरिक्तस्पार्शनप्रत्यक्षवृत्तिजातेश्चाक्षुषप्रत्यक्षवृत्तित्वमिति नियम इति तात्पर्यम् । मूलस्थविशेषपदार्थव्याख्यानं वेगजनकपतनेति ।

(१) अथ भूगतेति मु० पु० पाठः ।

पवनगतवेगापेक्षकर्मविशेषोत्पत्तावप्यदृष्टेतरकारणापेक्षैव दृष्टा पुरुषप्रेरितप्राणादिकर्मवत् । ततः पुरुषप्रयत्नानपेक्षपवनादिकर्मोत्पत्तावपि गुरुत्ववल्लघुत्वमतीन्द्रियं कल्पनीयम् । रस एव गुरुत्वमस्त्विति चेत् । न । एवंसति रसनया माधुर्यानुभववद्गुरुत्वानुभवप्रसगात् । रसस्यावनतिहेतुत्वात्(१) गुरुत्वस्वभावत्वमिति चेत् । न । रसो न पतनासमवायिकारणं बहिरिन्द्रियव्यवस्थाहेतुत्वात् रूपवत् , अन्यथा वेगप्रकर्षोद्गतितारतम्यवन्माधुर्यपक-

---

न्यायलीलावतीकण्ठाभरणम्

यिकारणभेदकम् , अन्यथा तेनैवान्यथासिद्धेः । तर्हि प्राणक्रियादृष्टान्तेन बहिःपतनक्रियां प्रत्यसमवायिकारणान्तरकल्पनापत्तिरित्याह पवनेति । नन्वनुपलम्भबाधितमेव पतनाक्रियायां कारणान्तरमत आह तत इति । ननु भूजलयोरेव पतनमनुभूयते तत्र चरम एव तदसमवायिकारणं स्यादित्याह रस एवेति । गुरुत्वमिति । गुरुत्वव्यपदेश्य इत्यर्थः । रसगुरुत्वयोरभेदे दोषमाह एवंसतीति । नन्वभेदश्चेत्तदा नेदमनिष्टमिति चेद्, गुरुरियं शर्करेत्यनुभवो रसनायां स्यादित्यर्थात् । ननु रसमेव गुरुत्वं न ब्रूमः, किन्तर्हि ? गुरुत्वकार्ये रस एवाभिषिच्यतामिति ब्रूम, इत्यत आह रसस्येति । न चेदमप्रयोजकमित्याह अन्यथेति । अदृष्टहेतुत्वात् न जले पतनं पङ्कादौ पतनमिति कथं वैषम्यमित्यत्र

न्यायलीलावतीप्रकाशः

मिति भावः । पवनगतवेगेति । व्याप्तिग्राहकमानाभावश्च तुल्य एवेति भावः । रस एवेति । गुरुत्वस्यापि रसवन्मात्रवृत्तित्वादित्यर्थः । एवंसतीति । रसभिन्नगुरुत्वाभावादित्यर्थः। ननु रसस्य पतनहेतुत्वं गुरुत्वस्वभावत्वम् ,तच्च पतने गृह्यमाण एव सुग्रहम , पतनं च न रसनेन्द्रियग्राह्यमिति रसस्य रसनेन्द्रियग्राह्यत्वेऽपि तस्य पतनहेतुत्वं न गृह्यत इति गुरुत्वं न रसनग्राह्यमित्याह रसस्येति । अन्यथेति । कारणप्रकर्षा-

न्यायलीलावतीप्रकाशविवृतिः

वेगजन्यकर्मणि नोदनादिजन्यकर्मणि चांशतः सिद्धसाधनवारणाय

---

(१) हेतुत्वामिति . मु० पु० पाठः ।

र्पादुद्राक्षादिचूर्णेषु पतनप्रकर्षप्रसङ्गात् । गुरुत्वाविशेषेऽपि पाषाणालाबुप्रभृतिषु मज्जनोन्मज्जननियमवददृष्टहेतुकतासाम्येऽपि पतनोत्पतननियमो भविष्यतीति चेत् । न । जलाधोगमनं हिमज्जनम् । जलेन च धारणं पतनप्रतिबन्धा(१)दुन्मज्जनम् । एतस्य जलसंयोगस्य कस्यचिदेव पतनप्रतिबन्धे हेतुत्वात्(२) दृष्टहेतुकमेव मज्जनमुन्मज्जनं चेति चेत् । अत्रोच्यते । विवादाध्यासितं पतनं स्वसमवायिकारणमात्रसमवेतासमवायिकारणजन्यं पतनत्वात् ,

न्यायलीलावतीकण्ठाभरणम्

केषांचित् समाधानमाशंक्य निराकरोति गुरुत्वेति । मज्जनोन्मज्जनेऽपि प्रति न गुरुत्वं प्रयोजकं ।किन्तु जलेन द्रव्यविशेषस्य संयोग एव प्रयोजक इत्याह—जलाधोगमनमिति । विवादाध्यासितमिति । आद्यं पतनमित्यर्थः । द्वितीयादीनां वेगादपि सम्भवादिति भावः । अदृष्टवदात्मसंयोगव्युदासाय मात्रपदम् । पतनमधःसंयोगफलिका क्रि·

न्यायलीलावतीप्रकाशः

धीनत्वात्कार्यप्रकर्षस्येत्यर्थः। पुनरदृष्टविशेषेणान्यथोपपत्तिमाह गुरुत्वाविशेषेपीति । दृष्टान्तमात्रं परेण साधकत्वेनोपन्यस्तमिति तदेव दूषयति जलाधोगमनमिति । दृष्टहेतुकमेवेति । तथाच तद्दृष्टान्तेन न पतनोत्पतनव्यवस्थेत्यर्थः । विवादाध्यासितमिति । आद्यं पतनमित्यर्थः । तेन द्वितीयपतनस्यापि पक्षत्वे संस्कारेण नाशतः सिद्धसाधनम् । स्वसमवायीति । स्वसमानाधिकरणैकवृत्तिगुणासमवायिकारणकमित्यर्थः ।

न्यायलीलावतीप्रकाशविवृतिः

विशेषणद्वयम् । पुनरदृष्टविशेषेणेत्यत्र पुनश्चशब्दः पूर्वव्यवच्छेदवचनः, एकदेशीति शेषः । तदेव दूषयतीति । महापूर्वपक्षीति शेषः । न तु दार्ष्टान्तिकमित्येवकारार्थः । अयं चार्थः मूले नियमो भविष्यतीत्यनन्तरं केचिदितिपाठपक्षे सुव्यक्तः, एवं चेदितिपाठपक्षे तूह्नेयः । कारणपदमाशङ्क्य व्याचष्टे स्वसमानाधिकरणेति । एकवृत्तिपदोपयोगमाह

(१) बन्धे उन्मज्जनमिति प्रा० पु० पाठः । (२) बन्धसामर्थ्यात् प्रा० पु० पाठः ।

वेगार्जितशरपतनवत् । न च तेजोऽधोगमनेन व्यभिचारः, तस्य कारणगतवेगपूर्वकतेजोगतवेगजन्यत्वात्(१)। न च तेजःपरमाणोरधोगमनेन व्यभिचारः, तस्यापि बीजाङ्कुरवदनादिकर्मजवेगजनितत्वात् । रसवद्द्रव्याधोगमनं(२) वा पतनम् । यदि वा गुरुत्वस्य क्वचिददृष्टापेक्षत्वमिन्द्रियव्यञ्जनीयत्वेनान्यत्रानुमानप्र-

---

न्यायलीलावतीकण्ठाभरणम्

या इति विवक्षया व्यभिचारं शंकते नचेति । तत्रापि सत्त्वान्न व्यभिचार इत्याह तस्येति । नचेति । कारणवेगाभावादिति भावः । परमाणोरपि कर्म्मणा वेगो वेगात् पुनः कर्म्मेति साध्यसत्त्वान्न व्यभिचार इत्याह तस्यापीति । रसवद्द्रव्यस्येति । तथाच तेजसि हेत्वभावादेव न व्यभिचार इति भावः । क्वचिदिति । स्थूलावयविनीत्यर्थः । अन्यत्र पर-

न्यायलीलावतीप्रकाशः

तेन नादृष्टवदात्मसंयोगेन सिद्धसाधनम् । वेगार्जितेति । ननु पतनं यद्यधःसंयोगफलकं कर्म, तदा दृष्टान्तोऽपि गुरुत्वजन्य एवेति तदसिद्धिः, कर्ममात्रं चेत्तदा हस्तक्षिप्तलोष्ठादि(३)कर्मणा व्यभिचारः तद्वेगस्य तिर्यग्गमनप्रयोजकतया तज्जनकत्वादिति न वाच्यम् । अभिघातरूपसहकारिवशात्तद्वेगस्याप्यधःक्रियाजनकत्वात् । रसवद्द्रव्येति । तथाच तेजसि पतनमेव नास्तीति न व्यभिचार इत्यर्थः । अत्र मूर्त्तमात्रसंयोगाजन्यस्य पतनस्य विवक्षितत्वान्न पतत्पृथिव्यादिसंयोगजन्याधोगमनवत्करादिना व्यभिचारः । अनुमेयं गुरुत्वं प्रतिपाद्य प्रत्यक्षं तदिति व्युत्पादयति यदि वेति । क्वचिदिति । पृष्ठारोपि-

न्यायलीलावतीप्रकाशविवृतिः

तेनेति । न तु विवक्षितार्थेनेत्यर्थो यथाश्रुतेप्येतद्दोषाभावादिति ।

ननु पतनमिति । पतनत्वादित्यत्रेति शेषः। तदा दृष्टान्तोपीति । तादृशकर्मण एव दृष्टान्तीकरणादन्यथा साधनवैकल्यापत्तेरिति भावः। लोष्ठादिना लोष्ठादिकर्मणा, तत्र प्रयत्नवद्धस्तुसंयोगस्यासमवायिकारणतया पक्षसमत्वाभावादिति भावः॥ दृष्टान्तस्येति(१)। उभयथापि साध्यतावच्छे-

---

(१) वेगपूर्वकत्वात् इति प्रा० पु० पाठः । (२) द्रव्यसमवेताधोगमनमिति मु० पु० पाठः ।
(३) अत्र विवृतिमते-लोष्ठादिना-इत्येव पाठो बोध्यः ।

वृत्तेः। न चैवं गुरुत्वस्यातीन्द्रियत्वव्याघातः, अतीन्द्रियेष्वपि परमाण्वादिवदात्मविशेषगुणापेक्षित्वेन इन्द्रियप्रवृत्तिदर्शनात्। न चेदेवं, पृष्ठाद्यारोपितपदार्थस्य गुरुत्वानुपलम्भप्रसङ्गः, पतनाभावेनानुमानाभावात्। न चेन्द्रियसंनिकर्षव्यङ्ग्यं गुरुत्वम्, ऊर्ध्वस्पर्शेनानुपलम्भात्। न चाधःस्पर्शेन वेद्यत्वं, तृणादिस्पर्शे गुरुत्वस्यानुपलब्धेः। न चोद्भूतत्वे सति इन्द्रियसंनिकर्षवेद्यम्, गुरुत्वस्य बहिरिन्द्रियव्यवस्थां प्रत्यहेतुत्वेन संख्यादिवदुद्भूतत्वा-

---

न्यायलीलावतीकण्ठाभरणम्

माणुत्र्यणुकादौ तर्हि कथं गुरुत्वस्यातीन्द्रियत्वं सूत्रकृदाहेत्यत आह नचेति। अदृष्टसापेक्षत्वगिन्द्रियवेद्यत्वान्न व्याघात इत्यर्थः। अन्यथाऽनुभवविरोध इत्याह नचेदेवमिति। ननु तत्राप्यानुमानिकी तत्प्रतीतिः स्यादित्यत आह पतनेति। नन्वदृष्टनिरपेक्षेणैव त्वगिन्द्रियेण तर्हि गृह्यतामत आह नचेति। तर्हि अर्द्धावच्छेदनाप्युपलभ्येतेत्यत

न्यायलीलावतीप्रकाशः

तपाषाणादावित्यर्थः। शास्त्रविरोधं परिहरति नचैवमिति। अतीन्द्रियेष्विति। यथा ज्ञानलक्षणप्रत्यासत्त्या परमाणुः प्रत्यक्षः तद्वददृष्टसहकृतेन्द्रियप्रत्यक्षं गुरुत्वमपीत्यर्थः। नन्वदृष्टानपेक्षेन्द्रियं संयुक्तसमवायमात्रप्रत्यासत्त्या गुरुत्वग्राहकमस्त्वित्यत आह न चेन्द्रियेति। तृणादिस्पर्श इति। तृणादीनामधःस्पर्शे सत्यपि गुरुत्वानुपलब्धेरित्यर्थः। नचेति। तृणादिगुरुत्वं चानुद्भूतमिति शेषः। गुरुत्वस्येति। अन्यथा महत्त्व एवोद्भूतत्वकल्पनायामाकाशादिमहत्त्वे तदभावात्तदप्रत्यक्षोपपत्तौ

न्यायलीलावतीप्रकाशविवृतिः

दकावच्छिन्नसाध्यवत्त्वादित्यर्थः। तथापीत्यस्याधःसंयोगजनककर्मत्वस्य हेतुत्वेपीत्यर्थो, न वाच्यमित्यग्रेतनेन च सम्बन्धः। करादिना-करादिनिष्ठाधोगमनेन। अन्यथा महत्त्व एवेति। यद्यप्यप्रत्यक्षे द्रव्ये महत्त्वानुद्भवेऽपि स्पर्शादेः प्रत्यक्षतया तत्रोद्भूतत्वमावश्यकम्, तथापि रूपाद्युद्भवादेव प्रत्यक्षोपपत्तौ न गुरुत्वे महत्त्वे वा तत्कल्पनमिति भावः। न च प्रत्यक्षत्वानुरोधादेव गुरुत्वेऽपि तत्कल्पनं, प्रत्यक्षतया

भावात्। ततो योगीन्द्रियवदिन्द्रियमदृष्टसहायं अतीन्द्रियेऽपि गुरुत्वे प्रवर्तत इति। न च लघुत्वं, गुरुत्वापकर्षस्यैव लघुत्व-प्रत्ययगोचरत्वात्। दहने च उद्गमननियमस्य कारणवेगपूर्वकत्वे-गादेवोपपत्तेः। एतच्च कारणगुणपूर्वकमवयविनि।

नन्वेवं द्विपलिकरुचकाभ्यामारब्धस्य स्वस्तिकस्य कारण-गुरुत्वापेक्षया न्यूनसमाधिकभावेन त्रिचतुःपञ्चपलिकत्वापत्ति-

---

न्यायलीलावतीकण्ठाभरणम्

आह तत इति। वस्तुगत्या अभ्युपगमवादोऽयमिति मन्तव्यम्। न-नूक्तं तेजस ऊर्ध्वगमनहेतुर्लघुत्वं गुणान्तरं स्यादित्याह नचेति। एत-दिति। गुरुत्वमित्यर्थः।

द्विपलिकरुचकारब्धे स्वस्तिके यदि समं गुरुत्वं स्यात्तदा च-तुःपलिकस्वस्तिकं तावद् यदि न्यूनं तदा त्रिपलिकं यद्यधिकं तदा-

न्यायलीलावतीप्रकाशः

रूपादावपि तदकल्पनापत्तेरित्यर्थः। गुरुत्वापकर्षस्यैवेति। ननु लघुत्वा-पकर्ष एव गुरुत्वं स्यात। न च गुरुत्वं प्रमाणसिद्धमिति तदभावो लघुत्वं न तु वैपरीत्यं लघुत्वे मानाभावादिति वाच्यम्। तैजसामाद्यां क्रियां पक्षीकृत्य गुरुत्वलघुत्वस्यापि साधयितुं शक्यत्वात्, पतनो-त्कर्षापकर्षश्च लघुत्वविशेषाभावेनैवोपपन्नः। अत्राहुः। तेजसामाद्य-क्रियायाः वेगेनैवोपपत्तेः। न च चिरोत्पन्ननिश्चले तेजसि तदभावः, अत एवेद्रनीलप्रभायाः कदाचित्सक्रियत्वं कदाचिन्निःक्रियत्वमिति इन्द्रनीलप्रभाक्रियायाः पिण्डाद्यपकर्षणहेतुकत्वेन प्रत्यक्षसिद्धत्वात्, पृथिव्यादौ त्वाद्यक्रियाया अनन्यथासिद्धत्वात्। ननु दहनोद्गमनार्थं लघुत्वस्वीकारः स्यादत आह दहने चेति। एतच्च गुरुत्वमित्यर्थः।

न्यायलीलावतीप्रकाशविवृतिः

एव स्वाभाविकया असिद्धेरिति भावः। अनन्यथासिद्धत्वादिति। वेगेनेति शेषः। तस्य कारणवेगपूर्वकेत्यादिमूलेन तत्र सद्भावप्रदर्शनात् वेग-नाशानन्तरं निश्चलतेजसि नोदनादिकं विना क्रिया सिद्धैव पृथिव्या-दौ तद्विनापि तत्फलादावाद्यपतनानुभवाद्गुरुत्वसिद्धिरिति भावः।

प्रत्येकं रुचकयोः द्विपलिकत्वे त्रिचतुरित्यादिविरुद्धेत्यत आह

रिति चेत् । न खण्डावयविनां स्वस्तिकारम्भकत्वात्, नतु तदवयवपरम्परायाः परमाण्ववसानायाः, अतः पलरूपं गुरुत्वं कारणाकारणसमाहारस्य, तत्र कारणगुरुत्वस्यापरिचयात् समहीनाधिकभावेऽप्यविरोधात् । तथाप्यवनतिभेदः स्यादिति चेन्न । भूयसि गुरुत्वेऽल्पगुरुत्वोत्कर्षेऽप्यवनतिभेदभावात् ॥ इति गुरुत्वम् ॥

न्यायलीलावतीकण्ठाभरणम्

पंचपलिकं त्र्यमप्यसम्भवीत्यत आह नन्वेवमिति । खण्डावयविनामिति । च्यवकादीनामेव तु तेष्वेव सत्सु तदवयवानामपीत्यर्थः । आरब्धारम्भकवादस्य निरासात् अत इति । यदि रुचकयोरपि व्यवस्थितं गुरुत्वं स्यात्तदा तन्निरूपितं समन्यूनादित्वं निरूप्येत तदेव तु नास्तीत्यर्थः । ननु तथापि कियानिति शेषः स्यादेवेत्यत आह तथापीति । पाषाणादावुन्नीयमाने तदुपरि स्थितानां तृणादीनां लघीयसां यथा अवनतिविशेषो नोपलभ्यते तथा प्रकृतेऽपीत्याह भूयसीति ।

न्यायलीलावतीप्रकाशः

नन्वेवमिति । एकमेकपलिकमपरं चैकपलिकं रुचकं ताभ्यामारब्धस्य स्वस्तिकस्येत्यर्थः । कारणगुरुत्वेति । समवायिकारणगुरुत्वं तावत् पलद्वयमितं तदारब्धावयविनि गुरुत्वस्यावयवगुरुत्वापेक्षया न्यूनसमाधिकभावेन त्रिचतुःपञ्चपलिकतापत्तिरित्यर्थः। परमाण्ववसानाया आरम्भकत्वमित्यनुषज्यते, पलरूपं गुरुत्वं प्रत्येकं रुचकयोरिति शेषः । कारणाकारणेति । कारणं स्वस्तिकसमवायिकारणं, अकारणं अवयवपरम्परा तत्समाहारस्येत्यर्थः । अविरोधादिति । न त्रिचतुःपञ्चपलिकतापत्तिरित्यर्थः । तथापीति । स्वस्तिकसमवायिकारणतदवयवपरम्परागुरुत्वस्य कारणस्य भावादित्यर्थः । भूयसीति । समतुलाधृतपाषाणखण्डोपरि निपतिततृणादावित्यर्थः ।

न्यायलीलावतीप्रकाशविवृतिः

एकमेकपालिकमिति । आरम्भकत्वमिति पञ्चम्यन्तस्य पूर्वमुपात्तस्य विभक्तिविपरिणामेनानुषङ्गो द्रष्टव्यः । न त्रिचतुःपञ्चेति । स्वस्तिकसमवायिकारणस्य न फलरूपं गुरुत्वं समाहारश्च पलरूपगुरुत्वाश्रयो न स्व-

द्रवत्वं स्वाभाविकमन्यथा च। पूर्वमप्सु, अन्यत्क्षितितेजसोः। करकाद्रवत्वं न स्वाभाविकमिति चेत्। न। घृतादिवत्तस्य नैमित्तिकविलयनाभावात्। उत्तरं च कनके। पार्थिवमेव तत्किं न स्यादिति चेन्न। तेजो द्रवत्ववद्रूपित्वात् क्षितिवत्। ततः पक्ष-

---

न्यायलीलावतीकण्ठाभरणम्

स्वाभाविकमिति। तेजःसंयोगाजन्यमित्यर्थः। घृतादिवदिति। तेजःसंयोगमन्तरेणापि तद्विलयनदर्शनाददृष्टाधीनं तत्र काठिन्यमित्यर्थः। क्षितितेजसोरित्युक्तं तत्र कुत्र तेजसीत्यत आह उत्तरमिति। तेज इति। तेजस्त्वं द्रवत्ववद्वृत्ति रूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातित्वात् पृथिवीत्ववदित्यर्थः। नच रसवद्वृत्तित्वमुपाधिः, साध्य-

न्यायलीलावतीप्रकाशः

स्वाभाविकमिति। यद्यपि स्वभावजन्यत्वं जलपरमाणुद्रवत्वाव्यापकं, स्वभावाश्रितत्वं नैमित्तिकस्यापि, तथापि तेजःसंयोगासमवायिकारणकवृत्तिद्रवत्वव्याप्यजातिशून्यत्वं स्वाभाविकत्वम्। अन्यथेति। तादृशजातिमदित्यर्थः। नैमित्तिकेति। तादृशतेजःसंयोगजन्यद्रवत्वानाधारत्वादित्यर्थः। उत्तरं नैमित्तिकम्। कनकइति तेजसि। पार्थिवे घृतादौ सम्प्रतिपन्नत्वान्नोक्तम्। तेजो द्रवत्ववदिति। नन्वालोकादिपक्षत्वे

न्यायलीलावतीप्रकाशविवृतिः

स्तिकसमवायिकारणगुरुत्वापेक्षया न्यूनसमाधिकभावे सर्वत्राविरोधस्तस्याल्पत्वादिति सिद्धान्तसंक्षेपः।

तेजःसंयोगेति। अवयवित्वस्य पृथिव्यादावपि कारणगुणत्वादुत्पत्तेरतिव्याप्तिरतो जातिगर्भता। ननु तेजःपदं व्यर्थम्। अखण्डाभावे न व्यर्थतेत्येके। वस्तुतस्तेजःपदसंयोगासमवायिपदयोर्विकल्पेनान्वयो न क्षणद्वये तात्पर्यम्। अदृष्टवदात्मसंयोगमादायासम्भववारणाय समवायिपदम्। ननु नैमित्तिकत्वं निमित्तजन्यत्वं, तच्च करकाविलयनेऽप्यस्तीत्यसिद्धिरतो व्याचष्टे तादृशेति। अत्यन्तेत्यर्थः। एतच्च भौमोष्मजन्यत्वेनासिद्धिवारणार्थमित्येके। स्वरूपनिर्वचनं तदत एव लक्षणे नोपात्तमित्यन्ये। अन्यव्यवच्छेदतात्पर्यभ्रमं निरस्यति घृतादावि ति। तेज इति। द्रव्यत्वादिनार्थान्तरवारणाय द्रव्यत्वव्याप्येति। सा-

धर्मतया कनक एव सिद्ध्यतीति नियमात्(१)। कनकतैजसत्वेपि का प्रमेति चेत्(२)। न। क्षित्युदकान्यत्वे सति रूपित्वाद्दीपवत्। कनकं न भौमं अत्यन्तानलसंयोगेऽप्यनुच्छिद्यमानद्रवत्वाधिकरण

न्यायलीलावतीकण्ठाभरणम्

व्यापकताग्राहकमानाभावात्। पक्षधर्म्मतयेति। दीपादौ बाधादित्यर्थः। क्षित्यन्यत्वं साधयति कनकमिति। एवमिति। अत्यन्तानलसंयोगेऽप्यनु-

न्यायलीलावतीप्रकाशः

बाधः, अतिरिक्तपक्षत्वे चाश्रयासिद्धिः, घटादिना व्यभिचारश्च, तेजो द्रुतवृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमदित्यत्र च रसवत्त्वमुपाधिः। नैवम्। तेजस्त्वं नाद्रुतरूपवन्मात्रवृत्ति द्रव्यत्वसाक्षाद्व्याप्यजातित्वात् आत्मत्ववदिति विवक्षितत्वात्। ननु पक्षधर्मतया तेजसो द्रवत्वाधारत्वसिद्धावपि कनकतैजसत्वसिद्धिः कुत इत्याह कनकेति। उदकान्यत्वस्य सिद्धत्वात् क्षित्यन्यत्वमसिद्धं साधयति कनकमिति। नन्वत्यन्तानलसंयोगानुच्छिद्यमानं यद्द्रवत्वं तदधिकरणत्वादित्यर्थे आश्रयनाशनाश्यद्रवत्वाधिकरणघृतादौ व्यभिचारः, अत्यन्तानलसंयोगे सति अनुच्छिद्यमानद्रवत्वाधारत्वादिति कृते चासिद्धिः द्रवत्वस्यापि विनाशित्वात्, अत्यन्तानलसंयोगोच्छेद्यद्रवत्वानधिकरणत्वादित्यर्थे च मृदाऽनैकान्तिकम, अथाग्निसंयोगानुच्छेद्यद्रवत्वाधिकरणत्वादिति

न्यायलीलावतीप्रकाशविवृतिः

क्षात्पदं भेदगर्भव्याप्यत्वलाभाय। रसवत्त्वमिति। रसवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वमित्यर्थोऽतो गुणविरोधेन नीरसे न साध्याव्यापकत्वम्। तेजस्त्वमिति। मनस्त्वादौ व्यभिचारो माभूदिति साध्ये रूपवदिति विशेषणम्। बाधवारणाय मात्रपदम्। हेतौ घटत्वादिव्यभिचारवारणाय द्रव्यत्वसाक्षाद्व्याप्यपदम्। घटालोकान्यतरत्वादौ तद्वारणाय जातिपदम्। विनाशित्वादिति। द्रुततरत्वादिप्रतीत्यनुरोधादिति भावः। अत्यन्तेति। अत्र च नासिद्धिरत्यन्तानलसंयोगनाशदशायामप्याश्रयनाशेनैव सुवर्णद्रवत्वनाशादिति भावः। अथाग्नेति। अनुच्छेद्यत्वमुच्छेदायोग्यत्वमतो न घृतादौ पूर्वो-

---

(१) न्यायादिति प्रा० पु० पाठः। (२) नेतिपदं प्रा० पु० नास्ति।

त्वात् जलपरमाणुवत्। गुरुत्वमप्येवमभौमं स्यात् अत्यन्तानल-संयोगेऽप्यनुच्छिद्यमानत्वादिति चेत्। न। गुरुत्वस्याभौमस्य स्वाश्रयसजातीयव्यापकत्वनियमात् तेजोमात्रे गुरुत्वप्रसङ्गात्।

न्यायलीलावतीकण्ठाभरणम्

च्छिद्यमानं चेत् पार्थिवं तदेवमित्यर्थः। अभौमस्येति धूमादौ व्यभिचार-वारणार्थम्। न च तत्राप्यलंधूमदशायां गुरुत्वमिति वाच्यम्। तस्य धू-

न्यायलीलावतीप्रकाशः

तदर्थः, तथापि घृतावयविनि व्यभिचार एव। मैवम्। एतस्य तेज-स्येव निरासात्। गुरुत्वस्येति। अभौमस्येति विशेषणे न सर्वत्र भूमौ गुरुत्वमभिप्रेतं धूमे तदभावात्, अन्यथाऽवनमनापत्तेः, अलंधूमस्य चावनतिमतो धूमादन्यत्वात्। स्वाश्रयेति। अभौमं गुरुत्वं अगुर्ववृत्ति-द्रव्यत्वसाक्षाद्व्याप्यजातिसमानाधिकरणमेवेत्यर्थः। अनैकान्तिकत्व-

न्यायलीलावतीप्रकाशविवृतिः

कव्यभिचारः। अत एव च न पूर्वाभेद इति ध्येयम्। तथा-पीति। वैशेषिकमते अवयविनि पाकानभ्युपगमेन स्वरूपयोग्यताया अप्यभावादिति भावः। तेजस्येवेति। समानाधिकरणद्रवत्वसामग्र्यस-मवहिताग्निसंयोगजन्यध्वंसप्रतियोग्यवृत्तिजातिमद्रवत्वाधिकरणत्वा-दित्यत्र तत्रोक्तेऽस्यापि तात्पर्यादिति भावः। विशेषण इति सप्त-म्यन्तम्। अभिप्रेतमिति। ग्रन्थकृत इति शेषः। तथाचैतन्मते नेदमिति भावः। अत एवालंधूमदशायामित्यादिकिरणावलीविरोधोऽप्यपास्तः। वस्तुतो धूमत्वव्यञ्जकस्य स्पर्शविशेषस्य चक्षुःकोणग्राह्यस्य तत्रापि सत्त्वादलंधूमो धूम एव, अस्तु वा तदन्यस्तथापि तद्ध्वंसजन्यद्रव्यत्वेन तदुपादानोपादेयत्वनियमेन तस्य गुरुत्वे धूमोपादानेऽपि तदारब्ध-धूमेऽपि गुरुत्वमावश्यकमेव। मूले तु तेजस्यपि सर्वत्राल्पं गुरुत्वम-स्त्वितीष्टापत्तिशङ्कानिरासार्थमवनतिविशेषहेतुगुरुत्वस्यैव व्यापकत्व-मापाद्यमित्यभिप्रायेण घटादिगुरुत्वव्यभिचारवारणाय भौमस्येति विशेषणमिति प्रतिभाति। प्रत्येकगुरुत्वस्य तज्जातीयव्यापकत्वम-सिद्धमित्यत आह अभौममिति। सुवर्णत्वादिजातिमादाय सिद्धसाधन-

भौमस्यापि गुरुत्वस्य श्यामादेरत्यन्तानलसंयोगेऽप्यनुच्छेदात् । सुवर्णं चाद्रुततैजसं अत्यन्तानलसंयोगेऽप्यनुच्छिद्यमानानित्यद्रवत्वाधिकरणत्वात्, न यदेवं न तदेवम्, यथा क्षित्यादिकम् । भौममपि द्रवत्वं स्नेहवदौपाधिकं स्यादिति चेत् । न । काचादिषु द्रवत्वेऽपि संग्रहाभावात् । आप्यत्वे तु संग्रहप्राप्तेः(१)। द्रवत्वं विहाय स्नेह एव स्यन्दननिदानमस्त्विति चेन्न । तदुत्कर्षेऽप्यनुत्कर्षात् । नहि घनीभूतघृतादिकमपेक्ष्य चिरस्यन्दि जलं, जलापेक्षया चाशीघ्रस्यन्दि घृतम् ॥ इति द्रवत्वम् ।

न्यायलीलावतीकण्ठाभरणम्

मादन्यत्वात् । गुरुत्वस्याभौमत्वसाधके हेतौ व्यभिचारमाह भौमस्यापीति । श्याम इष्टकाविशेषो श्याम इति प्रसिद्धः । द्रवत्वेति । द्रवत्वाधिकरणत्वे सति तैजसत्वमित्यर्थः । नैमित्तिकद्रवत्वं क्षितितेजसोरित्याक्षिपति भौममपीति । काचादिष्विति । काचादौ पार्थिवे यद्यद् द्रवत्वं तत्तदाप्यं स्यात् संग्रहकारि स्यादित्यर्थः । द्रवत्वात् स्यन्दनमिति मूलमाक्षिपति द्रवत्वं विहायेति । स्नेहमात्रं यदि स्यन्दनकारि स्यात्तदा न घृतादधिकं स्यन्दनं स्यात्, तथाच न स्यन्दनं स्नेहासमवायिकारणकं तदुत्कर्षाननुविधायित्वात् रूपवदित्याह तदुत्कर्षेऽपीति । तदेवाह नहीति । ननु शैथिल्यवत्द्रवत्वमपि संयोगभेदः स्यादिति चेन्न । जले जलान्तरमिश्रणे संयोगबुद्ध्यभावेऽपि द्रवत्वधीसत्त्वात् ।

न्यायलीलावतीप्रकाशः

माह भौमस्यापीति । श्याम इष्टिकाविकारविशेषः । औपाधिकं आप्यमित्यर्थः । आप्यत्वे त्विति । स्नेहसमानाधिकरणद्रवत्वस्य सङ्ग्रहजनकत्वादित्यर्थः । तदुत्कर्षेऽपीति । न हि यदुत्कर्षेऽपि यन्नोत्कृष्यते तत्तदसमवायिकारणमित्यर्थः । ननु संयोगविशेष एव शिथिलादिवद्द्रवत्व-

न्यायलीलावतीप्रकाशविवृतिः

मत उक्तं साक्षादिति । तदुत्कर्षेऽपीति मूलम् । इदमुपलक्षणं तथासति द्रुतकाचादेः स्यन्दनं न स्यादित्यपि द्रष्टव्यम् । न हीति । स्वसमवायीति

---

(१) तत्संग्रहप्रसक्तेरिति प्रा० पु० पाठः ।

स्नेहो माहिषगव्यादिषु दधित्ववत् घृतादिषु जातिभेद एवास्तामिति चेत् । न । तस्यैकसम्बन्ध्यपेक्षया सम्बन्ध्यतरे सोत्कर्षत्वात् । उत्कर्षस्य च सामान्यात्मकतया सामान्येऽभावात् ।

न्यायलीलावतीकण्ठाभरणम्

इदं स्निग्धमिदं स्निग्धमित्यनुगतमतिदर्शनादाह स्नेह इति । स्नेहे तावदुत्कर्षो गृह्यते, स च जातिरूपः, स्नेहश्च यदि सामान्यं स्यात्तदा तत्रोत्कर्षो न स्यादित्याह तस्येति । स्नेहात् संग्रह इति मूल·

न्यायलीलावतीप्रकाशः

मस्तु, अन्यथा काठिन्यादीनामपि गुणान्तरतापत्तेः । अत्राहुः । संयोगस्य जलमात्रवृत्तित्वादवयविनि समुद्रे जलान्तरसंयोगाग्रहाद्द्रवत्वं न गृह्यत संयोगिनोरग्रहे संयोगाग्रहात् ।

तस्यैकेति । सावधित्वं च सामान्यान्तरे यद्यपि न दृष्टं तथाप्युत्कर्षादेः प्रतीतिबलादास्थीयते । यद्यपि जलात्स्निग्धतरं घृतमिति प्र·

न्यायलीलावतीप्रकाशविवृतिः

प्रकृताभिप्रायेण स्वरूपनिर्वचनम् । यत्तु दण्डाद्युत्कर्षेऽपि घटाद्युत्कर्षाभावाद्व्यभिचारवारकमेव तदिति । तच्चिन्त्यम् । द्रव्ये उत्कर्षाभावात् । न चासमवायिसंयोगोत्कर्षेण घटोत्कर्षाभावाद्व्यभिचारः । तरलादिशब्दवाच्यस्योत्कर्षस्य प्रकृतेऽभिधानात्तस्य च तत्रावृत्तेरिति भावः । संयोगस्येति । द्रव्यत्वस्थानीयस्येति शेषः । एतदपि जलद्रवत्वमभिप्रेत्य । अवयवानां परस्परं संयोगो गृह्यत एवेत्यत आह अवयविनीति । जलान्तरसंयोगाग्रहादिति । अनुद्भूतरूपस्पर्शजलसंयोगस्यावयविन्यपि सम्भव एव । द्रव्यान्तरानुत्पत्तिरित्यभिप्रायेणाग्रहपर्यन्तधावनम् । योग्यजलसंयोगे अवयवान्तरोत्पत्तेस्तत्र च जलसंयोगाभावाद्द्रवत्वप्रतीतिर्न स्यादयोग्यजलसंयोगस्य चाग्रहादेव सामान्यावयवसंयोगस्य चावयविन्यभावादवयवानामेव परस्परसंयोगस्य चावयविनिष्ठतया भाने भ्रमत्वापत्तेः, परम्परासम्बन्धाश्रयणे च गौरवान्न संयोगात्मकं द्रवत्वमिति प्रघट्टकार्थः ।

ननूत्कर्षस्य सामान्यात्मकत्वे सावधित्वं न स्यादित्यत आह सावधित्वमिति । इदमपि मतान्तरम् । वस्तुत उत्कर्षशब्दात्मकव्यवहार

संग्रहस्तर्हि कतकजलविमलीकरणवज्जातिभेदादास्तामिति चेत्। न। तोयत्वघृतत्वद्रवत्वादीनां व्यभिचारात् एतदुत्कर्षापकर्षाभ्यां सोत्कर्षापकर्षत्वात्। तथापि कथमम्भस्येव, द्रुमादावप्युपलब्धेरिति चेन्न। संयुक्तसमवायादेवोपपत्तेः। द्रवत्ववदग्रहान्नैवमिति। चेत्। न तोयव्याख्यानावसर एव परास्तत्वात्॥ इति स्नेहः॥

न्यायलीलावतीकण्ठाभरणम्

माक्षिपति संग्रह इति। यथा जलवैमल्ये कतकजातीयत्वं तन्त्रं तथा संग्रहेऽपि किंचित् स्यादित्यर्थः। कतकत्ववत् सा जातिरनुपलम्भबाधितेत्याह तोयत्वेति। तथापि संग्रहलक्षणकार्यानुरोधादेव कल्पयिष्यत इत्यत आह एतदिति। स्नेहोत्कर्षापकर्षाधीनोत्कर्षापकर्षतया स्नेहकार्यत्वमेव संग्रहस्येत्यर्थः। स्नेहोऽम्भस्येवेति मूलमाक्षिपति तथापीति। द्रवत्वेति। स्नेहवद् द्रवत्वमपि पृथिव्यामौपाधिकमेव स्यादिति प्रतिबन्दिरित्यर्थः।

न्यायलीलावतीप्रकाशः

तीतिः स्नेहाधारस्योत्कर्षो न तु स्नेहस्य, तथापि क्रियागुणौ प्रकृष्येते न द्रव्यमिति तत्रापि "सविशेषणे ही"ति न्यायेन स्नेहोत्कर्ष इति भावः। ननु कतकत्वादिजातिमद्व्यक्त्या जलविमलीकरणवत् जलत्वादिजातिमद्व्यक्त्या संग्रह इति न स्नेहः सङ्ग्रहासमवायिकारणमित्याह सङ्ग्रह इति। तोयत्वेति। ननु तोयत्वव्यापिका अन्यैव जातिरस्ति सङ्ग्रहोत्कर्षादेरपि घृतत्वादिकमेव प्रयोजकम्। मैवम्। पूर्वोक्तयुक्तेरेव स्नेहस्य जातित्वनिरासात्। एतदुत्कर्षेति। स्नेहोत्कर्षापकर्षाभ्यामित्यर्थः। सोत्कर्षेति। सङ्ग्रहस्येति शेषः।

न्यायलीलावतीप्रकाशविवृतिः

पत्रावधिज्ञानापेक्षा तत्प्रवृत्तिनिमित्तस्यावधित्वघटितमूर्त्तत्वादिति सारम्। सङ्ग्रहोत्कर्षेऽपीति। तदुत्कर्षेऽपीतीत्यादिवक्ष्यमाणयुक्तिरप्यपास्तेति भावः। जलघृतसाधारण्या अन्यस्या जातेरनुपलम्भबाधितत्वात् स्नेहात्मिकैव सा जातिर्वाच्या, सा च निराकृतैवेत्यत आह पूर्वोक्तेति। उत्कर्षो जातिरूपो जातावसम्भव्येवेत्यादेरित्यर्थः।

ननु प्रोक्षणादिजन्यसंस्कारसंभवे संस्कारस्त्रिविध इति न सिद्ध्यति। तथा हि "व्रीहीन्प्रोक्षती"ति द्वितीया प्रोक्षणजन्यफलाश्रयत्वं प्रतिपादयति (१)गृहं गच्छतीतिवत्, तच्च दृश्यं नास्तीत्यतीन्द्रियः संस्कारः। एवमभिमन्त्रिता मृदादयो विषायन्ते। तत्राभिमन्त्रणजन्यः संस्कारः। तत्र देवतानां संनिधिः क्रियते इति चेन्न। देवतादिकल्पनापेक्षया संस्कारकल्पनाया लघुत्वात्। आगमप्रसिद्धसत्त्वानां देवतानामवश्यकल्पनेति चेत्। न। लोकान्तरवर्तित्वेन देवतानां देहसंनिधानस्याशक्यत्वात्। सार्वज्ञ्ये चेत-

---

न्यायलीलावतीकण्ठाभरणम्

संस्कारस्त्रिविध इति मूलमाक्षिपति नन्विति। वेगस्थितिस्थापकभावनासु तदनन्तर्भावादिति भावः। प्रोक्षणादिजन्यः संस्कारस्तावदुभयानुमतः साम्राज्यादिसमवेतो नवेति विप्रतिपत्तौ विचारे प्रवर्त्तनीये पूर्वपक्षमाह तथाहीति। प्रोक्षणं हि प्रत्यक्षक्रिया तया यदि व्रीहिनिष्ठं फलं न जननीयं, तदा व्रीहीनिति कर्मणि द्वितीया न स्यात्, परसमवेतक्रियाफलशालित्वविरहे कर्मत्वानुपपत्तेरित्यर्थः। स च संस्कार आधेयशक्तिरिति गीयते, तस्यामेव उदाहरणान्तरमाह एवमिति। देवतानामिति। तत्तन्मन्त्रलिङ्गदेवतानामित्यर्थः। देवतेति। देवतापि न प्रत्यक्षा, तथाच कल्पनीयेत्यात्मशरीरेन्द्रियादिवत्तत्कल्पनादित्यर्थः। आगम एव देवतायां प्रमाणं, तथाच सन्निधिमात्रं मन्त्रादिना कल्पनीयमिति लाघवमेवेत्यत आह—आगमेति। देवतासान्निध्यं विकल्प्य निराचष्टे लोकान्तरेति। ननु स्थानादिगोचरज्ञान-

न्यायलीलावतीप्रकाशः

ननु प्रोक्षणेति। "व्रीहीन् प्रोक्षती"त्यत्र कालान्तरकार्यानुकूलोऽतीन्द्रियो विशेषः प्रोक्षणजन्योऽस्तीत्युभयसिद्धम्। स व्रीहिसमवेतो नवेति संशये व्रीहिनिष्ठ एव वाच्यः, द्वितीयान्तश्रुत्या व्रीहेः क्रियाजन्येष्टफलभागित्वावगमात्, परसमवेतक्रियाफलाश्रयस्य कर्मत्वादित्यर्थः। देवतानां तत्तन्मन्त्रप्रकाश्यानामित्यर्थः। देवतादीति। देवताक-

(१) ग्राममिति पा० पु० पाठः।

नासंनिधेः सर्वत्र (१)सुलभत्वात्। असार्वज्ञ्ये तु व्यवहितगोचर-चेतनार्जनस्याशक्यत्वात्। विचित्रशक्तीनां विधीनां सामर्थ्येन व्यवहितमपि साक्षात्कुर्वन्तीति चेन्न। यागादावपि(२) देवताप्रीतिरेवामुष्मिकफलमुपकल्पयतीत्यदृष्टकल्पनानुपपत्तिप्रसक्तेः। तथा च महाव्रतः—

मृदमपि विषं कश्चिन्मन्त्रः करोति नियोजितः।
सृजति तदसौ काश्चिच्छक्तिं मृदोऽतिविमोहिनीम् ॥

लाक्षारसावसिक्तबीजपूरकुसुमारुणिमा च लाक्षारसावसेकाहितसंस्कारप्रभवः। लाक्षारसावसेकादेवारुणत्वं महारजनसम्पर्काद्वसन इव भविष्यतीति चेत्। न। चिरान्तरितत्वात्। तथाच महाव्रतः—

कुसुमे बीजपूरादेर्यल्लाक्षाद्यवसिच्यते(३)।
शक्तिराधीयते तेन काचित्तां किं न पश्यसि ॥

यदि न पश्यसि,

न्यायलीलावतीकण्ठाभरणम्

मेव देवतानां मन्त्रादिनोत्पद्यत इत्यत आह सार्वज्ञ्य इति। विधिबलादेव स्यादित्याह विचित्रेति। देवताकल्पने दोषमाह—यागादेरपीति। अहंकारममकारादिरूपमपि देवतासान्निध्यं देवताविरहादेवानुपपन्नमित्यर्थः। नियोजित इति। प्रयुक्त इत्यर्थः। शक्तेर्विषयान्तरमाह लाक्षारसेति। ननु लाक्षारसलौहित्यमेव कुसुमेषु गृह्यतां किं शक्त्या इत्याह लाक्षेति।

न्यायलीलावतीप्रकाशः

ल्पनं तत्सन्निधिकल्पनं चेति गौरवादित्यर्थः। सार्वज्ञ्य इति। ननु ज्ञानमात्रं न सन्निधिः, किन्तु अहङ्कारममकाररूपं तस्य प्रागसत्तया प्रोक्षणादिजन्यत्वात् ज्ञानस्य चाशुतरविनाशित्वेऽपि तदुत्तरकालं तज्जन्यसंस्कारसत्त्वात्। मैवम्। तथासति यागस्यापि तस्यैव व्यापा-

---

(१) सत्त्वादिति प्रा० पु० पाठः। (२) अत्र मिश्रमतेन यागादेरपीति पाठो बोध्यः।
(३) देर्लाक्षारसाद्युपसिच्यते प्रा० पु० पा०।

किं वा सिञ्चसि बीजपूरकुसुमे लाक्षारसं तत्क्षणा-
देवासौ लसितो मिलिष्यति कथं पुष्पेषु दूरान्तरः।
किञ्चान्यतिक्रयतोऽपि चास्य किमसौ संभाव्यते विस्तरः
प्रत्यब्दं भवति द्रुमोऽयमरुणच्छत्रं वसन्तश्रियः ॥

उत्तरकालं तपनकरसम्पर्कमहिम्ना पाकजोऽयमरुणिमा कुसुमेष्विति चेन्न। लाक्षारसानपेक्षपाकप्रभवत्वे लाक्षारसावसेकवैयर्थ्यात्। तदपेक्षपाकजतायां(१) लाक्षारसस्यातीतत्वेनाऽनुपपत्तेः। परम्परया लाक्षारसप्रसूतपाकजो विशेष इति चेन्न। विचारासहत्वात्। लाक्षारसस्य बीजपूरतरुमात्रे वा जनकत्वं तद्विशेषे वा? न तावदाद्यः। तस्य तद्व्यतिरेकेऽप्युत्पादात्। न द्वितीयः(२)। दृश्यस्य तद्विशेषस्या(३)नुपलम्भनिरस्तत्वात्। न हि बीजपूरावयवेषु

न्यायलीलावतीकण्ठाभरणम्

किं न पश्यसि किंवार्थादाक्षिपसीत्यर्थः। एवमग्रेऽपीति। लाक्षारसावसेकस्य दूरान्तरितत्वं लाक्षारसावसेकस्याल्पतां च अनुपपत्तिबीजत्वमुपदर्शयति किंवेति। कुसुमेषु पाकरक्ततोत्पत्तौ लाक्षारसावसेको निमित्तमात्रमित्याशंकते तत्कालमिति(४)। चिरातीतोऽपि परम्परयोपकरिष्यतीत्याह परम्परयेति। परम्पराकारणत्वमपि तरुकाण्डादिजननद्वारा वाच्यं, तत्र विकल्पयति लाक्षारसस्येति। ननु लाक्षारसा

न्यायलीलावतीप्रकाशः

रत्वापत्तौ अदृष्टासिद्धिप्रसङ्गात्। चिरकालगलितस्यापि मेलनमित्यभ्युपेत्याह किञ्चेति। लाक्षारसावसेकस्यातिस्वल्पत्ववात् न ततः प्रत्यब्दभाविकुसुमेषु लौहित्यसम्भव इत्यर्थः। परम्परयेति। बीजतदवयवानां नाशेऽपि लाक्षरसाहितात्तन्मूलमरमाणुषु पाकजपरम्पराविशे

न्यायलीलावतीप्रकाशविवृतिः

पाकजपरम्परेति। यद्यपि परमाणुषु साक्षादेव पाक इति परम्परा

(१) पाकजत्वस्येति प्रा० पु० पाठः। (२) नेतरः इति प्रा० पु० पाठः।
(३) दृश्यविशेषस्येति प्रा० पु० पाठः।
(४) एतन्मतेनात्र मूले तत्कालमिति पाठो बोध्यः।

कश्चिज्जातिविशेषो बीजपूरतरौ वाऽवभासते। अदृश्यत्वे चातीन्द्रियशक्तिस्वीकारात्। लाक्षारसावसिक्तावयवेष्विति चेत्। न। तदवयवानां शोषात्, परमाणूनां च पार्थिवानां सर्वत्राविशेषात्। क्षीरविमिश्रत्रिफलाजलावसिक्तसितापराजिताशाखाभेदे सितासितकुसुमानुपपत्तेः। साक्षात्स्वसंसर्गिणि बीजावयवभेदेऽरुणिमानमनर्जयतो संसर्गिणि कुसुमे रक्तताधानमनुपपन्नम्। यदाह--

न भिनत्ति कयापि मात्रया फलकाण्डाङ्कुरपल्लवानपि।
यदयं निहितो रसस्तया तदनुत्पन्न(१)मिवावभासते॥

न्यायलीलावतीकण्टाभरणम्

रब्धतरुत्वमेव तदारम्भे प्रयोजकं, तच्च नातीन्द्रियं येन शक्तिकल्पना स्यादित्याशंकते लाक्षारसेति। भवेदेवं यदि तरोरारम्भपर्यन्तं लाक्षारसानुवृत्तिः स्यान्न त्वेवमित्याह तदवयवानामिति। सेकानन्तरं लाक्षारसावसिक्ततदवयवानां शुष्कत्वादित्यर्थः, लाक्षावयवानां वा। ननु य एव तर्वारम्भकावयवाः परमाणवः सिक्तास्त एव तरुमारभन्त इत्यत आह परमाणूनामिति। सेकस्य चिरातीतत्वे परमाणुमात्र तन्त्रं वाच्य, तच्चाविशिष्टमित्यर्थः। शक्तेर्विषयान्तरमाह क्षीरेति। परश्लोकमुपवेशयितुं पाठमारचयति साक्षात्स्वेति। यदि च लाक्षारससाकल्यमेव बीजपूरकुसुमपर्य्यन्तमुपकुर्य्यात तदाऽग्रकाण्डाद्यारुण्यमपि भवेदित्यर्थः। तयेति शक्त्या, विनेत्यध्याहार्य्यम्। पुरुषनिष्ठ एव सं-

न्यायलीलावतीप्रकाशः

षादेव तदारब्धकुसुमेष्वरुणिमेत्यर्थः। क्षीरविमिश्रेति। यदि सेकादेव विशेषस्तदा एकैकशोऽपि क्षीरत्रिफलाभ्यामवसेके कुसुमेषु विशेषः स्यात्, नचैवं, किन्त्वाभ्यामेव विमिश्रीभाव इत्याधेयशक्तिरित्यर्थः। ननु सेकेन स्वसंसर्गिणि बीजावयव अरुणिमानमुत्पाद्य तदारब्धवृक्षेषु तदुत्पादात्तज्जनितकुसुमेष्वरुणिमा स्यादित्याह साक्षात्स्वेति। न भिनत्ति-न विलक्षणान् करोतीत्यर्थः। तदनुपपन्नमिति। अङ्कुरा-

(१) तदनुपपन्नमिति प्रकाशाभिमतः पाठः।

अत्रोच्यते। संस्कारस्य हि द्वयी आधारता—समवायः स्वभावप्रत्यासत्तिश्च। तत्र व्रीह्याधारता स्वभावप्रत्यसात्तिरेव स्यात्, भावनावत्। यथा तद्विषयज्ञानप्रसूतत्वमेव तदीयत्वं भावनायाः, तथा तद्विषयप्रोक्षणादिप्रसूतत्वमेव तदीयत्वम्। प्रत्यासत्तिश्च तदुपरक्तप्रतीतिगम्या। सा च ज्ञात इव(१) संस्कृत इति सम्भवति। मुख्यसम्बन्धकल्पनायां(२) किं बाधकमिति चेत्। कल्पनायां(३)

न्यायलीलावतीकण्ठाभरणम्

स्कारः स्वरूपसम्बन्धेन व्रीहिषु वर्त्तमानः कर्मत्वादिप्रयोजक इत्याह संस्कारस्य हीति। मुख्यसम्बन्ध इति। **समवाय इत्यर्थः**। कल्पनाया-

न्यायलीलावतीप्रकाशः

दिषु विशेषानाधाने कुसुमारुण्यमनुपपन्नमित्यर्थः। अत्र तयेत्यनन्तरं विनेत्यध्याहरन्ति। प्रोक्षणजन्यपुरुषनिष्ठसंस्कारसम्बन्धादेव कर्मत्वोपपत्तिरित्याह संस्कारस्य हीति। यथेति। यथा घटं जानामि घटं भावयतीत्यत्र ज्ञानभावनयोस्तद्विषयत्वेन स्वरूपसम्बन्धेन द्वितीयोपपत्तिस्तथा प्रकृतेपीत्यर्थः। तद्विषयेति। अतीततद्विषयज्ञानप्रसूतत्वमित्यर्थः। तथा च प्रोक्षणजन्यसंस्काराधारत्वाद्व्रीहीणां कर्मत्वमुपपन्नमिति नाधेयशक्तिकल्पनामिति भावः। स्वरूपस्य प्रत्यासत्तित्वे मान-

न्यायलीलावतीप्रकाशविवृतिः

भिधानमयुक्तं, तथापि परम्परया प्रयोजकाद्विशेषणादित्यर्थः। अध्याहरन्तीति, वैमत्यसूचनाय। तद्बीजन्तु तयेत्यस्य मात्रयेत्यर्थकत्वे काण्डाङ्कुरादौ मात्रानाधाने मात्रया कुसुमेषु रक्तताधानमनुपपन्नमित्यन्वयसम्भव एवेति ध्येयम्। घटं जानामीति। यद्यपि क्रियाजन्यफलस्य कर्मणः स्वरूपसम्बन्धे प्रकृतोदाहरणं युक्तं, तथापि स्वरूपसम्बन्धेन कर्मतोपपत्तिरित्यतावन्मात्रे दृष्टान्तः। (वस्तुतो ज्ञानभावनयोरिति फलपरमेव, ज्ञानपदञ्च स्मृतिपरम्। यथायोग्यं वाऽन्वयः भावनया ज्ञानजनकत्वेन तत्प्रसुतत्वमसम्भवतीत्यत आह)(४) अतीततद्विषयेति। स्वरूप-

(१)-ज्ञात इति वत् इति मु० पु० पाठः। (२) सम्बन्धे किं-इति मिश्राभिमतः पाठः।
(३) कल्पनागौरवमिति प्रकाशाभिमतः पाठः।
(४) ( ) चिन्हित पाठः (१) आदर्शपुस्तके नास्ति।

गौरवमेव । विजातीयकल्पनायामात्मविशेष(१)गुणस्य तु भूत-
समवेतत्वमसम्भावितमेव । संयोगफलाश्रयत्वेन वा द्वितीयाश्रुते-
रुपपत्तेः । व्रीहीनितीप्सितकर्मणि द्वितीया व्रीहीणां विध्यपे-
क्षितफलाधिकरणत्वं प्रतिपादयति । संयोगस्य विध्यनपेक्षि-
तत्वमिति चेन्न । तस्यापि विध्यपेक्षितादृष्टजननद्वारेणापेक्षि-
तत्वात्(२) । एतेनाभिमन्त्रणं व्याख्यातम् । कुसुमारुणिमा-

न्यायलीलावतीकण्ठाभरणम्

मिति । बाधकमित्यनुषज्यते । नन्वदृष्टमेव तत्समवेतं स्यादित्याह आत्मगुणस्येति । एतेनेति । पुरुषनिष्ठसंस्काराधारत्वेनैवेत्यर्थः । कुसुमारुणिमा चेति । उपादानं तस्य कुसुममेव असमवायिकारणं तद्वदवयवारु-

न्यायलीलावतीप्रकाशः

माह प्रत्यासत्तिश्चेति । मुख्यसम्बन्ध इति । अतिरिक्तसम्बन्ध इत्यर्थः । कल्पनेति । यथोक्तेनैवोपपत्तेरित्यर्थः । न वा साक्षात्सम्बन्धः पुरुषनिष्ठादृष्टेन व्रीहीणां सम्भवतीत्याह आत्मगुणस्य त्विति । संयोगेति । धात्वर्थावच्छेदकप्रोक्षणजन्यसंयोगाश्रयत्वेन कर्मोपपत्तेरित्यर्थः । न च संयोगावच्छिन्न एव व्यापारविशेषः प्रोक्षणार्थः, तथाच प्रोक्षणैकदेशस्य कथं प्रोक्षणसाध्यत्वेनान्वय इति वाच्यम् संयोगस्योपलक्षणत्वेनापदार्थत्वात्, अन्यथा ग्रामं गच्छतीत्यादौ ग्रामादेरपि कर्मत्वानुपपत्तिः । विध्यपेक्षितत्वं विधितात्पर्यविषयत्वं, तच्चादृष्टसंयोगयोरस्त्येव, विधिप्रतिपाद्यत्वं चाधेयशक्त्यापि नास्तीत्याह तस्यापीति । एतेनेति । अभिमन्त्रितपयःपल्वलादावपि अभिमन्त्रणेन पुरुषनिष्ठ एव

न्यायलीलावतीप्रकाशविवृतिः

सम्बन्धोऽपि साक्षादेवेत्यत आह अतिरिक्तेति । साक्षात्सम्बन्धः संयोगसमवायान्यतरः । यद्यप्यदृष्टेन समवायं व्रीहेः कोऽपि न स्वीकरोति, तथापि साक्षात्सम्बन्धस्यौत्सर्गिकत्वाद्यदि यः कश्चिदेवं वदेत्तदा तस्प्रति बाधकबलादेवोत्सर्गत्याग इत्युत्तरमिति भावः । संयोगस्येति ।

(१) विशेषपदं प्रा० पु० नास्ति मिश्रेण च नोपात्तम् ।
(२) द्वारापेक्षितत्वात्-इति प्रा० पु० पाठः ।

च (१) नोपादानत्वेन वाऽसमवायिकारणत्वेन(२) वा शक्ति-माक्षिपति, किन्नामातीतलाक्षारसावसेकापेक्षा नियमान्यथा-नुपपत्तेरतीन्द्रियं द्वारमस्यापेक्षानिर्वाहकमुपपादयति, स च तज्जनितरूपद्वारेणैवोपपद्यमानो(३) नान्यत्कल्पयिष्यतीति। एते-नापराजितालताकुसुमवैचित्र्यं व्याख्यातम्।

वेगासिद्धेस्तथापि त्रैविध्यमनुपपन्नम्। स हि नानुभवादेव

न्यायलीलावतीकण्ठाभरणम्

णिमैव, चिरातीतस्य लौहित्यजनकता तु तेजःसंयोगसहकारितामा-पद्य परमाणुषु पाकजोत्पादकत्वेनैवेति न किञ्चिदनुपपन्नमित्यर्थः। एवं प्रति···विधिना(?) तदभावादौ वटादौ चाधिवासविधिना श-क्त्याधानमपास्तम्।

न्यायलीलावतीप्रकाशः

संस्कारो जन्यत इत्यर्थः। यद्यप्यधर्मजनने प्रेक्षावतां प्रवृत्तिर्न स्यात् धर्मजनने तु तदङ्गाचमनादिव्यतिरेके ततः फलानुत्पत्तिः, तथापि धर्मजनकमात्रे नाचमनाद्यन्वयः, किन्तु यत्र तदुपदेशस्तत्रैव, अत एव यत्राभिमन्त्रणादावपि तदुपदेशस्तत्र तदनुष्ठीयत एव। स चेति। अरु णिमेत्यर्थः। तज्जनितेति। लाक्षारसावसेकजनितपाकजद्वारेणेत्यर्थः। वृक्षकाण्डादौ पाकजरूपादेर्योग्यानुपलम्भात् विशेषानाधानेऽपि बी-जावष्टब्धेषु परमाणुष्वेव पाकजो विशेष आधीयते तदारब्धाश्चाव-यवा अन्तर्वर्त्तमाना इति न तदुपलम्भ इति भावः। एतेनेति। तत्रापि क्षीरत्रिफलाजलमिश्रीभाव एव पाकजप्रयोजक इत्यर्थः।

न्यायलीलावतीप्रकाशविवृतिः

नच त्यजगत्योः पर्यायतापत्तिः, ज्ञाने विशेषणीभूतस्यापि संयोगस्य फलजनकतायामुपलक्षणत्वादिति दिक्। नियमानुकर्षणे तस्य द्वारा निर्वाह्यत्वमत आह अरुणिमेति। स्वतन्त्रस्य लाक्षारसावसेकस्य न रू-पजनकत्वमतः पाकमन्तर्भाव्य व्याचष्ट लाक्षारसेति। पाकपदं पाकज-रूपपरम्। क्वचित्पाठोऽपि तथा। पाकजो विशेष इति। अरुणिमलक्षणः,

---

(१)-मा तु-इति मु० पु० पाठः। (२) असमवायित्वेन-इति प्रा० पु० पाठः।
(३) द्वारेणोपपद्यमानो इति प्रा० पु० पाठः।

व्यवस्थाप्यते, चिरेण गच्छतीतिवत् शीघ्रकर्मक्षणोत्पादभेदाल-म्बनत्वात्(१)। न च रयेण भ्रमत्यलातचक्रमित्यत्रैकप्रत्ययवि-षयभ्रमेण भेदाग्रहा(२)दाशूत्पादानाकलनाद्वेगसिद्धिरिति वाच्य-

न्यायलीलावतीकण्ठाभरणम्

ननु वेगेन गच्छतीति प्रतीतिरेव तत्र मानमित्याह चिरेणेति। अन्यथा चिरत्वमपि गुणान्तरं स्यादिति भावः। ननु रयेण भ्रम-त्यलातचक्रमित्यत्र भ्रमणस्य एकत्वं गृह्यते, तच्च न सम्भवति भ्रम-णाख्यकर्मणां वस्तुगत्या नानात्वात्तथाच यस्यैकत्वं गृह्यते स एव वेग इत्याह नचेति। ननु भ्रमणाद् भेदाग्रह एव कथमित्यत आह आ-शूत्पादानाकलनादिति। स्यादप्येवं यदि भ्रमणाभेदो गृह्येत तदेव तु ना-

न्यायलीलावतीप्रकाशः

ननु शीघ्रेण गच्छतीत्यनुभवो वेगविषय इत्यत आह चिरेणेति। यथा चिरत्वं न गुणस्तथा शीघ्रत्वमपीति तत्प्रतीत्योः कर्मक्षणभेद एव विषयः, अन्यथा चिरत्वमपि गुणान्तरं स्यादिति। एकप्रत्ययेति। एक-ताप्रत्यय विषये यो भ्रमस्तेनाभेदस्य ग्रहादित्यर्थः। तथाच एकताप्र-त्ययसमानविषयेण भ्रमेण कर्मणामभेदग्रहादाशूत्पादस्तेषां गनह्यत्वम-

न्यायलीलावतीप्रकाशविवृतिः

तैरेव चारुणकुसुमोत्पत्तिरिति भावः। नन्वेवं तादृशपरमाण्वारब्धाः स्थूलावयवा गृह्येरन्नत आह तदारब्धाश्चेति। वस्तुतोऽन्तर्वृत्तिभिस्तैः पर-माणुभिः कुसुमारम्भाव्यवधानेनैव स्थूलावयवारम्भ इति बोध्यम्। यद्यपि बीजारम्भकपरमाणोरल्पत्वात् कथं कुसुमसमूहस्य तादृश-स्योत्पत्तिः, तथापि सिक्तपरमाणुसम्बन्धादेव सिक्तपरमाणुष्वपि तादृशं पाकजं रूपमिति कल्प्यते, अन्यथा शक्तिकल्पनेऽप्यसिक्तपर-माणोरारम्भकत्वविरोधादिति भावः। चिरत्वमपीति। चिरेण शीघ्रेणे-ति प्रतीत्योरविशेषे चिरत्वमपि गुणान्तरं स्यात्, यदि च चिरत्व-प्रतीतेः कर्मविलम्बोत्पादविषयत्वं तदा शीघ्रत्वप्रतीतेरपि तदाशू-त्पादविषयत्वमिति। प्रत्ययविषयकभ्रमं निवारयति एकतेति। यत्रैव नानाकर्मणि एकताभ्रमस्तत्रैवाभेदप्रत्ययोपपत्तिरर्थः। एकत्वं संख्या-

(१) त्वादालम्बनत्वात्-प्रा० पु० पाठ। (२) भ्राभेदग्रहादिति पाठान्तरम्।

म्। संयोगविभागप्रबन्धोत्पादानुभवस्य प्रतीतेः। नच न कर्म

न्यायलीलावतीकण्ठाभरणम्

स्तीत्याह संयोगेति। अत्र पाठान्तरं व्याख्यानान्तरं च चिन्त्यम्। ननु

न्यायलीलावतीप्रकाशः

न्यत्र(?) इति रयेण गच्छतीतिबलाद्वेगसिद्धिरित्यर्थः। ननु कर्मणामभेदग्रहः कथं भ्रमः कर्मणामैक्यात्, अन्यथा कर्मणां तौल्ये एकत्र शीघ्रत्वमन्यत्र च विलम्बो न स्यात्। न च चरमसंयोगवदाद्यसंयोगस्यापि कर्मनाशकत्वं, चरमसंयोगवदाद्यसंयोगस्यापि वेगनाशकत्वे वेगैक्यासिद्धिप्रसङ्गात्। अत्राहुः। वेगस्य क्षणिकतायामुत्तरकर्मानुत्पत्तिप्रसङ्गः असमवायिकारणानां कार्यसमानकालत्वनियात्, कर्मणां च

न्यायलीलावतीप्रकाशविवृतिः

ऽभेदस्तादात्म्यमिति विशेषः। इदं च भ्रमणेति मूले पाठमभ्युपेत्य प्रकाशकृतो व्याख्यानम्। यदि च भ्रमेणेति पाठस्तदा सुगम एव। कर्मणामिति। बहुवचनमुभयत्र पराभ्युपगमानुसारेण। अन्यथेति। कर्मणां नानात्व इत्यर्थः। उभयत्रापि कर्मविभागपूर्वसंयोगनाशोत्तरसंयोगकर्मनाशानन्तरमेवापरकर्मण उत्पत्तिरिति भावः। न च पूर्वकर्मनाशानन्तरं विलम्बेन कर्मोत्पत्तावेव चिरत्वमिति वाच्यम्। वेगस्य त्वन्मते स्थायितया तादृशकर्मोत्पत्तेरशक्यत्वात्, अस्मन्मते तु जातिविशेष एव चिरत्वं शीघ्रत्वं चेत्यापाततोऽभिप्रायः। क्षणिकतायामिति। आद्यसंयोगस्यापि तन्नाशकत्वेनाशुविनाशितायामित्यर्थः। तथाचोक्तबाधकबलेन गौरवस्य प्रामाणिकतायां चरमसंयोगत्वेनैव तन्नाशकत्वमिति भावः। यद्यपि कार्यसमानकालतानियमः कर्मनाशकनाशप्रतियोगिन एव समवायिकारणस्य तत्रैव कार्यक्षणिकतापत्तिलक्षणविपक्षबाधकावतारात्। न च वेगस्य संयोगनाश्यत्वपक्षे पूर्वकालताप्यशक्येति वाच्यम्। कर्मनाशक्षण एव कर्मान्तरोत्पत्तेः प्रतिबन्धकत्वं चाविनश्यदवस्थकर्मण एव, कर्मनाशनाश्यत्वे च वेगस्य शङ्कावकाश एव नास्तीति नेदं बाधकम्, तथापि सामान्यत एवासमवायिकारणस्य कार्यसमानकालनियमानभ्युपगमेनेदमुक्तम्। ननु वेगस्य क्षणिकतायामुत्तरकर्मानुत्पत्तिवत् कर्मणामपि क्षणिकतायां चिरत्वादिप्रतीत्यनुपपत्तिरेव बाधिकेति चरमसंयोगत्वेनैव नाशक-

कर्म(१)साध्यमिति तत्प्रतीतिः, अत्र नियमाभावात् , अन्यथा

न्यायलीलावतीकण्ठाभरणम्

तत्र कर्म्मसन्तानजनकतयैव वेगोऽनुमास्यत इत्यत आह न चेति। तत्प्रतीतिर्वेगप्रतीतिः। कर्म्म न कर्म्मजनकमित्यत्र नियामकाभावात्, तत्

न्यायलीलावतीप्रकाशः

क्षणिकत्वेऽपि भूयोवच्छेदेन क्वचिदुत्तरसंयोगाच्छीघ्रत्वम्। संयोगेति। तथाच तेनैव रयेण गच्छतीति प्रतीतेरन्यथासिद्धेर्न ततो वेगसिद्धिरित्यर्थः। ननु कर्मणः कर्मासाध्यत्वात् कर्मान्तरेण च विना देशान्त-

न्यायलीलावतीप्रकाशविवृतिः

तेत्येकमेव कर्मेत्यत आह कर्मणां चेति। अन्यथैकत्वेऽपि कुतः शीघ्रत्वं कर्मद्वैजात्यवादश्च तुल्य एवेति भावः। तथाच लाघवादुत्तरसंयोगत्वेनैव नाशकत्वमिति न कर्मैक्यमिति भावः। ननु वेगक्षणिकतयामुत्तरकर्मोत्पत्तिवत् कर्मक्षणिकतायामुत्तरकर्मोत्पत्तिप्रसङ्गः। पूर्वकर्मणो नष्टत्वादुत्तरकर्मणश्चासमवायिकारणाभावेनानुत्पत्त्याऽसमवायिकारणाभावात्। न चात एव वेगैक्यस्वीकार इति वाच्यम्। विनिगमकाभावेन कर्मैक्यस्वीकारापत्तेः, तथाच कुतस्त्वदुक्तप्रसङ्गः। उत्तरसंयोगत्वेनैव कर्मनाशकत्वमिति यदि, तदा तत्त्वेनैव वेगनाशकत्वमित्यपि तुल्यम्। एतेन द्वयोरपि विनिगमकाभावेन क्षणिकत्वमिति परास्तम्। पूर्वयोरुत्तरसंयोगेन नाशे उत्तरयोरनुत्पत्तिप्रसङ्गात् असमवायिकारणस्य कार्यसमानकालत्वनियमात्, तन्नियमानभ्युपगमे च कर्मण एवासमवायिकारणत्वसम्भवेन वेगासिद्धिप्रसङ्गात्। तस्माद्विनिगमकाभावेन द्वयोरपि स्थायित्वमित्येव ज्ञायत इति। मैवम्। कर्मैक्ये वेगासिद्धिप्रसङ्गात् उत्तरकर्मकारणत्वेनैव तत्सिद्धेः। न च प्रत्ययादेव तत्सिद्धिः। तस्यागृहीतविच्छेदनानाकालस्थायिकर्मालम्बनत्वात्, तस्मात्स्वजन्यसंयोगत्वेनैव कर्मनाशकतायां लाघवसिद्धायामुत्तरकर्मकारणतया वेगसिद्धिरिति तत्क्षणिकतायां धर्मिग्राहकमानावरोधेन चरमसंयोगत्वेनैव वेगनाशकत्वकल्पनात् गौरवस्य प्रामाणिकत्वात्। न च कर्मैक्यमेवास्त्विति वैपरीत्यम्, कर्मनानात्वमुपजीव्य तत्कल्पने उपजीव्यविरोधादिति। कर्मान्तरेणेति।

(१) कर्मकल्पनासाध्यमिति प्रा० पु० पाठः।

न शब्दः शब्दसाध्य इति ध्वनिसंयोगविभागकल्पनापत्तेः। वेगशब्दस्य शिष्टैराशुपर्यायत्वेन स्वीकारात्, तस्य च समयभेदवाचित्वात्। न चोभयवाचित्वं कल्पनागौरवात्। ततोऽभिलापभेदावभासिनी प्रतिपत्तिः समयभेदमेवाश्रयते इति प्राप्तम्। मैवम्। सन्तानाशूत्पादस्यानाकलनेऽप्यन्तरा सम्भविनां वेगबुद्धिविषयत्वात्, सन्तानिनां क्रियासंयोगक्षणानामाशुभावस्य

न्यायलीलावतीकण्ठाभरणम्

कर्मैव कर्मजनकमिति न वेगसिद्धिरित्यर्थः। ध्वनिर्वायवः। यत्रापि ध्वन्यादिकं नास्ति द्वितीयादिशब्दोत्पादनार्थं तत्कल्पना स्यादित्यर्थः। ननु वेगशब्दवाच्येन केनचित् अवश्यं भाव्यं स एव वेग इत्यत आह वेगेति। उभयेति। समयभेदो गुणान्तरं वेगश्चेत्युभयम्। अभिलापभेदो वेग इति शब्दभेदः। रयेण भ्रमत्यलातचक्रमित्यत्र भ्रमणैक्यप्रत्ययानुरोधादेकस्य वेगस्य सिद्धेरिति समर्थयति सन्तानाशूत्पादस्येति। अन्तरा सम्भविनामिति। भ्रमणान्तरा सम्भाविनामित्यर्थः। ननूक्तं संयोगविभागप्रबन्धोत्पादादाशूत्पादप्रतीतिरित्याह सन्तानिनामिति। न च

न्यायलीलावतीप्रकाशः

रप्राप्तेरभावादुत्तरकर्मजनकतया वेगः सिद्ध्येदित्यत आह नचेति। तत्प्रतीतिः-वेगप्रतीतिः। दूषयति अत्रेति। अनुकूलतर्काभावादित्यर्थः। प्रतिकूलतर्कमप्याह अन्यथेति। ध्वनिर्वायुधर्मविशेषः। नापि वेगशब्दप्रयोगविषयतया वेगसिद्धिरित्याह वेगशब्दस्येति। अभिलापो वेगेनेत्येवंरूपः। सन्तानाशूत्पादस्येति। क्रियासंयोगविभागसन्तानाशूत्पादस्येत्यर्थः। ननु सन्तानाशूत्पादानाकलनेऽपि सन्तानिनामाकलनं स्यात् कर्मणः क्षणचतुष्टयावस्थायित्वेन तदाधारकालस्य प्रत्यक्षत्वादित्यत आह सन्तानिनामिति। वेगप्रतीतेरतिरिक्तगुणालम्बनत्वमिति शेषः। ननु

न्यायलीलावतीप्रकाशविवृतिः

उत्तरकर्मविनेत्यर्थः। ननु ध्वनिकारणत्वकल्पनयापि शब्द एव शब्दजनक आयात इत्यतो व्याचष्टे ध्वनिर्वायुर्धर्मविशेष इति। तथाच ध्वनेः संयोगविभागयोरसमवायिकारणत्वकल्पनापत्तेरिति मूलार्थ इति भावः। सन्तानिनामिति। आशूत्पादस्येति शेषः। क्षणाचतुष्टयावस्थायित्वेने

कालकलात्मनोऽप्यक्षविषयत्वात् । वेगेन भ्रमतीत्यादौ गुणारोपात् । संयोगविभागातिरिक्तकर्माणि चलतीति गतिविषयतावत्

न्यायलीलावतीकण्ठाभरणम्

भ्रमणमेव वस्तुतस्तत्र एकमित्येकत्वप्रत्ययो न वेगैकत्वालम्बन इति वाच्यम् । कर्म्मणामुत्तरसंयोगनाश्यत्वेन नानात्वव्यवस्थितेः । किञ्च वेगस्य भ्रमणकारणत्वमपि गृह्यत एवेत्याह वेगेनेति । गुणारोपणात् गुण एव तत्प्रतीतेरित्यर्थः । यद्वा वेगेन भ्रमतीत्यादौ वेगः कर्म्मगतः कथं प्रतीयते इत्यत आह वेगेनेति । कर्म्मण्येव तत्र गुणारोप इत्यर्थः । किञ्च यथानुभवबलात् कर्म्म संयोगविभागाभ्यामन्यत्सिध्यति तथा वेगोऽपीत्याह संयोगेति । ननु कर्म्मैव कर्मजनकमस्तु कथमन्यथा शरी-

न्यायलीलावतीप्रकाशः

मानान्तरोपनीतकालकलाविषयत्वे प्रतीतेर्न विरोधः, अन्यथा इदानीं घटो जात इत्यादेर्व्यवहारस्य विलयापत्तेः । अत्राहुः । कर्मणां तावदाशूत्पादो न गृह्यते तेषामेकत्वपरिच्छेदात् , नापि संयोगादीनां, तमसि चलत्यलातचक्रे तदसम्भवात् , ऐन्द्रियकाणां संयोगिनामप्यध्यक्षाविषयत्वात् व्योमादेश्चातीन्द्रियत्वात् । ननु यदि वेगो गुणान्तरं तदा कर्मनिष्ठतया कथं तत्प्रतीतिरत आह वेगेनेति । यथा चिरेण गच्छतीत्यत्र चिरत्वं कर्मगतं प्रतीयते तथा वेगेन गच्छतीत्यत्र वेगः कर्मगतः प्रतीयते. सा च प्रतीतिर्वेगाख्यगुणारोपरूपेत्यर्थः । संयोगविभागेति । संयोगविभागातिरिक्तं कर्म यथा चलतीतिप्रतीतेर्विषयः, तथा क्रियातिरिक्तवेगोऽपि वेगप्रतीतेर्विषय इत्येतावन्मात्रेण दृष्टान्तः । नन्वेवं चिरत्वमपि गुणान्तरं स्यात् चिरेण गच्छतीत्यनुभवात् । न च कर्मसंयोगाद्युत्पादविलम्बस्तद्विषयः, तदाशूत्पादवत् प्रतिक्षेपात् । अत्राहुः। उत्तरकर्म असमवायिकारणजन्यम्, न च कर्मैव

न्यायलीलवतीप्रकाशविवृतिः

क्षणचतुष्टयावस्थायित्वव्यवहारेणेत्यर्थः । एतावन्मात्रेणेति । अतिरेकयमात्रे दृष्टान्त इति भावः । प्रतिक्षेपादिति । अप्रतिक्षेपे वा वेगप्रमितेरप्याश्रयोत्पादविषयतया न ततो वेगसिद्धिरिति भावः । उत्तरकर्मेति । कर्मत्वादाद्यकर्मवदिति शेषः । यद्यपि विलम्बितमुत्तरकर्मासमवा-

वेगस्य शरादिधर्मत्वेनावभासनात् । अन्यत्र शरीरादौ तूत्तरोत्तरकर्मजननं प्रयत्नादेव भविष्यतीति ॥ इति संस्कारः ॥

न्यायलीलावतीकण्ठाभरणम्

रे वेगमन्तरेणापि कर्म्मसन्तान इत्यत आह—अन्यत्रेति । तत्र प्रयत्नवदात्मसंयोग एवासमवायिकारणमित्यर्थः ।

विहितनिषिद्धक्रिययोराशुविनाशितया चिरभाविस्वर्गनरकप्रतिसाधकात् साधनानुपपत्त्या तावदपूर्वं कल्पनीयं, तच्चान्यथासिद्धं देवप्रीतिद्वेषयोरेव तदुपपत्तेः, तयोरप्याशुविनाशित्वमिति यदि तदा

न्यायलीलावतीप्रकाशः

तत्रासमवायिकारणं तस्य कर्मान्तरासमानकालत्वात्, असमवायिकारणानां च कार्यसमानकालत्वनियमात् । नचैकमेव कर्म, पूर्वनिरस्तत्वात् । ननु यदि कर्म न च कर्मजनकं तदा वेगरहिते शरीरादौ कथमुत्तरोत्तरकर्मजन्मेत्यत आह अन्यत्रेति । न शब्दः शब्दजनक इत्यत्र च श्रोत्रमात्रवेद्यासमवाय्यन्यत्वमुपाधिः स्फुट इति न पृथक् दूषितम् ॥

न्यायलीलावतीप्रकाशविवृतिः

यिकारणजन्यमित्यनुमानाच्चिरत्वमपि गुणान्तरं स्यादिति पूर्वपक्षस्तदवस्थस्तथापि अल्पावयवावच्छिन्नसंयोगजनककर्मण एव तद्विषयत्वं, तच्च वेगादेवोपपन्नमिति न तत्कल्पनमिति भावः । तस्येति । न चैतदासिद्धम्, नानापुरुषसाधारणमूर्त्तवृत्त्येकवृत्तिजन्यधर्मस्य सजातीयसमानाधिकरणप्रतिबन्धकत्वनियमेन तत्सिद्धेरिति भावः । श्रोत्रेति । श्रोत्रमात्रवेद्यस्य यदसमवायि तदन्यत्वमित्यर्थः । भेर्याकाशसंयोगादेरपि व्यावर्त्तनान्न पक्षेतरत्वम् । यत्किञ्चित्ताहशान्यत्वमुपाधिरिति मतेऽपि पक्ष इति साधनव्यापकतापरिहाराय । मात्रपदं कार्त्स्न्यार्थं वेद्यपदोत्तरान्वितं सामान्याभावलाभाय । असमवायित्वं च यद्यपि कारणत्वगर्भमिति कारणान्यत्वमेव सम्यक्, तथाप्यखण्डाभावे न वैयर्थ्यमित्येके । वस्तुतः शब्दाजनके शब्दध्वंसकारणेऽन्त्यशब्दे साध्याव्यापकत्वमित्यसमवायिपदम् । न च श्रोत्रवेद्यान्यत्वमेव सम्यक्, कृत्यादौ साध्याव्यापकत्वात् । अन्ये त्वन्यथा व्याचक्षते श्रोत्रमात्रवेद्यत्वे सति यदसमवायि तदन्यत्वमिति । अत्र सत्यन्तं कत्वादौ उत्तर

कथं पुनः पुरुषविशेषगुणो धर्मः सिद्ध्यति ? यागाद्याराधितदेवताप्रीतिरेव फलं फलिष्यतीति । तथा हि विवादाध्यासितं(१) सुखमाराध्यचेतनपूर्वकम् आराधनाप्रसूतत्वात् भूपालाराधनाप्रसूतसुखवत् । तन्न । देवदत्ताद्यदेहादिकं भोक्तृविशेषगुणप्रेरितभूतपूर्वकं देवदत्तप्रतिनियतभोगसाधनत्वात् स्रगा-

न्यायलीलावतीकण्ठाभरणम्

अनुभवजनितसंस्कार एव द्वारमिति नापूर्वसिद्धिरित्याह--कथमिति । धर्म इत्युपलक्षणम्, अधर्मोऽपि कथमित्यर्थः । धर्मपदमदृष्टरूपधर्मपरं वा, अत एव वक्ष्यति "तदेव स्वर्गनरककारणमि"ति । विवादाध्यासितमिति । स्वर्गरूपमित्यर्थः । आराधना गौरवितप्रीतिहेतुः क्रिया यागदानरूपा । आराध्यचेतनपूर्वकमिति । तत्प्रीतिपूर्वकमित्यर्थः । देवदत्ताद्येति । देवदत्ताद्यशरीरं देवदत्तविशेषगुणजन्यं जन्यत्वे सति तद्भोगज-

न्यायलीलावतीप्रकाशः

स्वर्गकामो यजेतेतिविधेर्यागस्य साक्षादसाधनस्य साधनता प्रतीता व्यापारं विनाऽनुपपद्यमाना स्वनिर्वाहकमपूर्वं कल्पयतीत्याक्षिपति कथमिति । देवताप्रीतिरेव यागस्य व्यापारः, न च तस्य तज्जनकत्वे मानाभावः, "यज देवपूजायामि"ति शाब्दिकस्मृतेः, पूजायाश्च गौरवितप्रीतिहेतुक्रियात्वात् , प्रीतेश्चाशुतरविनाशित्वेऽपि तदनुभवजन्यसंस्कारद्वारा हेतुत्वसम्भवात् किमपूर्वकल्पनयेत्यर्थः । देवदत्तेति ।

न्यायलीलावतीप्रकाशविवृतिः

दलं तन्तुसंयोगादावप्यस्तीति साध्याव्यापकत्वपरीहाराय विशिष्टं प्रतियोगित्वेनोपात्तम् । मात्रपदं च उपनीतभानमादाय तन्तुसंयोग एव साध्याव्यापकत्वनिरासाय । विशेष्यता श्रोत्रग्राह्यत्वलाभायेति तथासति पक्षेतरतापत्तेः । विशेष्यतालाभेऽपि सामान्यप्रत्यासत्तिमादाय साध्याव्यापकत्वाच्च । साधनाव्यापकत्वं तु सन्दिग्धमेव शाकपाकजत्वादाविवेति दिक् ॥

आक्षेपाधिकरणं पूरयति स्वर्गकाम इति । मनसीति । एतच्च यदि मूले प्रेरितमिति पाठस्तदा, यदि प्रेरितभूतपूर्वकमिति तत्र पाठस्तदा प्रका-

(१) दास्पदं इति मु० पु० पाठः ।

दिवदिति (१)पक्षधर्मतया तत्सिद्धिः। तथा हि वर्तमानकार्यनिष्पादकानां भूतसूक्ष्माणां क्षेत्रज्ञस्य न प्राग्भवीयमिच्छादिकं प्रेरकम्, तस्यानागतदेहोपादानवेदनाभावात्, अतोऽन्यद्विशेषगु-

---

न्यायलीलावतीकण्ठाभरणम्

नकत्वात् तन्निर्मित्तस्रग्वदित्यर्थः। तेन प्रेरितत्वं यदि जन्यत्वं तदा मनसा अनैकान्तिकम्, तज्जन्यक्रियाश्रयत्वं चात्मन्यनैकान्तिकमित्यादिदोषानवकाशः। न च संस्कारेण अन्यथासिद्धिः, तस्य स्मृतिमात्रजनकत्वेन शरीराजनकत्वात्। आद्यशरीरं च सर्गाद्यकालीनं शरीरमभिप्रेतम्, तेनेदानीन्तनशरीराणां पूर्वशरीराव्यवहितोत्तरमभावित्वेऽपि न तज्ज्ञानादिना अन्यथासिद्धिः। पक्षधर्म्मताबलमेव स्पष्टयति तथा हीति। अनागतदेहेति। तदुपादानाभिज्ञस्यैव तत्कर्त्तृत्वात्। न चेश्वरज्ञानादिकमेव तथा स्यादिति वाच्यम्। तथा सति जन्मवैचित्र्यानुपपत्तेः। न च चिरध्वस्तस्य यागादेरेव कारणत्वमस्तु किं व्यापारेणेति चेन्न। चिरध्वस्तं व्यापारवदेव कारणमिति पूर्वानुभवे स्मृतिजनके कल्पनात्। न च क्रियैव यागादिरनुवर्त्ततां, तस्य

न्यायलीलावतीप्रकाशः

ननु भोक्तृविशेषगुणप्रेरितत्वं यदि तज्जन्यत्वं तदा मनस्यनैकान्तिकम्। प्रतिनियतभोगसाधनत्वमपि यदि भोगावच्छेदकत्वमात्रं, यदि वा देवदत्तभोगासाधारणकारणत्वमुभयथापि दृष्टान्तासिद्धिः, नहि देवदत्तनिर्मितस्रजो देवदत्तभोगावच्छेदकत्वं देवदत्तमात्रभोगजनकत्वं वा। अत्राहुः। संस्काराजन्यं देवदत्ताद्यशरीरं देवदत्तविशेषणगुणप्रेरितं जन्यत्वे सति देवदत्तभोगसाधनत्वात् देवदत्तनिर्मितस्रग्वत्। पक्षविशेषणमहिम्ना न संस्कारेणान्यथासिद्धिः। न च प्राक्कालीनशरीरमाधुनि-

न्यायलीलावतीप्रकाशविवृतिः

शेऽपि प्रेरितत्वमिति समस्तसाध्योपलक्षकं द्रष्टव्यमन्यथा विकल्पासङ्गतेः। भोगावच्छेदकत्वं–देवदत्तभोगावच्छेदकत्वम्। देवदत्तमात्रेति। कदाचित्सम्भवेऽपि नियमाभावादिति भावः। देवदत्तनिर्मितेति। तद्भोगसाधनेत्यपि बोध्यम्। नचेति। पूर्वशरीरे सत्येवोत्पन्नशरीरे मरणो

---

(१) नियतपक्षेति मु० पु० पाठः।

णान्तरं वाच्यम् । तच्च कार्यं भोक्तृविशेषगुणत्वात् सुखवत् । तस्य च कारणं यागादिकमेव, स्वर्गसम्पादक(१)कारणान्तरकल्पनायां कल्पनागौरवप्रसङ्गात् । कल्पनागौरवं च तस्यापि विशेषगुणस्य यागादिव्यतिरिक्तनिष्पाद्यत्वस्वीकारे तज्जनकस्य च

न्यायलीलावतीकण्ठाभरणम्

इच्छारूपत्वेन विरोधिगुणनाश्यत्वकल्पनात् तदुत्तरमननुभवाच्च । न च यागध्वंस एव व्यापारः स्यादिति वाच्यम् । प्रतियोगिध्वंसयोरेकत्राजनकत्वात् । अन्यदिति । प्राग्भवीयज्ञानेच्छादेः विशेषगुणान्तरं विशेषगुणविशेषः । ननु तदकार्य्यमेव स्यात्तथाच न यागादेर्व्यापार इत्यत आह-तच्चेति । भोगनिष्पादकमिति । भोगसाधकत्वेन श्रुतं यत इत्यर्थः। उक्तमेव कल्पनागौरवं स्पष्टयति कल्पनेति । अदृष्टनिष्पादकस्यापि भोग-

न्यायलीलावतीप्रकाशः

कशरीरोत्पत्तिपर्यन्तं तिष्ठतीति ज्ञानमेव तज्जनकं स्यात् सर्गाद्यशरीरे तदभावात् वेदनाभावात् तदभावे चेच्छाद्यभावादिति भावः । न चानागते प्रत्यक्षाभावेऽप्यनुमानं स्यात्, तद्ध्यनुमानं नाद्यदेहाव्यवहितप्राक्काले तत्काले देहाद्यभावात् व्यवहितस्यान्तरितत्वेन कथं तद्देहजनकत्वम् । नचाप्रयोजकमेतत्, यागादेरेवातीतस्य जनकत्वसंभवात् अनन्यथासिद्धनियपूर्ववर्त्तित्वस्याक्षतेः । न चातीतस्य कालान्तरभाविकार्यजनकव्यापारनिर्वाहेन तत्करणत्वम्, उत्तरवर्त्तित्वेन व्यापारस्य तत्रासामर्थ्यात् । नापि ज्ञापनम्, लिङ्गेन ज्ञापनात् । न च चिरध्वस्तं कारणं व्यापारव्याप्तम्, विपक्षे बाधकाभावेनाप्रयोजकत्वात्, "धर्मः

न्यायलीलावतीप्रकाशविवृतिः

त्तरमात्मोपग्रहात् । न च तथापि प्राणादिसंयोगं पक्षयित्वाऽदृष्टानुमानमिति वाच्यम् । तत्रापि मरणाव्यवहितप्राक्कालिकज्ञानेनार्थान्तरत्वादिति भावः । तदभावादिति । अव्यवहितपूर्वं शरीराभावेन ज्ञानाभावादित्यर्थः । ननु तथापीच्छादिनार्थान्तरमत आह तदभावे चेति । तत्काले देहेति । अनागतदेहाव्यवहितस्यान्तरितत्वेनाभावेनेत्यर्थः । शरीराभावादिति भावः । केचित्तु देहस्य यदाद्यं कारणं तेन व्यवहित-

(१) मेव भोगानिष्पादकं कारणान्तरेति पाठो मिश्रसम्मतो मु० पु० बोध्यः ।

न्यायलीलावतीप्रकाशः

क्षरति कीर्त्तनादि"त्यस्य च कीर्तनाद्विहितक्रिया क्षरति फलं न जनयतीत्यर्थः। न च मुख्ये बाधकाभावान्न लक्षणा, उपस्थितविहितक्रियायामेव धर्मपदशक्तिग्रहस्य बाधकत्वात् , विहितकर्तृत्वज्ञाने सति धार्मिकपदप्रयोगाच्च । एवं चानुमाने जन्मान्तरीयज्ञानादिभिरेवापूर्वजनकत्वाभिमतैः सिद्धसाधनमपि। मैवम् । चिरध्वस्तस्य व्यापारसत्त्वे कारणत्वमिति निरुपाध्यन्वव्यतिरेकाभ्यां व्याप्त्यवधारणात् ,यागस्य चिरध्वस्तस्य कारणत्वेन व्यापारकल्पनात् । न च कार्ये व्यापारस्य पृथगन्वयव्यतिरेकग्रहः तद्व्यापारकतायामुपाधिः, संस्कारे तदभावेपि अनुभवस्य तद्व्यापारकत्वात् । न चाप्रयोजकत्वम्, यागो यदि चिरध्वस्तत्वे सव्यापारो न स्यात स्वर्गकारणं न स्यात् घटवदिति विपक्षे बाधकात् । न चात्र कारणताग्राहकाभाव उपाधिः, तेनापि समं व्याप्त्यवधारणेन तस्याप्यापादनात् । ननु ध्वंस एव तद्व्यापारोस्तु तस्यानन्तत्वेऽपि स्वभावात् सावधिफलजनकत्वमित्युभयमपि जनकमिति वाच्यम् । प्रमाणान्तरविरोधेन यागजन्ये स्वर्गे

न्यायलीलावतीप्रकाशविवृतिः

स्यान्तरितत्वेन निर्व्यापारत्वेनेत्यर्थः । व्यापारस्वीकारे चादृष्टसिद्धिरिति भावः। इति व्याचक्षते उपस्थितेति। क्षरणस्य ध्वंसपर्यायत्वमाभिप्रेत्येदमुक्तं समाधानमन्यथा स्पन्दनशक्तस्य तस्य त्वन्मतेऽपि लाक्षणिकत्वादिति भावः। एवं चानुमानेति । निर्व्यापारस्याप्यतीतस्य हेतुत्वाभ्युपगमादिति भावः। सिद्धसाधनमपीत्यपिः पूर्वोक्ताप्रयोजकत्वसमुच्चये । चिरध्वस्तस्येति । यद्यप्यप्रयोजकमिदं व्यापाराभावेऽपि कारणताशरीरप्रविष्टानन्यथासिद्धत्वनियतपूर्ववर्त्तित्वाक्षतेः, शङ्कितोपाधेरपि न साध्याव्यापकत्वं तुल्यन्यायेन संस्कारस्याप्यनङ्गीकारात्तथापि कारणताऽव्यवधानगर्भैव वाच्या, अन्यथा रासभस्यापि वह्निकारणतापत्तेरनादौ संसारेऽवश्यं तद्देशे तत्समवधानात् व्यवधानं च स्वजन्येतराव्यवधानमेवेति स्वयं व्यवहितस्य यागादेरव्यवधाननिर्वाहकत्वेनापूर्वसिद्धिः । इदमेव चोक्तव्याप्तौ विपक्षबाधकमपि, अत एव च ध्वंसोऽपि न व्यापारस्तथापि सत्यपि रासभातिप्रसङ्गसम्भवेन तदतिरिक्तव्यापारस्यैव व्यवधानेन निर्वाहकत्वादिति दिक् । यत्तु सत्तानिर्वाहाय कल्प्यमानो व्यापारो ध्वंसान्य

भोगजनकत्वं यागादेश्च । एवं यदि देवताप्रीतिरपि तन्निदानं को विरोधः । तदेतत्स्वर्गनरककारणम् । कुतः पुनस्तयोः सिद्धिः ? आगमादिति चेत् । न, यत्सुखं तदभिलाषोपनीतत्वादि-

---

न्यायलीलावतीकण्ठाभरणम्

जनकत्वं यागादेश्च श्रुतिबलादेवेत्यर्थः । अभ्युपगमवादेनाह-एवमिति । एतदिति । अदृष्टमित्यर्थः । तयोरिति । स्वर्नरकयोरित्यर्थः। अहं सुखदुःखोभयजनकशरीरान्यशरीरवान्नवेति विप्रतिपत्तिः । आगमादिति ।"यन्न दुःखेन सम्भिन्नमि"त्यादेः । यत् सुखं न तदभिलाषोपनीतं यत् सुखं तन्न दुःखासम्भिन्नं न वा विच्छिन्नमित्यादितर्कप्रतिघातादयोग्यतया तस्यागमस्य ज्ञानाजनकत्वादित्याह यदिति । वाक्यस्यागमस्य । ननु तादृशं सुखविशेषमन्तरेण बहुवित्तव्ययायासाध्ये प्रवृत्तिरेव न

न्यायलीलावतीप्रकाशः

तद्ध्वंसस्य जनकत्वाकल्पनात् । एवं यदीति । अयं चाभ्युपगमवादः । वस्तुतो यागस्य देवताप्रीतिजनकत्वे मानाभावः । "यज देवपूजाया-मि"ति हि शाब्दस्मृतिः स्मृतित्वादेव न स्वतः प्रमाणम् । न च यागस्य देवताप्रीतिजनकत्वे मानान्तरमस्ति, न वा तस्याः व्यापारत्वं सम्भवति, कृतिभोगसमानाधिकरणस्य फलावसानिकस्य व्यापारस्य कल्पनात् , लाघवात् संस्कारस्य स्वजनकानुभवविषयमात्रे फलजनकत्वस्वभावत्वाच्च । तुल्यन्यायेन धर्मवदधर्मस्यापि सिद्धिरित्यभिप्रेत्य सिद्धवदाह तदेतदिति । अदृष्टमित्यर्थः । अहं सुखदुःखोभयजनकमच्छरीरातिरिक्तशरीरवान्नवेति संशयः । यत्सुखमिति । निरु-

न्यायलीलावतीप्रकाशविवृतिः

एव ध्वंसस्य सत्ताविरोधित्वादिति । तत्तुच्छम् परिभाषिकयां सत्तायां ध्वंसस्याविरोधित्वादिति । ननु शाब्दिकस्मृतिमूलीभूतमेव प्रमाणं प्रमापकं भविष्यतीत्यरुचेराह नवा तस्या इति । लाघवादिति । फलव्यधिकरणव्यापारस्य परम्परासम्बन्धेन तदुपपादकतायां गौरवादित्यर्थः । देवताप्रीतेराशुविनाशितया व्यापारत्वं न सम्भवत्येवेति तज्जन्यसंस्कारस्य तथात्वं वाच्यं, तथासत्याह संस्कारस्येति । स्वर्गनरकान्यतरस्मिन् संशयमाह अहमिति । प्रसिद्ध्यर्थं सत्पदम् । ऐहिकशरीरस्य ध

शून्यमेवेति तर्कसम्भवेन योग्यताविरहाद्वाक्यस्याप्रतिपादकत्वात् । न च प्रवृत्त्यनुपपत्तिः(१), सर्वस्वदक्षिणादावपि सप्तद्वीपाधिपत्यस्यैव नानाजन्मानुगन्तृत्वकालभूयस्त्वादीनां सम्भवात्, ततो मर्त्यलोकभोग्यमेव सुखं न च परलोकसिद्धिरिति चेत्। मैवम् । एषां तर्काणां विपर्ययापर्यवसानादाभासत्वात् स्वर्ग(२)सिद्ध्यासिद्धिभ्यां व्याघातात् । एवंभूतस्य चैतद्भुवनासम्भावितत्वेन लोकान्तरसिद्धिः । एतद्वन्नरकसिद्धिरपि । तथा चैतदुपभोक्तृदेवशरीरादिवत् प्रेतादिशरीरसिद्धिरपि ॥ इति धर्माधर्मौ ।

न्यायलीलावतीकण्ठाभरणम्

स्यादित्यत आह नचेति । उपपत्तिरिति । विशिष्टसुखोपपत्तिरित्यर्थः। विपर्ययेति। अभिलाषोपनीतं चेत्तस्मान्न सुखमिति विपर्ययोऽभिलाषोपनीतसुखमन्तरेणापर्यवसन्न एवेत्यर्थः। तदेवाह स्वर्गेति । यद्वा स्वर्गो न सुखमभिलाषोपनीतत्वादिति विवक्षितव्याघात इत्यर्थः । ननु ननु तादृशमपि सुखमेतद्भुवनभोग्यमेव स्यात्तथा च न परलोकसिद्धिरित्यत आह । एवंभूतस्येति । ननु द्वीपान्तरे तादृशं सुखं स्यादिति

न्यायलीलावतीप्रकाशः

पाधिसहचारेण व्याप्तिग्रहमूलतर्करूपबाधकसत्त्वात्तदभावात्मकयोग्यताज्ञानविरहादित्यर्थः । ननु "विफला विश्ववृत्तिर्नो न दुःखैकफलापि वे"त्यादियुक्तेः परलोकः सिध्यतीत्याशङ्क्य निराकरोति नचेति । यदि स्वर्गः सुखं स्यात् अभिलाषोपनीतत्वादिशून्यः स्यात्, अभिलाषोपनीतश्चायं, तस्मान्न सुखमित्यत्र स्वर्गसिद्धौ बाधोऽसिद्धौ चाश्रयासिद्धिरित्याह एषामिति । तदेव स्फुटयति स्वर्गसिद्धीति । एवंभूतस्येति । यद्यपि भौमभुवनासम्भवित्वं न परिच्छेत्तुं शक्यते, तथापि कर्मभूमि

न्यायलीलावतीप्रकाशविवृतिः

र्माधर्माभयारब्धत्वादन्यदीयशरीरस्य च बाधादन्यतरमात्रावच्छेदकशरीरसिद्धिरिति भावः । ननु कर्मभूमित्वमत्रोपाधिरत आह स्वर्गेति ।

(१) प्रवृत्त्यनुपपत्तेरुपपत्तिरिति प्रा० पु० पाठः मिश्रसंमतोऽत्र ज्ञेयः ।
(२) सुखगेति मु० पाठः ।

शब्दो द्रव्यं साक्षादिन्द्रियसम्बन्धवेद्यत्वात्, घटवत्। श्रोत्रं च द्रव्यग्राहकं निरवयवेन्द्रियत्वान्मनोवत्। नित्यश्चाद्रव्यद्रव्यत्वात् प०

न्यायलीलावतीकण्ठाभरणम्

चेन्न। कर्म्मभुवनभिन्ना भौमभुवनभूमिः स्वर्गशून्या भौमभुवनभूमित्वात् कर्म्मभुवनभूमिवदिति मानस्य सत्त्वात्।

शब्दोऽम्बरगुणमित्याक्षिपति शब्द इति। साक्षादिति। इन्द्रियसंयोगसमवायान्यतरवेद्यत्वादित्यर्थः। न चान्यतरासिद्धिः, शब्दानित्यत्वे कृतकत्ववदस्यापि साध्यत्वात्। प्रमाणान्तरमाह श्रोत्रमिति। तथा च पक्षधर्मताबलात् शब्दद्रव्यत्वासिद्धिः, तदन्यद्रव्याग्राहकत्वस्योभयसिद्धत्वात्। अद्रव्यद्रव्यत्वादिति। असमवेतद्रव्यत्वादित्यर्थः। नित्यत्वे हे०

न्यायलीलावतीप्रकाशः

भिन्ना भौमभुवनभूमिः स्वर्गशून्या भौमभुवनभूमित्वात् कर्मभूमिवत्, स्वर्गाभावस्य भौमभुवनभूमित्वप्रयुक्तत्वात्॥

शब्दस्याकाशगुणत्वमाक्षिपति शब्दो द्रव्यमिति। साक्षादिति। इन्द्रियसंयोगसमवायान्यतरवेद्यत्वादित्यर्थः। सम्बन्धत्वस्यैकस्याभावात् मानान्तरमाह श्रोत्रमिति। अत्र शब्दान्यद्रव्याग्राहकमिति पक्षविशेषणान्नार्थान्तरम्। न च साधनावच्छिन्नसाध्यव्यापको मनस्त्वमुपाधिः, शब्दस्य द्रव्यत्वसन्देहेन सन्दिग्धसाध्यव्यापकत्वात्। प्रसङ्गादाह

न्यायलीलावतीप्रकाशविवृतिः

लाघवेन भौमभूमित्वमेव तत्प्रयोजकमिति तस्याप्रयोजकत्वमिति भावः।

शब्दद्रव्यत्वसाधनमप्रस्तुतं द्रव्याधिक्यस्य पूर्वमेव निरासादत आह शब्दस्येति। तथात्र गुणन्यूनत्वशङ्कैवेयमिति भावः। सम्बन्धत्वस्येति। यद्यप्यविशिष्टव्यावृत्तविशिष्टधीनियामकत्वं सम्बन्धत्वं सुवचमेव, तथापि साक्षात्तन्निर्वचने गौरवम्, तद्घटितं च संयोगसमवायमात्रवृत्तिर्नास्त्येवेत्याशयेनेदमुक्तम्। शब्दान्येति। यद्यपि बाधादेव नार्थान्तरं, तथापि तत्स्फोरकमेव विशेषणमिति मन्तव्यम्। त्वक्चक्षुषोः साध्याव्यापकत्वमाशङ्क्याह साधनेति। शब्दस्य द्रव्यत्वेति। तथासति श्रोत्रस्याद्रव्यग्राहकत्वसन्देहे तत्रैव साध्याव्यापकत्वमिति भावः। यद्यप्येवमुपाधिमात्रोच्छेदापत्तिः पक्षे साध्यकव्यापतासन्देहात्,

त्यभिज्ञानाच्च। गुणवत्त्वाच्च द्रव्यम्। संख्याशब्द(१)वेगादयोऽपि हि शब्दधर्मा अनुभूयन्ते। न चारोपोऽयम्, अशब्दधर्माणां श्रोत्रावेद्यत्वेनाग्रहणात्। न चेद्रियान्तरोपनीतं तिक्तो गुड इतिवत्स्यात्। तेन तदानीम(२)प्रतीतावपि संख्यादेः श्रोत्रेण प्रतीतेः । न च

न्यायलीलावतीकण्ठाभरणम्

त्वन्तरमाह प्रत्यभिज्ञानाच्चेति। तावत्कालस्थैर्यसिद्धौ नाशकान्तराभावान्नित्यत्वसिद्धिरिति भावः। द्रव्यत्वे हेत्वन्तरमाह-द्रव्यमिति। गुणवत्त्वे हेतौ प्रमाणमाह संख्येति। वेगेन शब्दो दूरं गत इत्यनुभवो वेगेऽपि मानमित्यर्थः। अशब्देति। आरोपात्तदनुपपत्तेरित्यर्थः। तेनेति। इन्द्रियान्तरेणेत्यर्थः। तथाच नानुभूयमानारोप इति भावः। ननु स्मर्यमाणा·

न्यायलीलावतीप्रकाशः

नित्यश्चेति। यद्यपि प्रत्यभिज्ञानमात्रान्न नित्यत्वसिद्धिः, तथापि नाशकत्वाभिमतसद्भावेऽपि तत्सत्त्वे "तावत्कालं स्थिरं चैनमि"ति न्यायान्नित्यत्वसिद्धिरित्याह प्रत्यभिज्ञानाच्चेति। निरवयवेन्द्रियजन्यप्रत्यभिज्ञानविषयत्वमत्र विवक्षितमतो घटादौ नानैकान्तिकमित्यन्ये। वेगादय इत्यादिपदेन महत्त्वादिसंग्रहः। नच विशेषगुणवत्त्वाभावेन तस्याप्रत्यक्षत्वं तद्वत एव द्रव्यस्याध्यक्षत्वादिति वाच्यम्। नादस्य विशेषगुणस्य शब्दनिष्ठतया प्रतीयमानत्वात्। अशब्दधर्माणामिति। इन्द्रियान्तरवेद्यानामित्यर्थः, अन्यथा शब्दे व्यभिचारात्। तेन-इन्द्रि·

न्यायलीलावतीप्रकाशविवृतिः

तथापि सङ्ख्यागुणवत्त्वादिलक्षणविप्रयुक्तोऽयं सन्देहः श्रोत्रस्य शब्दग्राहकत्वनिश्चयादिति नोपाधिमात्रोच्छेदः स्वाभाविकसंशयस्थल एव तस्य दोषत्वादिति वदन्ति। प्रसङ्गादिति। उपेक्षानर्हत्वं चास्य निरवयवेन्द्रियद्रव्यत्वे नित्यतापत्तिः पूर्वानुमाने प्रतिकूलतर्कपराघाते इष्टापत्तिप्रतिपादतकयेति भावः। यद्यपीति। घटादौ व्यभिचारादिति शेषः। तथापीति। तथाच किञ्चित्कालीननाशाभावे प्रत्यभिज्ञया विषयीकृते कालान्तरीयनाशाभावेन च नाशकाभावादवृत्ते(?)नित्यतासिद्धिरिति भावः। निरवयवेति। न चानागतानुभवानन्तरं यस्य सुखस्य

(१) संख्यावेगादयो हीति प्रा० पु० पाठः। (२) तेनेन्द्रियान्तरेणाप्रतीताविति मु० पु० पाठः।

स्मृत्युपनीतसंख्यादिसंभेदग्रहः । इन्द्रियस्य तदग्राहकत्वेनायोग्यत्वात्(१) । अन्यथा जम्बीरबीजपूरादौ रसाद्रूपानुमानभङ्गप्रसङ्गात् । तत्कथमम्बरगुणः शब्द इति चेन्न ।

साक्षादिन्द्रियसम्बन्धवेद्यत्वं हि यावत्प्रसक्तपारिशेष्याद्वा नि·

न्यायलीलावतीकण्ठाभरणम्

रोपः स्यादित्यत आह नचेति । सम्भेदः-स्मृतसंख्यादिवैशिष्ट्यम् । इन्द्रियस्येति । आरोपोऽपि श्रोत्रेण न सम्भवति आरोप्यसंख्यादिग्रहे तस्यासामर्थ्यात् । नन्वयोग्येनाप्युपनीतं गृह्यत एवेत्यत आह-अन्यथेति । रसनेन्द्रियेणैव चक्षुरुपनीतं रूपं तत्र गृह्येतेति क्वानुमानावकाश इत्यर्थः ।

यावदिति। द्रव्यं भवत् स्पर्शवन्निस्पर्शं वा स्यात्? आद्ये त्वगिन्द्रियवे·

न्यायलीलावतीप्रकाशः

यान्तरेण । अप्रतीताविति । अननुभूतावित्यर्थः । इन्द्रियस्येति । तदग्राहकत्वेन-उपनीताग्राहकत्वेनेत्यर्थः । इन्द्रियस्य इन्द्रियान्तराग्राह्यगुणग्राहकत्वनियमादिति भावः । अन्यथेति । स्मृत्युपनीतस्य रूपस्य रसनेन ग्रहणादित्यर्थः ।

यद्यपि संयोगसमवायान्यतरवेद्यत्वं न व्याप्यतावच्छेदकं गौरवात्, अश्रावणत्वं चोपाधिः, तथापि स्फुटत्वादेतदुपेक्ष्यान्यदाह साक्षादिन्द्रियेति । शब्दो न गुणाकर्मादिरूप इति प्रतिषेधे द्रव्य·

न्यायलीलावतीप्रकाशविवृतिः

प्रत्यभिज्ञानं तत्र व्यभिचार इति वाच्यम् । निरवयवेन्द्रियजन्यस्वजन्यसाक्षात्कारोत्तरभाविस्वजन्यप्रत्यभिज्ञानविषयत्वस्य हेतुत्वात् यथाश्रुतेनैवोपपत्तौ पदान्तरप्रक्षेपगौरवेन शब्दक्षणिकत्ववादिनां हेतोरसिद्ध्या चानुशयमाविष्करोत्वन्य इति । स्मृतेरग्रे शङ्कनीयत्वादाह अननुभूताविति । ननु तदग्राहकेनेत्येवासिद्धं स्मृत्युपनीतस्य ग्रहसम्भवादत आह इन्द्रियान्तरेति । इन्द्रियान्तरमात्रयोग्यग्राहकत्वनियमादित्यर्थस्तेन सत्तामादाय न नियमभङ्गः । मूले चात्र इन्द्रियस्येति पाठे चक्षुस्त्वगन्यबहिरिन्द्रियस्येति बोध्यम् । श्रोत्रस्येति पाठः सुगम एव ।

साक्षात्सम्बन्धवेद्यत्वमेव हेतुरस्त्वित्यरुचेराह अश्रावणत्वं चेति । तुल्ये-

(१) श्रोत्रस्य तदग्राहकत्वेनायोग्यत्वात्-इति पाठान्तरम् ।

श्रीयते एकदेशपारिशेष्याद्वा ? नाद्यः । तत एवाद्रव्यत्वनिरूपणे(न) लिङ्गग्राहकमानबाधात् । नेतरः । कर्मत्वादेरप्रतिषेधे संयुक्तसमवायादिवेद्यत्वशङ्कायां हेतोरसिद्धतापत्तिः । श्रोत्रं च न नित्यद्रव्यग्राहकम् अयोगिबाहिरिन्द्रियत्वात् चक्षुर्वदिति सत्प्रतिपक्षं द्वितीयानुमानम्(१) । यदि तु नित्यद्रव्यग्राहकं स्यान्न व्यापकद्रव्यग्राहकम् , अजसंयोगाभावात् । नाणुग्राहकम् , अणूनामतीन्द्रियत्वात् । नाणुविभुद्रव्यातिरिक्तद्रव्यग्राहकम् , निरवयवग्राहक-

---

न्यायलीलावतीकण्ठाभरणम्

द्यत्वापत्तिरन्त्येऽतीन्द्रियत्वापत्तेरिति पारिशेषादद्रव्यत्वसिद्धौ बाध इत्यर्थः । लिङ्गग्राहकेति । साक्षात्सम्बन्धः संयोगस्तावन्न भवति पारिशेष्येण शब्दस्याद्रव्यत्वासिद्धेस्तथाच समवायो वक्तव्यो विभुनि च द्रव्ये द्रव्यं न समवैतीति लिङ्गग्राहकमानबाध इत्यर्थः । नित्यपदं चक्षुरादौ व्यभिचारवारणार्थम् । द्रव्यग्राहकत्वे बाधकान्तरमाह यदि त्विति । व्यापकद्रव्यग्राहकं वा स्यात् अणुद्रव्यग्राहकं वा अवयविग्राहकं वा ? आद्य आह–व्यापकेति । श्रोत्रशब्दयोरुभयोरपि व्यापकत्वादन्यतरकर्म्मादिजन्यसंयोगबाधेऽजः स्वीकार्य्यः, स च न सम्भवतीत्युक्तमेवेत्यर्थः । द्वितीय आह नाण्विति । तृतीय आह नाणुविभुद्रव्येति । निरवयवेन्द्रियस्य निरवयवद्रव्यग्राहकता दृष्टा तदनुपपत्तिः स्यात, निरवयेन्द्रियस्यापि नि·

न्यायलीलावतीप्रकाशः

त्वस्यापि प्रतिषेधस्तुल्यन्यायतयेत्याह तत एवेति । द्रव्यग्राहकत्वप्रतिषेधे व्यभिचारः स्यादित्यत उक्तं नित्यद्रव्येति । सत्प्रतिपक्षमित्युपलक्षणम् , त्वक्चक्षुरन्यबहिरिन्द्रियान्यत्वं चोपाधिः । ननु नित्यद्रव्यग्राहकत्वनिषेधेपि न द्रव्यग्राहकत्वनिषेध इत्यत आह यदि त्विति । प्रत्यभि

न्यायलीलावतीप्रकाशविवृतिः

ति । गुणत्वादिबाधकवद्द्रव्यत्वादिबाधकस्यापि वक्ष्यमाणत्वादित्यर्थः । त्वगिति । त्वकचक्षुषोः साध्याव्यापकत्वादन्यान्तम् । मनसि

---

(१) द्वितीयमनुमानं सत्प्रतिपक्षम्–इति प्रा० पु० पाठः ।

तानुपपत्तिप्रसङ्गात् । अबाधितानुभवसिद्धविरुद्धधर्मसंसर्गविषयत्वात् प्रत्यभिज्ञाया बाधितत्वम् । अनुमानस्य च व्यतिरेकाप्रतीतौ व्यतिरेकासिद्धेः, तत्प्रतीतौ तु तुल्ययोगक्षेमतयैव शब्दस्यानित्यता(१)सिद्धेर्व्यतिरेकग्राहकमानबाधात् । अतः शब्दोऽनित्य एव । आरोपोऽपि च गौरोऽहमितिवदुपपत्स्यते । रसानुमानव-

---

न्यायलीलावतीकण्ठाभरणम्

रवयवद्रव्यग्राहकतायास्त्वयाऽनभ्युपगमादित्यर्थः । अबाधितेति । तारत्वमन्दत्वविरुद्धधर्माध्यासेन गकारादिभेदसिद्धौ व्यक्त्यभेदविषयता बाधितेति तज्जातीयत्व(म्)ादाय प्रत्यभिज्ञापत्तेरित्यर्थः । नित्यः शब्दोऽद्रव्यद्रव्यत्वादित्यनुमानं दूषयति अनुमानस्येति । व्यतिरेकाप्रतीताविति । अनित्यत्वाप्रतीतावित्यर्थः । केवलान्वयी च त्वन्मते नास्तीत्यर्थः । तुल्ययोगेति । नष्टो घट इति प्रतीत्या यथाऽनित्यत्वं तथा श्रुतपूर्वो गकारो नास्तीति प्रतीत्या शब्दानित्यत्वमपि सिद्धमेवेत्यर्थः । आरोपोऽपीति । शब्दे गुणान्तरारोपो यथा चक्षुषा स्वायोग्यस्याप्यहमास्पददस्यारोपः शरीरे तथा स्यादित्यर्थः । ननूक्तं रसेन रूपानुमानं न

न्यायलीलावतीप्रकाशः

ज्ञानाच्च नित्य इति दूषयति अबाधितेति । तारत्वमन्दत्वादेरुपाध्यप्रतीतावपि शब्दधर्मत्वेन भासनात् स्वाभाविकत्वस्थितौ विरुद्धधर्माध्यस्तविषयत्वेन प्रत्यभिज्ञानस्य तज्जातीयविषयत्वनियमादित्यर्थः । ननु बाधितत्व एव तात्पर्यं तारान्मदोऽन्य इत्यनुभवानन्तरमपि स एव गकारोयमिति प्रत्यभिज्ञानात्, विशेषदर्शने च सति भ्रमानुदयादित्यन्यत्र विस्तरः । नित्यश्चाद्रव्यद्रव्यत्वादिति दूषयति अनुमानस्येति । परेषामन्वयव्यतिरेकिण एव गमकत्वादित्यर्थः । तुल्ययोगेति । घटादिवद्विनष्टो गकार इति प्रतीत्या शब्दध्वंससिद्धेरित्यर्थः । न चारोपोऽयमिति दूषयति आरोपोऽपि चेति । यथा मानान्तरोपनीतं चक्षु-

न्यायलीलावतीप्रकाशविवृतिः

तत्सम्भवाद्बहिरिति । परेषामित्याद्युपलक्षणम् । अद्रव्यत्वं यदा-

---

(१) शब्देऽप्यनित्यतेति प्रा० पु० पाठः ।

न्दीग्रहस्त्विन्द्रियसम्बन्धविच्छेदेनापि तत्प्रतिसन्धानाद्धूमानुमानसिद्धिन्यायेन निरसनीयः ॥

स्फोटात्मा शब्दो नाम्बरगुण इति चेन्न । तदसिद्धेः । (१)एकं पदमिति धीरनेकवर्णव्यावृत्तात्मानमेकपटबुद्धिवदेकार्थक्रियाप्र-

---

न्यायलीलावतीकण्ठाभरणम्

स्यादित्यत आह रसानुमानेति । अम्लं जम्बीरमिति यत्र श्रूयते तत्र तेन रसेन रूपानुमानं स्यादित्यर्थः । यत्र वा मानान्तरं नोपनायकमित्यपव्याख्यानं क्षणिकताया अतदर्थत्वात् ।

अर्थं स्फुटयतीति स्फोटः, स च द्विविधः पदस्फोटो वाक्यस्फोटश्चेति वर्णगत एवासाविति शब्दमात्रस्य नाम्बरगुणत्वमित्याशंकते स्फोटात्मेति । शब्दवृत्तिः शब्दो नास्त्येवेति परिहरति नेति । नन्वर्थप्रतीत्यन्यथानुपपत्त्यैवासावङ्गीकार्य्यः वर्णानां प्रत्येकं मिलितानाम्वा

न्यायलीलावतीप्रकाशः

षाहमास्पदत्वेन गृह्यते तथात्रापीत्यर्थः । यत्र मानान्तरोपनीतं न स्फुरति तत्रानुमानमित्याह रसानुमानेति ।

"सर्वेषां शब्दानामाकाशगुणत्वमिति" शास्त्रे व्युत्पादितमाक्षिपति स्फोटात्मेति । शब्दत्वं शब्दोपादानवृत्ति नवेति स्फोटसंशयः । एकमिति । एकं पदमिति धीः सर्वानुभवसिद्धा न तावद्वर्णानामनेकत्वात् । न च वर्णेष्वेकार्थज्ञानजनकत्वौपाधिकी सा उपाध्यननुसन्धानेऽपि जायमानत्वात्, अतो यस्तस्या विषयः स एव स्फोट इत्यर्थः । एकपटबुद्धिवदिति । यथैकः पट इति बुद्धिरेकं पटमित्यर्थः । ननु

न्यायलीलावतीप्रकाशविवृतिः

ऽजन्यत्वं तदाऽसिद्धिरथानेकद्रव्यासमवेतत्वं तदा द्रव्यत्वविशेष्यासिद्धिरित्यपि द्रष्टव्यम् ।

स्फोटाप्रसिद्ध्या संशयाभावेन कथं विचार इत्यत आह— शब्दत्वमिति । एवञ्च वर्णोपादानकः पदोपादानकः वाक्योपादानकः स्फोटो मन्तव्यः । न च वर्णे किमर्थं तत्स्वीका-

---

(१) एकमित्यादिः 'अप्रतीतेरि'त्यन्तः पाठो कण्ठाभरणमते 'गुणोनित्यश्चेति' ग्रन्थस्यानन्तरं पठनीयस्तत्रैव तद्व्याख्यानात् । सं० ।

तिसंधानाद्युपाधिवैधुर्याद्रत्नतत्त्वबुद्धिवन्नानाव्यक्तिदर्शनजसंस्कारगम्यं प्रसाधयतीति चेन्न। एकसुप्तिङन्तावच्छेदेन तदुपपत्तेः, अन्यथा किंनिमित्तकः स्फोटेऽपि पदादिव्यवहार इति स्वयमेव परिभावय(१)। किं तर्हि प्रतिपादकम्? क्रमवद्वर्णसंहतिरिति ब्रूमः।

न्यायलीलावतीकण्ठाभरणम्

तत्रासामर्थ्यात् प्रत्येकं संकेताभावात् आशुविनाशिनां क्रमभाविनां

न्यायलीलावतीप्रकाशः

वर्णग्रहनिरपेक्षा तत्प्रतीतिः कुतो न भवतीत्यत आह रत्नतत्त्वबुद्धिवदिति। अत एव नापाततस्तदनुपलम्भात्तदभावः, नानावर्णज्ञानजन्यसंस्कारव्यङ्ग्यत्वात्, यथा रत्नतत्त्वं नानातज्जातीयज्ञानजन्यसंस्कारव्यङ्ग्यमित्यर्थः। यद्येकार्थज्ञानजनकत्वोपाध्यननुसन्धानेऽपि एकं पदमिति धीस्तदैकसुप्तिङन्तावच्छेदेनैवेत्याह एकेति। अन्यथेति। अन्यथा स्फोटत्वाविशेषेऽपि कश्चित्पदात्मा स्फोटः कश्चिद्वाक्यात्मेति विचित्रव्यवहारः कथमित्यर्थः। ननु वर्णाः प्रत्येकमर्थधियमादधीरन् मिलिता वा? नाद्यः, प्रत्येकं तत्र सङ्केताज्ञानात्, नान्त्यः, आशुनाशिनां क्रमभाविनां मेलकाभावात्, ततोऽर्थप्रत्ययान्यथोपपत्तेर्वर्णव्यङ्ग्यस्फोटाख्यमर्थप्रत्यायकमन्यदङ्गीकर्त्तव्यमित्यभिसन्धानात्पृच्छति किंतर्हीति। उत्तरं क्रमवदिति। क्रमश्चानुपूर्वीतद्विशिष्टा वर्णसंहतिः। वर्ण-

न्यायलीलावतीप्रकाशविवृतिः

रः? तस्यैवान्यत्र, प्रत्यायकत्वेन एकवर्णस्यैव यत्र प्रत्यायकत्वं तत्रावश्यं तत्कल्पनादिति भावः। अन्यथेति। एकसुप्तिङन्तावच्छेदेन पदस्फोटत्वे नानातदवच्छेदो वाक्यस्फोटत्वे प्रयोजकतया त्वयापि वाच्य इति भावः। अनवयवाऽखण्डस्फोटाभिव्यक्त्यर्थं नानावर्णगोचरसमूहालम्बनस्य त्वयापि स्वीकारादिति भावः। यद्यपि स्फोटाभिव्यंजको वायुरेव तदभिव्यक्त्यर्थमेव च प्रेरितेन वायुना वर्णनिष्पत्तिस्तदभिव्यक्तिर्वा, आमिक्षार्थं प्रक्षिप्तदध्यादिना वाजिननिष्पत्तिवत् कृपाणदर्पणादिमुखदैर्घ्यपारिमाण्डल्यबुद्धिवद्वा इति तत्सिद्धान्ताभेदं बाधकम्। न च चरमोत्पत्तिकाले प्रथमस्यासत्त्वात् कथं स्फोटोत्पत्ति

(१) इति भावयेति प्रा० पु० पाठः।

ननु क्रमो न गुणात्मकः, तत्रापि वृत्तेः। नापि जातिभेदः, तद्भेदानां गवादीनां परापरभावानुपपत्तेः। नापि कालभेदः, स्वतस्तस्यासिद्धेः, उपाधीनां चाशब्दात्मनां श्रोत्रेणाप्रतीतेः। शब्दस्य च तस्यैव तद्वृत्तौ प्रत्यनङ्गत्वात्। तत्कथं प्रतिपादकत्वमिति चेन्न। पूर्वपूर्ववर्णध्वंससाहचर्यस्यैव प्रकृते क्रमार्थत्वात्। तत एव

न्यायलीलावतीकण्ठाभरणम्

च मेलकाभावादित्यनुशयेन पृच्छति शब्दस्य चेति। शब्दात्मा चेत् क्रमस्तदा कथं शब्द एव वर्त्ततेत्यर्थः। पूर्ववर्णध्वंससमानकाल इतरवर्णस्य क्रम इत्याह पूर्वेति। प्रकृत इति। अन्यत्र कालोपाधिविशेषस्यैव क्रमपदार्थत्वादित्यर्थः। तत एवेति। अन्यथा क्रमो न प्रतीयेतेत्यर्थः।

न्यायलीलावतीप्रकाशः

मात्रस्य तुल्यत्वेप्यानुपूर्वीविशेषाज्जराराजेत्यादावर्थविशेषधीदर्शनादित्यर्थः। अयमभिसन्धिः। प्रत्येकवर्णानुभवजन्यसंस्कारकूटैस्तावद्वर्णसमूहगोचरा एकैव स्मृतिर्जन्यते तावतां संस्काराणां युगपदुद्बोधात् युगपदनेकार्थे इन्द्रियसन्निकर्षात्समूहालम्बनमिव, अन्यथा पदार्थप्रतीतिरुपपादयितुमशक्यत्वात्। यदाहुः—

यस्यानवयवः स्फोटो व्यज्यते वर्णबुद्धिभिः।
सोऽपि पर्यनुयोगेन नैवानेन विमुच्यते॥

तत्रापि प्रत्येकमेलकविकल्पग्रासापत्तेः। तत्र पीतवर्णात्मकगुणे पीत्यर्थः। स्वत इति। कालस्य नित्यविभोरेकत्वादित्यर्थः। उपाधीनां चेति। आनुपूर्व्याः श्रोत्रग्राह्यत्वात्पदं शृणोमीत्यबाधितानुव्यवसायादित्यर्थः। तस्यैवेति। अभेदे वैशिष्ट्याख्यसम्बन्धाभावादित्यर्थः। पूर्वपूर्वेति। पूर्वपूर्ववर्णध्वंसविशिष्टत्वमुत्तरवर्णस्येत्यर्थः। उत्तरवर्णसमानकालध्वंसप्रतियोगित्वं पूर्ववर्णस्येति यावत्। तत एवेति। यत एव पूर्ववर्णध्वंस-

न्यायलीलावतीप्रकाशविवृतिः

रिति दूषणम्। तन्मते वर्णानां नित्यत्वादनित्यत्वे चरमवर्णावृत्तिताङ्गीकारात्। तथाप्युक्तक्रमेणैकत्वप्रतीत्यर्थप्रतीत्योरुपपत्तौ गौरवं तत्कल्पनायां बाधकामति रहस्यम्। उपादाने सम्बन्धोऽभेद एवेत्यत आह वैशिष्ट्याख्येति। ननु ध्वंसस्तदवृत्तिः कथं विशेषणमत आह उत्तरवर्णेति।

शब्दाभावः श्रोत्रगम्यः(१) । प्रमाणान्तरवेद्यं पौर्वापर्यं वा क्रम इति स्थितं शब्दो गुणोऽनित्यश्चेति ॥ इति शब्दः ॥

तथापि कथं चतुर्विंशतित्वम्? रुचिवद्विरुचेरपि सम्भवात्, यस्मिन्सत्युपात्तमेव नियमेन हीयते । न चेयमिच्छाभावमात्रम्, विपरीतस्यापि सम्भवात् परत्वापरत्ववद्भेदसिद्धेरिति । दुःखमेव तीव्रं द्वेषोऽस्तु, यथेच्छैवोल्वणा काम इति हानिस-

न्यायलीलावतीकण्ठाभरणम्

नन्वधिकरणायोग्यतया कथमेवं स्यादित्यत आह प्रमाणान्तरेति । गुणश्चेति । कर्मत्वमसम्भावि द्रव्यत्वं च प्रतिषिद्धमेवेति भावः ।

नन्वेकं पदमेकं वाक्यमिति बहुषु वर्णेषु प्रतीत्यन्यथानुपपत्तिरेव स्फोटसाधिकेति शंकते एकं पदमिति । यथा रजतत्वमनेकानुभवजनितसंस्कारसहकृतेन्द्रियवेद्यं तथा स्फोटोऽपीत्यर्थः ।

गुणविभागं न्यूनाधिकत्वाभ्यामाक्षिपति तथापीति । चतुर्विंशतेर्गुणानां व्यवस्थितावपीत्यर्थः । विरुचेरिति । । मह्यं न रोचते सौवीरमिति यतः प्रत्यय इत्यर्थः । यथा अपरत्वं न परत्वाभावस्तथेयमपि न रुचेरभाव इत्यर्थः । इच्छैवेति । स्त्रीविषयोऽभिलाष इत्यर्थः । द्वेषे ज्वलि-

न्यायलीलावतीप्रकाशः

साहचर्यलक्षणः क्रमः श्रोत्रेण प्रतीयत इत्यर्थः । विशेषणज्ञानं विना विशिष्टज्ञानाभावात् । प्रमाणान्तरेति । पौर्वापर्यं पूर्वापरकालसम्बन्धः, स यद्यपि न श्रोत्रवेद्यस्तथापि मानान्तरोपनीतः श्रोत्रप्रत्यक्षे भासत इत्यर्थः । गुणश्चेति । यद्यपि शब्दस्य द्रव्यत्वमात्रं निषिद्धं न तु गुणत्वमपि साधितम्, तथाप्यनित्यस्य विभुसमवेतस्य गुणत्वनिश्चयादर्थादुक्तम् ।

यस्मिन्निति । यस्मिन् कारणे सत्युपात्तमपि वस्तु नियमेन हीयते तद्विरुचिरित्यर्थः । परत्वापरत्ववदिति । अन्यथा परत्वाभावमात्रमपरत्वं स्यादित्यर्थः । हानीति । चतुर्विंशतिर्गुणा इति विभागहानिप्रसङ्गादित्यर्थः।

न्यायलीलावतीप्रकाशविवृतिः

लिङ्गसङ्गत्यर्थमाह कारणेति । तथाच मूलेऽर्थानिर्देश इति

(१) श्रोत्रग्राह्यः-इति प्रा० पु० पाठः ।

म्भवात् । ज्वलितबुद्धेर्भेदसिद्धिरिति चेन्न । शीतलितबुद्धेरपि सम्भवात् । तृप्तता सेति चेत् । तुल्यम् दुःखितायामपि । यत्न-वदालस्यसम्भवाच्च । न च यत्नाभाव एवाऽयम् । विधित्वेन भासमानत्वात् । गुरुत्ववल्लघुत्वसम्भवाच्च । न चैतदपकृष्टं गुरुत्वमेव लघुत्वम्, तेजस्यपि सत्त्वात् । अन्यथा ज्वलनोद्गम-नानुपपत्तेः । न चेदमदृष्टहेतुकं, सर्वत्र गुरुत्वोच्छेदप्रसङ्गात् ।

द्रवत्ववत्काठिन्यं च गुणान्तरम्(१) । न चैतत्स्पर्शभेदः(२) । चाक्षुषत्वेन स्पर्शविशेषत्वानुपपत्तेः । संयोगविशेषः काठिन्यमिति चेन्न । द्रवत्वस्यापि तादृशत्वापत्तेः(३) । स्नेहवद्रौक्ष्यस्य सम्भवाच्च । परापरभाववत् क्रमयौगपद्यचिरक्षिप्रवामदक्षिणाग्रपृष्ठादिसम्भवा-च्च । असंख्यातोऽयमपरिमितोऽयमिति विरुद्धव्यवहारादसंख्याऽ-परिमाणसम्भवाच्च । इदमस्मादभिन्नमिति पृथक्त्ववदपृथक्त्वसम्भ-वाच्च । न चायं पृथक्त्वाभावः, तदवधिनिरपेक्षनिरूप्यत्वात् ।

न्यायलीलावतीकण्ठाभरणम्

तत्वधीरस्ति न तु दुःखेऽपीति तयोर्भेद इत्याह ज्वलितेति । शीतलितेति । तर्हि शीतलितत्वबुद्ध्या गुणान्तरं सिध्येदित्यर्थः । तृप्ततेति । सुख एव सा बुद्धिरित्यर्थः । दुःखितायामिति । ज्वलितत्वबुद्धिरित्यनुषज्यते । तुल्यमिति । पृथगेव वाच्यम ।

न्यायलीलावतीप्रकाशः

तदवधीति । पृथक्त्वाधिकरणान्यः पृथक्त्वप्रतियोगी भवति, यदि चापृथक्त्वं पृथक्त्वाभावस्तदा पृथक्त्वावधिनिरूप्यपृथक्त्वप्र-तियोगिकतया न स्वाधिकरणमात्रं स्यादित्यर्थः ।

न्यायलीलावतीप्रकाशविवृतिः

भावः । यदि चेति । अत एव भेदाभाव एव पृथक्त्वमित्यपास्तम् । पृथ-क्त्वस्यैव भेदत्वात्, अन्योन्याभावात्मकत्वेऽपि दूषणतौल्याच्च ।

---

(१) तस्यादृष्टहेतुकत्वे पतनादपि गुरुत्वानुमानभङ्गप्रसङ्गः । द्रवत्वत्काठिन्यसम्भवाच्च—इति प्रा० पु० पाठः । (२) नचैष स्पर्शभेद इति प्रा० पु० पाठः ।

(३) चक्षुषा प्रतीतेः । नच संयोगभेदो, द्रवत्वेऽपि तुल्यत्वात्—इति प्रा० पु० पाठः ।

न च स्वरूपमात्रं, पृथक्त्वविलयात् । निद्रासंभवात मध्यत्व-संभवाच्च । दयादयश्च, यतो मृदुतरान्तरता भवति(१)। न चैतद-दृष्टमात्रहेतुकम् , गुरुत्वसंस्कारविलयादित्यास्तां कृतं विस्तरेण इति चेत् ।

अत्रोच्यते । नेच्छामीत्यरुचिनिरूपणात् । आतुरस्य उष्णे द्वेषवर्तमानतानुभवेऽपीच्छायां सुखीतिवदहं दुःखीत्यनुभवात् । नाप्यालस्यम्, 'अलसो निःप्रयत्नो निरुत्साह'इति परमकोपकार-वचनाद्यत्नाभाव एव तच्छब्दव्यवहारात् । तमोवद्विधित्वेनाभास-मानत्वस्यान्यथासिद्धत्वात् । नापि लघुत्वम् , गुरुत्वापकर्ष एव तद्व्यवहारात् । ज्वलनोद्गमनस्यादृष्टहेतुकत्वात् । गुरुत्वप्रतिबन्दी-ग्रहस्तु पूर्वमेव निरस्तः । नापि काठिन्यम्, अकठिनैरपि तन्तु-

न्यायलीलावतीकण्ठाभरणम्

गुरुत्वसंस्कारेति । पतनमिष्वादिगतिश्चादृष्टादेव स्यात् किन्तु गुरुत्वेन वेगेनेत्यर्थः । आस्तामिति । मदमानदृष्टान्तलोभस्पृहासूयेर्ष्याद्रोहक्रोधादिसम्भवादिति भावः । नेच्छामीति इच्छासमभिव्याहार-वशादिच्छाया एवाभावोऽरुचिः प्रतीयत इत्यर्थः ।

द्वेषस्य दुःखाद्भेदमाह—आतुरस्येति । तमोवदिति । नहि नञो-ऽप्रयोग इत्येव विधित्वमित्यर्थः । अकठिनैरपीति । कारणगुणमन्तरेण तु

न्यायलीलावतीप्रकाशः

द्वेषस्य दुःखाद्भेदमाह आतुरस्येति । तमोवदिति । यथा तमसि नञ्शब्दप्रयोगाभावमात्रेण विधित्वाभिमानस्तथा प्रकृतेपीत्यर्थः । गुरुत्वापकर्ष इति । गुरुत्वापकर्षोऽत्र गुरुत्वाभावस्तेन तेजसि न विरोधः । कारणगतकाठिन्येन कार्यगतकाठिन्यमारब्धव्यमिति कारणे तद-भावात् कार्ये तदभावः स्यादित्याशयेनाह अकठिनरपीति । क्वचित्तं-

न्यायलीलावतीप्रकाशविवृतिः

अपृथक्त्वं चेति मूलम् । क्लृप्तेनैवोपपत्तेरिति भावः । अत एवास्वाधि-करणनिरूप्यम् , आश्रयनिरपेक्षस्यैव स्मर्यमाणपृथक्त्वस्य ग्रहणा-

(१) यतो मृदुतरा भवन्ति—इति मु० पु० पाठः ।

भिरारब्धपटे काठिन्योपलम्भात् । संयोगभेद एवायं स्पर्शभेदो वा । नापि रौक्ष्यम् , अस्निग्धसामानाधिकरण्येनानुभवात् , आर्द्रताहीने शुष्कतावत् । नापि क्रमादिकम् , उपाधिद्वारेणैवान्यथासिद्धेः । परत्वापरत्वादौ तु विशेषदर्शनात् ।

वामत्वं च पूर्वदिगभिमुखावस्थितस्योदीचीदिक्संबन्धित्वम् । दक्षिणदिक्संबन्धित्वं च दक्षिणत्वम् । एवं दिगन्तराभिमुखेऽपि वाच्यम् । देहदेशविशेष एव वामत्वम् । मुखापेक्षया ऋजुदेशव्यवस्थितालोकादिसंयोगित्वमग्रत्वम् । पृष्ठव्यवहितालोकमण्डलावच्छेदश्च पश्चात्त्वम् । असंख्यातत्वं चाशक्यज्ञानसंख्यावच्छिन्नत्वम् । अशक्यज्ञानहस्तवितस्त्याद्यवच्छेदपरिमाणयोगित्वं

न्यायलीलावतीकण्ठाभरणम्

कथं तदुत्पद्यतामिति भावः । क्वचित्संयोगभेद एव काठिन्यमतो चाक्षुषत्वमपि नानुपपन्नमित्याह संयोगेति । सुखासकादौ जठरे स्पर्शभेद इत्याह स्पर्शेति । बिशेषदर्शनादिति । संयुक्तसंयोगाल्पीयस्त्वविषयापेक्षाबुद्धेरेवापरत्वस्योत्पत्तिदर्शनान्न परत्वाभाव इत्यर्थः ।

ननु दिगन्तराभिमुखस्यापि दिगन्तरावच्छिन्नेऽपि हस्तादौ वामत्वव्यवहारः किन्निबन्धन इत्यत आह देहेति । एवं दक्षिणत्वमपि वाच्यमिति । अशक्येति । निपुणे निरूपणे तत्रापि संख्यातत्वबुद्धेः

न्यायलीलावतीप्रकाशः

योगभेदः क्वचित्स्पर्शभेदः काठिन्यमिति न चाक्षुषत्वाविरोध इत्याह संयोगभेद इति । अस्निग्धेति । स्नेहाभाव एव रौक्ष्यं लोके रूक्षपदस्यास्निग्धपदपर्यायत्वदर्शनादित्यर्थः । उपाधिद्वारेति । उपाधित्वं च क्रमादीनामुपपादितमिति भावः । विशेषदर्शनादिति । परत्ववदपरत्वस्यापि मानसिद्धत्वादित्यर्थः ।

न्यायलीलावतीप्रकाशविवृतिः

दिति । ननु यत्र स्वपूर्वस्यां दक्षिणोत्तरक्रमेण नानावस्तूनि तत्र परत्वाद्यभावात्कथं मध्यव्यवहारोऽत आह एतन्नेति । तत्र दक्षिणेन निरू-

चापरिमितत्वम् । अपृथक्त्वं चैत(१) दवधिनिरूप्यपृथक्त्वाभाव-सम्बन्धित्वम् । दयादयस्त्विच्छाभेदा एव । निरिन्द्रियदेशसम्बन्ध एव हि मनसो निद्रेति । परत्वापरत्वसङ्कर एव च मध्यता । गुरुत्वादिवन्दीग्रहस्तु तत्र तत्रोन्मूलित इत्यलम् । इति गुणानियमः ॥

इति श्रीन्यायलीलावत्यां गुणविचारः(२) ।

न्यायलीलावतीकण्ठाभरणम्

सत्त्वादिति भावः । एवमग्रेऽपि । परत्वापरत्वसंकर इति । परत्वाधिकरणत्वमेव मध्यत्वमित्यर्थः । गुणनियम इति । गुणानां न्यूनाधिकसंख्याव्यवच्छेदनियम इत्यर्थः ॥

इति श्रीमहामहोपाध्यायसन्मिश्रश्रीभवनाथात्मज महामहोपाध्यायसन्मिश्र-श्रीशंकरकृते लीलावतीकण्ठाभरण गुणपदार्थः समाप्तः ।

न्यायलीलावतीप्रकाशः

परत्वापरत्वसंकर इति । एतच्चोपलक्षणम् । तुल्यसंयुक्तसंयोगाधिकरणेऽपि मध्यव्यवहारदर्शनात् । गुणनियमः शङ्कितगुणानामाधिक्यनिराकरणमित्यर्थः ॥

इति श्रीवर्धमानोपाध्यायविरचित न्यायलीलावतीप्रकाशे गुणपदार्थः ॥

न्यायलीलावतीप्रकाशविवृतिः

प्यमाणमुत्तरापेक्षया उत्तरेण च निरूप्यमाणं दक्षिणापेक्षया मध्यमपरमित्यपरद्वयसंकर एव मध्यतेति भावः । इदमप्युपलक्षणम्, भिन्नदिगवस्थितयोर्यत्रैकस्मिन्परत्वद्वयमुत्पद्यते तत्रापि मध्यत्वव्यवहारात्, तदुक्तं गुणप्रकाशे–'परत्वमेव मध्यत्वमिति' ।

गुणपदार्थः ॥

---

(१) चैतावदवधीति मु० पु० पाठः ।

(२) गुणपदार्थोपवर्णनम्—इति प्रा० पु० पाठः ।

कथं पुनः कर्माणि पञ्चैव ? भ्रमणरेचनादेरपि सत्त्वात्(१)। तत्रान्यथासिद्धावुत्क्षेपणादेरपि तथात्वप्रसङ्गात् । गमनं च न चलनातिरेकि। ततो न्यूनातिरेकाभ्यां(२) विभागोऽनुपपन्न एवेति

न्यायलीलावतीकण्ठाभरणम्

उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि पंचैव कर्म्माणीत्याक्षिपति कथमिति । रेचनादावित्यादिपदान्निष्क्रमणप्रवेशनोर्द्ध्वज्वलननमनोन्नमनसंग्रहः । अन्यथासिद्धाविति । गमन एव तेषामन्तर्भाव इति यदित्यर्थः । गमनं चेति । कर्म्ममात्रमेव गमनं न च तद्विशेष इत्यर्थः । न्यूनाधिकत्वाभ्यामिति । गमनादेः पृथगनभिधानाद्विभागस्य न्यूनत्वं गमनस्य

न्यायलीलावतीप्रकाशः

उत्क्षेपणादीनि पञ्च कर्माणीति पञ्चत्वविभागमाक्षिपति कथमिति । रेचनादेरित्यादिपदेन निष्क्रमणप्रवेशनस्पन्दनोर्ध्वज्वलननमनोन्नमनसङ्ग्रहः । भ्रमणत्वादिबुद्धेरनन्यथासिद्धत्वादित्यर्थः । ननु संयोगविशेषजनकत्वेनोपाधिना तदुपपत्तिरित्यत आह तत्रान्यथेति । उत्क्षेपणादिबुद्धेरपि तत एवान्यथासिद्धेरित्यर्थः। किञ्च चलनमात्र एव गच्छतीति प्रतीतेर्गमनत्वस्य कर्मत्वान्तरजातित्वाभावात् कर्मणः पञ्चत्वाभावेन न्यूनत्वाद्विभागो न युक्त इत्याह गमनं चेति । विशेषादिति । उत्क्षेपणत्वादिबुद्धिभ्रमणत्वादिबुद्ध्योर्जातितदभावव्यवस्थापकत्वलक्षणादित्यर्थः । तमेव स्फुटयति तथाहीति । ननु भ्रमणादीनां जातिरूपत्वेऽपि न विभागव्याघातः, भ्रमणत्वादीनां गमनविशेषत्वस्याग्रे व्युत्पादनीयत्वात्, गमनभिन्नत्वे चोपाधिरूपत्वेऽपि उत्क्षेपणादिपञ्चकानन्तर्भावात् विभागव्याघातस्तुल्यः, तस्माद्भ्रमणत्वादेः स्वरूपाख्यानपरोऽयं

न्यायलीलावतीप्रकाशविवृतिः

अनुक्तोपालम्भमाशंक्याह उत्क्षेपणादीनीति । जातितदभावेति ।जातिव्यवस्थापकत्वतदभावलक्षणादित्यर्थः । संप्रदायविद इत्यस्वरसाविभावनम् । तद्बीजन्तु उत्क्षेपणादिचतुष्टयं तावत् परस्परविरुद्धधर्मवत्त्वमनुभवसिद्धं तदन्यकर्मत्वलक्षणगमनत्वमपि तद्विरुद्धमेवेति परस्परविरुद्धान् पंचोपाधीनादाय मूलकृता कर्माणि गणितानि । एवञ्च भ्रमणत्वादीना·

---

(१) सम्भवात्- इति मा० पु० पाठः । (२) अत्र न्यूनाधिकत्वाभ्यामिति मिश्रसम्मतः पाठः ।

चेत्। न। विशेषात्। तथाहि नालिकायां पतति पत्रादौ कस्यचित्पततीति मतिः, कस्यचित्प्रविशतीति, कस्यचिद्भ्रमतीति। स च जातिपक्षे प्रत्ययप्रबन्धो नोपपद्यते। जातिसङ्करप्रस-

---

न्यायलीलावतीकण्ठाभरणम्

पृथगभिधानादाधिक्यमित्यर्थः। न्यूनत्वमपाकरोति तथाहीति। ऊर्द्ध्वं गच्छत्यधोगच्छत्याकुञ्चति प्रसरति गच्छतीति पञ्चानुगतप्रत्ययाः पञ्च-जातीरुत्क्षेपणत्वादिका व्यवस्थापयति तेन कर्म्मत्वसाक्षाद्व्याप्याः पञ्चैव जातयः। भ्रमणत्वादयस्तु साङ्कर्य्यात् जातय एव न भवन्ति, जातित्वे वा गमनत्वावान्तरजातय एव ता न तु कर्म्मत्वसाक्षाद्व्याप्या इत्यर्थः। प्रत्ययप्रबन्ध इति। अननुगतप्रत्ययप्रबन्ध इत्यर्थः, निष्क्रमण-

न्यायलीलावतीप्रकाशः

ग्रन्थ इति सम्प्रदायविदः। ननु जातिसङ्करापत्त्या यदि पतनत्वं न जातिः तदा पतनत्वाकारानुगतप्रतीतिः कथम्? न चाधःसंयोगजनकत्वेनोपाधिना तदुपपत्तिः, अनुगतधर्मं विना तज्जनकत्वस्यैव ग्रहीतुमशक्यत्वात्। मैवम्। अधःसंयोगत्वस्य जातित्वाभावेनोपाधित्वात्, तस्य च कार्यतानवच्छेदकत्वात्, अन्यथा नीलघटत्वादेरपि तथात्वापत्तेः। एवमन्तःसंयोगजनककर्मत्वं प्रवेशनत्वम्, नानादिक्-

न्यायलीलावतीप्रकाशविवृतिः

मपि परस्परात्यन्ताभावसमानाधिकरणजातित्वे विरोधोऽप्यावश्यक इति तान्यपि विभाजकानि स्युरित्याशङ्कायामनुभवसिद्धसामानाधिकरण्यानुरोधेन जातित्वमेव नास्तीत्युक्तमिति प्रकृतोपयोग एवेति। अधःसंयोगत्वस्येति। यद्यप्युपाधेरपि कार्यतावच्छेदकत्वं भवत्येव, तथाप्यत्र मानाभाव एव तात्पर्यम्। जातिकार्यवृत्तिजातित्वमेव मानं(न)स्यादिति मानाभावसिद्ध्यर्थमुपाधित्वेनेत्युक्तमिति भावः। यद्यपि पतनमवक्षेपणमेवेत्यग्रे मूलकृदेव वक्ष्यति, अवक्षेपणत्वं चाधःसंयोगजनकतावच्छेदकत्वेनैव साधनीयमिति तत्त्वं कार्यतावच्छेदकमेव, तथापि पतनमत्रावक्षेपणविशेषः, तत्र च न कार्यगतं किञ्चिदवच्छेदकमस्ति येनावक्षेपणन्यायाद्व्यवस्थाप्येत पतनत्वमिति भावः। नानेति।

ङ्गात्(१)। अपवरकादपवरकान्तरं व्रजति च निष्क्रामति प्रविशति इति प्रत्ययान्न निष्क्रमणत्वाद्यपि । अत एव च न रेचनत्वम्, तस्य निष्क्रमणात्मकत्वात् । न च स्पन्दनम्, न चोर्ध्वज्वलनम्, उत्क्षेपणस्यैव तेजःसम्बन्धिनस्तादृशत्वात् । अत एव च नोन्नमनम्, तस्य निष्क्रमणात्मकत्वात् । पतनं च न, तस्यावक्षेपणात्मकत्वात् । अत एव न नमनम् । अनृजुसंयोगजनकत्वात् तिर्यग्गमनमप्याकुञ्चनमित्याद्यूह्यम् ।

न्यायलीलावतीकण्ठाभरणम्

त्वप्रवेशनत्वयोर्जातिरूपतामपाकरोति । अयमभिसन्धिः । अधःसंयोगजनककर्मत्वं भ्रमणत्वम्, बहिःसंयोगजनककर्मत्वं रेचनत्वं तदेव निष्क्रमणत्वम्, अधःसंयोगजनकद्रव्यद्रव्यनिष्ठकर्मत्वं स्पन्दनत्वम्, एतच्च सर्वं गमनद्वारान्तरसामान्यम्। तथोन्नमनत्वमपि। पतनत्वनमनत्वे चावक्षेपणावान्तरसामान्ये। तिर्य्यग्गमनत्वं चाकुञ्चनत्वं न त्ववान्तरसामान्यमिति। जातित्वेऽपि न कर्म्मत्वसाक्षाद्व्याप्यजातित्वमिति। ननू

न्यायलीलावतीप्रकाशः

संयोगजनकनानाजातीयनानाकर्मत्वं भ्रमणत्वम्। नहि भ्रमणमेककर्मात्मकमेव, एकस्मिन् क्षणे भ्रमत्यलातचक्रमिति प्रतीत्यापत्तेः। भ्रमणत्वस्य जातित्वं निराकृत्य निष्क्रमणत्वादेस्तन्निराकरोति अपवरकादिति। निष्क्रमणत्वादीत्यादिपदेन प्रवेशनत्वपतनत्वसङ्ग्रहः। तस्येति। निष्क्रमणस्य गमनविशेषत्वेन व्युत्पादनीयत्वादित्यर्थः। न च स्पन्दनमिति तस्य निष्क्रमणात्मकत्वादिति हेतुरनुषञ्जनीयः। अतएवोत्क्षेपणात्मकत्वादित्यर्थः। तिर्यग्गमनस्याकुञ्चनत्वे हेतुमाह अनृजुसंयोगेति। ननु तिर्यग्गमनं नाकुञ्चनं स्वावयवाभिमुखक्रियायाः आकुञ्चनात्मकत्वात्। अत्राहुः। यत्र तिर्यक्पतनं निःक्रियाभिमुखं तत्र तस्याकुञ्चनत्वम्,

न्यायलीलावतीप्रकाशविवृतिः

तृतीयं नानापदं भ्रमणत्वसमुदायपर्याप्तत्वलाभार्थमित्येके। नानाजातीयनानापदयोरन्यतरान्तर्भावेन लक्षणद्वयमित्यन्ये। पूर्वत्र हेतुत्वभ्रमनिरासायाह तिर्यग्गमनस्येति। अन्यत्र वाय्वादाविति। यद्यपि

(१) सङ्करभयात्—इति प्रा० पु० पाठः।

उत्क्षेपणत्वादिकं चानुगतप्रत्ययनियतजातीयसंयोगजनकत्वा·

न्यायलीलावतीकण्ठाभरणम्

त्क्षेपणादिजातित्वे किं प्रमाणमत आह उत्क्षेपणत्वादिकं चेति। अयमभि·

न्यायलीलावतीप्रकाशः

अन्यत्र वाय्वादौ तिर्यक्पतनमपक्षेपणमेव।

उत्क्षेपणत्वादीनां जातित्वव्यवस्थापकमाह उत्क्षेपणत्वादिकं चेति। ऊ· र्ध्वदिक्संयोगाद्यवच्छिन्नानुगतकार्यस्य कारणानुगतरूपं विनाऽनुप· पत्तेरसति बाधके तेषां जातिरूपत्वमित्यर्थः। ऊर्ध्वदिक्संयोगत्वं चोपाधिरूपमपि बाधकाभावात्कार्यतावच्छेदकम्, नीलघटत्वादेश्च तत्त्वे बाधकमस्ति। न चोत्क्षेपणेऽप्यूर्ध्वं गच्छतीति प्रतीतिबलाद्गमनत्व· साङ्कर्यं बाधकमेव, तत्र गमनत्वाभावात् तद्व्यवस्थापकस्य तिर्यक्संयो· गजनकत्वस्याभावात्, गच्छतीति प्रतीतिप्रयोगयोश्चलनमात्रविषय· त्वात्। तथापि यत्र किञ्चिदूर्ध्वं किञ्चिच्च तिर्यक् चलति तत्रोत्क्षेपण· त्वगमनत्वयोः सङ्करो दुर्वार इति न वाच्यम्। तत्रैकस्याः कर्मव्य· क्तेरूर्ध्वतिर्यक्संयोगजनकत्वाभावात्, कर्मव्यक्तीनां नानात्वेनोत्क्षेप· णात्मिकायास्तस्या ऊर्ध्वसंयोगजनकत्वात् गमनात्मिकायाश्च ति· र्यक्संयोगजनकत्वात्। एवमधःसंयोगजनकत्वमवक्षेपणत्वव्यवस्था· पकम्। निष्क्रियावयवाभिमुखसंयोगजनकत्वमाकुञ्चनत्वव्यवस्थाप·

न्यायलीलावतीप्रकाशविवृतिः

तिर्यक्पतनं तिर्यक्संयोगत्वाद्गमनमेव वक्तुमर्हम्, तथापि यत्राधस्सं· योगजनकमेव वाय्वादिकर्म तत्रैवमन्यत्र तु गमनमिति भावः। ऊर्ध्वदिक्संयोगित्वं चेति। ऊर्ध्वं क्षिपत्यधः क्षिपतीतिप्रतीत्योः पर· स्परविरुद्धविषयत्वादनुगतत्वाच्च जातिविशेषविषयत्वे तज्जातिनि· यामकत्वेन ऊर्ध्वसंयोगित्वादिकमुपाधिरूपमप्यवच्छेदकं कल्प्यते बाधकाभावादिति भावः। पततीत्यादिप्रतीतीनां तु न जातिव्यवस्था· पकत्वं जातिसङ्करापत्तेरिति ध्येयम्। निःक्रियावयवेति। विरुद्धदिगभि· मुखक्रियाशून्यावयवेत्यर्थोऽन्यथावयविसंकोचेऽवयवकर्मावश्यकत्वात् परस्पराभिमुखक्रियावदवयवाश्रितावयविनि संकुचतीति प्रतीतेश्चा· सङ्गत्यापत्तेरिति भावः। तदुपादानप्रयोजनं च यत्राधःपत्राभिमुख मेव मध्यपत्रावच्छिन्नावयविसंयोगो विकाशे तत्रातिव्याप्तिवारणम्।

त्सिद्धम् , कारणजातिनियमं विना कार्ये तदनुपपत्तेः । न च रेचनेऽप्ययं दोषः । तत्र बाधकबलेन जातेरपास्तत्वात् । अवि·

न्यायलीलावतीकण्ठाभरणम्

सन्धिर्दृश्यते हस्तादिषु तत्सम्बद्धेषु च मुषलादिषु ऊर्द्ध्वदेशावच्छेदेन नियतसंयोगजनकत्वमधोदेशावच्छेदेन च नियतविभागजनकत्वं प्रतीत्य हस्तमुत्क्षिपति मुषलमुत्क्षिपतीति प्रत्ययः । एवं हस्ते·चाधो नीयमानेऽवक्षिपतीति प्रत्ययः । एवं वस्त्रं संकुचति चर्म्म संकुचतीति धीः । एवं चर्म्म प्रसरति वस्त्रं प्रसरतीति धीः । एवं पशुमनुजविहंगमसरीसृपादिषु नियतदेशसंयोगविभागयोरनुपलम्भादनियतदेशसंयोगविभागलक्षणकार्य्यकारित्वात् गच्छतीति धीस्तथा च कार्य्यानुगमप्रत्ययानुगमौ जातिमन्तरेणानुत्पद्यमानावुत्क्षेपणत्वादि·

न्यायलीलावतीप्रकाशः

कम् । न चावयवाकुञ्चनेनावयविनि संयोगोत्पादस्तत्राकुञ्चनत्वं नास्त्येवेति वाच्यम् । अवयवावयविनोः संकुचतीतिप्रतीतावविशेषात् । एवं निष्क्रियावयवानभिमुखविरुद्धनानादिक्संयोगजनककर्मत्वं प्रसारणत्वव्यवस्थापकम् । अत्राप्यवयवावयविनोः प्रसरतीत्यबाधितप्रतीतिबलान्नावयवकर्मणान्यथासिद्धिः । तिर्यक्संयोगजनककर्मत्वं च गमनत्वव्यवस्थापकम् । न चैवं पूर्वादिदिक्संयोगजनकत्वादिनापि जातिः सिद्ध्येत् , पूर्वादीनां तिर्यक्प्रभेदत्वात् । नन्वेवं रेचनत्वप्रवेशनत्वादिकमपि जातिः स्यात् बहिःसंयोगजनकत्वान्तःसंयोगजनकत्वयोर्व्यवस्थापकयोः सत्त्वादित्यत आह न चेति । गमनत्वं कर्मत्वव्याप्यं

न्यायलीलावतीप्रकाशविवृतिः

नचेति । अवयवसंयोगद्वारेति शेषः । अवयवावयविनोरिति । न च भ्रमरूपा परम्परासम्बन्धावगाहिनी वा प्रतीतिरिति वाच्यम् । बाधकाभावात् , परम्परासम्बन्धकल्पने च गौरवात् । यत्तु—अवयविनि तदा कर्मोत्पादे निःक्रियावयवेति विरुद्धं यावदवयवकर्मोत्पादे व्याप्तत्वादवयविकर्मोत्पादस्यान्यथा कर्मणोऽव्याप्यवृत्तितापत्तिः । नहि भवति निष्कम्पोऽवयवोऽवयवी च तदवच्छेदेनापि सकम्प—इति मतम् । तदयुक्तं निःक्रियेत्यादेरेवान्यथा व्याख्यानात् । एवमिति । अत्रापि निःक्रियत्वं विरुद्धादिगभिमुखक्रियाशून्यत्वमेव । आकुञ्चनव्यावर्त्तनायानभिमुखे·

लक्षणसंयोगभेदमात्रजनकं गमनम्। भ्रमणनिष्क्रमणादीनां च परसामान्यवत्त्वमवश्यमपरसामान्यवत्त्वादुत्क्षेपणावक्षेपणवत्। तदेव च गमनशब्दवाच्यम्। यद्वा उत्क्षेपणत्वादिरूपचतुष्कं तावत्कर्मणि चतुर्विधानुगतप्रत्ययसिद्धम्। तच्चोपाधिसामान्यं वाऽस्तु मुख्यसामान्यं वा न नः कापि(१) क्षतिः, चातुर्विध्यमात्रस्य विवक्षितत्वात्। एतद्रूपचतुष्कविवर्जितकर्मजातीयश्च गमनम्। तच्च

न्यायलीलावतीकण्ठाभरणम्

का जातीर्व्यवस्थापयत इति। गमनत्वजातौ प्रमाणान्तरमाह भ्रमणेति। भ्रमणत्वादीनां कर्म्मत्वसाक्षाद्व्याप्यजातित्वं तावन्नास्ति, नचोत्क्षेपणत्वाद्यवान्तरत्वम्, तद्भेदेन प्रतीतेः, तथा च कर्म्मव्याप्यव्याप्यत्वं वाच्यमतो गमनत्वमेव कर्म्मत्वव्याप्यम् तद्व्याप्यं च भ्रमणत्वादीत्यर्थः। उत्क्षेपणत्वादीनामुपाधिसामान्यत्वे नापि काचित्क्षतिरित्याह यद्वेति। नन्वेतच्चतुष्टयान्तर्गतमेव गमनत्वं स्यात्तथा च विभा-

न्यायलीलावतीप्रकाशः

सामान्यं तच्चोर्ध्वादिसंयोगचतुष्टयान्यसंयोगजनककर्मव्यक्तौ वर्त्तत इत्याशयेनाह अविलक्षणेति। तदेव चेति। गमनत्वसामान्याक्रान्तं भ्रमणनिष्क्रमणादीत्यर्थः। ननु सौधादावूर्ध्वद्वारेण कक्षान्तरगमने उत्क्षेपणत्वप्रवेशनत्वनिष्क्रमणत्वसाङ्कर्य्यं स्यादेवेत्यतः पूर्वापरितोषेणाह यद्वेति। विभागमात्रस्य सिद्धौ तात्पर्यं नतूत्क्षेपणत्वादेर्जातित्वे निर्ब-

न्यायलीलावतीप्रकाशविवृतिः

न्धनम्। न च नानापदेन तन्निरासः, तस्यापि नानादिक्संयोगजनकत्वात्। तत्रापि निःक्रियपदं पूर्वनिरुक्तविकाशस्थले मध्यपत्रावच्छेदेनापि विकाशव्यवहारात्तत्रातिव्याप्तिवारणाय। विरुद्धदिगभिमुखक्रियत्वं च तत्राप्यपरदिग्वर्त्तिपत्रापेक्षया नानापदं च उत्क्षेपणातिव्याप्तिवारणाय। न च भ्रमेऽप्यतिव्याप्तिः, तत्रैकस्य कर्मणो नानादिक्संयोगजनकत्वाभावादत एव तल्लक्षणे नानापदमुपात्तम्। विरुद्धपदं च स्वरूपनिर्वचनपरम्, अनभिमुखत्यन्तत्यागेन तत्पदगर्भल-

---

(१) काचित्–इति मा० पु० पाठः।

भ्रमणादिकम् । न चैतद्रूपचतुष्कशालितातद्विरहाभ्या(१)मन्यः प्रकारः सम्भवतीति पञ्चैव कर्माणीति ॥

इति लीलावत्यां कर्मविचारः ।

न्यायलीलावतीकण्ठाभरणम्

गत्याघात इत्यत आह—एतदिति ।

न्यायलीलावतीप्रकाशः

न्धः उपाधिपञ्चकेनापि विभागनिर्वाहादित्यर्थः । भ्रमणेति । नचैवं नानाजातिसिद्धावपि गमनत्वमेकं न सिद्ध्येदिति वाच्यम् । जातिग्राहकमानेन लाघवसाचिव्यादेकस्या एव सिद्धेः ।

न्यायलीलावतीप्रकाशविवृतिः

क्षणसूचनार्थं वा । क्वचित्तु अभिमुखेति पाठस्तत्र विरुद्धपदं भिन्नपरमिति पूर्वोक्त एव पर्यवसानमिति दिक् । उपाधिपञ्चकेनापीति । उपाधिघटितेन पञ्चकेनेत्यर्थः । अन्यथा गमनत्वस्याग्रे जातित्वव्युत्पादनाद्विरोधापत्तेः । नानेति । भ्रमणत्वादिजातिसिद्धावपीत्यर्थः । जातीति । अनुगतमत्या गमनपदशक्यतावच्छेदकत्वेन वा तत्सिद्धेरित्यर्थः । अत्र जातिपञ्चकेनैव विभागः प्रतीतिबलसिद्धासु तासु संयोगत्वादौ कार्यतावच्छेदकत्वस्यापि कल्पनादित्येकः कल्पः । अथ वा गमनत्वं जातिरन्यच्चतुष्टयमुपाधिरिति द्वितीयः । वस्तुतो गमनत्वजातिसाधिका प्रतीतिरेव वाच्या, सा चोत्क्षेपणादिसाधारणी । कर्मचतुष्टयाजन्यसंयोगत्वस्य कार्यतावच्छेदकत्वे मानमेव नास्ति, येन तदनुरोधात्सा जातिः स्यादित्युपाधिपञ्चकेनैव विभागः स्वतन्त्रेच्छाया नियमनाभावात् । उपाधिचतुष्टयं च पूर्वनिरुक्तमेव, तद्भिन्नकर्मत्वमेव च गमनत्वम् । न च तत्राप्यूर्द्ध्वाधःक्रमेण विकाशे उत्क्षेपणावक्षेपणत्वप्रसारणत्वानां सामानाधिकरण्येन कथं तेषां विभाजकत्वमिति दोष इति वाच्यम् । परस्परव्यभिचारिभिरिवोपाधिभिर्हेत्वाभासविभागवद्विभागसम्भवादिति भाति ।

---

(१) चतुष्टयतद्विरहाभ्यामिति प्रा० पु० पाठः ।

किं पुनः सामान्यसिद्धौ मानम् ? गौरित्यभिन्नाकारोऽनुभव इति चेत् । न । विकल्पानुपपत्तेः । तथा हि कोऽयमभेदावसायः ? किमेकव्यक्तिवद्व्यक्त्यन्तरे गौरित्यवभासः,(१) उत व्यक्तीनामेकगोस्वभावतावभासः, एकधर्मवत्तयावभासो वा । नाद्यः ! (२)एकव्यक्तेर्गोस्वभावतावद्व्यक्त्यन्तरस्यापि गोस्वभावत्वादेवोप-

---

न्यायलीलावतीकण्ठाभरणम्

अभिन्नेति । विलक्षणेषु व्यक्तिभेदेषु गवाकारानुगतप्रत्ययविषय एव गोत्वमित्यनुभव एव प्रमाणम्, तदन्यथानुपपत्तिर्वेत्यर्थः । एकव्यक्तेरिति । शबलादीनां सर्वासामेव गो-

न्यायलीलावतीप्रकाशः

गौरितीति । व्यक्तीनामानन्त्यान्न ततस्तदुपपत्तिरित्यर्थः । एकव्यक्तिवदिति । वतिप्रत्ययेन व्यक्तिज्ञानयोः सादृश्यमभिधीयते तच्च विषयनिरूप्यमतोऽनुगतस्य विषयस्य गोत्वस्य सिद्धिरित्यर्थः । एकव्यक्तेरिति । गोत्ववृत्तिकारणत्वं गोत्वजात्यङ्गीकारेऽप्युपाधिनावच्छेत्तव्यं गोत्वस्य स्वावृत्तित्वात्, तथा च गोस्वभावोऽसाधारणो गोत्वव्यञ्-

न्यायलीलावतीप्रकाशविवृतिः

व्यक्तिज्ञानयोरिति । शबलधवलागोचरयोर्ज्ञानयोः सादृश्यमेकविषयत्वमेव, तत्र व्यक्तेरेकत्वमसम्भावितमेवेत्येकत्वसिद्धिरित्यर्थः । अत इत्यनन्तरमनुगतप्रत्ययकारणत्वेन चेति शेषः । तेनोत्तरव्याख्यासङ्गतिः । गोत्ववृत्तीति । गोत्वानिष्ठज्ञानकारणत्वमुपाधिनैवावच्छेद्यं गोत्वस्य जात्यन्तरस्य वा तदवृत्तित्वात्, तथाच सास्नादिमत्त्वमेव व्यक्तिनिष्ठमनुगतप्रतीतिकारणतां किन्नावच्छिन्द्यादित्यर्थः । क्वचिज्ज्ञानावृत्तित्वादिति पाठः । स तु ज्ञानवृत्तिकारणत्वमिति पूर्वफक्किकापाठपक्षे बोध्यः । तस्य च ज्ञानस्य व्यवहारकारणत्वं यथा गोज्ञानत्वेनोपाधिना ऽवच्छेद्यं तद्वदनुगतप्रतीतिकारणतामपि सास्नादिमत्त्वमुपाधिरवच्छिन्द्यादित्यर्थः । क्वचित्तु गोत्ववृत्तिकारणत्वमित्येव पूर्वफक्किकापाठः, गोत्वस्य तत्रावृत्तेस्तज्ज्ञानावृत्तित्वादिति तूत्तरफक्किकायां पाठः । स चैवं योजनीयः गोत्ववृत्तिकारणत्वमनुगतमतिका-

---

(१) अवसाय इति मु० पु० पाठः । (२) एकगोस्वभाववदिति पाठन्तरम् ।

पत्तेः। व्यक्तिमात्रस्य वा गौरिति मतिगोचरत्वं गोत्ववद्व्यक्तेर्वा? आद्ये अतिप्रसक्तेः, अन्यत्र जातिस्वीकार इति चेन्न। व्यक्तिविशेषस्य तत्त्वात्। अन्यथा व्यक्तिमात्रस्य गोव्यक्तिमात्रस्य गोत्वव्यञ्जकत्वं गोव्यक्तेर्वेति प्रत्यवस्थानस्य सम्भवात्। न द्वितीयतृतीयौ(१)। न ह्येका गोव्यक्तिरेकधर्मवती वेति प्रतीतिः, किन्तु यथैकस्यां गवि गौरित्यवभासस्तथा व्यक्त्यन्तरेऽपीत्येकानेकविमतिगोचर एवाकारो-

---

न्यायलीलावतीकण्ठाभरणम्

स्वाभाव्यमित्यनुभवस्तदधीन एवेत्यर्थः। गोस्वाभाव्यं व्यक्तिमात्रस्य गोव्यक्तेर्वेति विकल्प्य दूषयति व्यक्तिमात्रस्येति। व्यक्तिविशेषस्येति। काश्चिदेव व्यक्तयस्तथा न तु सर्वा येनातिप्रसक्तिः स्यादित्यर्थः। अन्यथा गोत्वव्यञ्जकत्वेऽप्ययं विकल्पः समान इत्याह अन्यथेति। एकानेकेति। गवाकारानुगतप्रत्ययस्यैकोऽनेको वा विषय इत्यत्र विमतिरेवातोऽनुगतप्रत्ययान्न जातिरित्यर्थः। नन्वनन्तासु व्यक्तिषु कथमेकधर्माग्र-

न्यायलीलावतीप्रकाशः

को धर्मः सास्नादिमत्त्वमेव किं नावच्छिन्द्यादिति भावः। एकगोस्वभाववदिति पाठ एकस्याः गोव्यक्तेः स्वोऽसाधारणो धर्मः सास्नादिस्तद्वदित्यर्थः। भावमविद्वान् शङ्कते व्यक्तिमात्रस्येति। उक्ताभिप्रायेण परिहरति व्यक्तिविशेषस्येति। न चानन्त्यव्यभिचाराभ्यां व्यक्तिषु सङ्केत-

न्यायलीलावतीप्रकाशविवृतिः

रणत्वम्। एतच्चोपलक्षणं ज्ञानवृत्तिव्यवहारकारणत्वमित्यपि द्रष्टव्यम्। तत्र प्रथमे गोत्वस्य तत्र गोत्वेऽवृत्तेरिति हेतुः, अन्यत्र तज्ज्ञानावृत्तित्वादिति, गोत्वस्येत्यनुषञ्जनीयमिति। यद्यपि पूर्वत्र ज्ञानयोः सादृश्यघटकत्वे गोत्वासिद्धिरित्याशङ्का न समाहिता, तथापि सादृश्यमपि सास्नादिमद्विषयकमेवेत्युक्तकल्पमेवेति भावः। स्वोऽसाधारणो धर्म इति। इदं च एकव्यक्त्यासौ स्वभाववदिति मूलपाठपक्षे योजनम्। सास्नादिमत्त्वपरत्वव्याख्यायां नातिप्रसङ्गोऽत आह भावमिति। तच्चैके-

---

(१) नापरौ इति मा० पु० पाठः।

ऽवभासते । असत्यभेदप्रतिभासे शब्दव्यवहारानुपपत्तिरिति चेन्न। अतद्व्यावृत्त्या वा आकारसाधारण्येन वा तदुपपत्तेः। यदर्थक्रियायां नोपयुज्यते न तत्सद्व्यवहारयोग्यम्, यथा गगनकमलम्। नोपयुज्यते च सामान्यमर्थक्रियायामतो न सामान्यं वस्तुभूतम् इति।

अत्रोच्यते। अतद्व्यावृत्तौ कस्तदर्थः? एकं स्वलक्षणं एकजातीयं वा? आद्येऽसाधारण्यम्। अन्यत्र जातिस्वी-

---

न्यायलीलावतीकण्ठाभरणम्

हमन्तरेण शक्तिग्रह इत्यत आह असतीति। अभेदप्रतिभास इति। स्वधर्म्मवत्तत्प्रतिभास इत्यर्थः। अतद्व्यावृत्त्येति। अगोव्यावृत्तिरूपैकधर्म्मवत्तयेत्यर्थः। आकारसाधारण्येन—गवाकारानुभवजनकेन सर्वगोलक्षणसाधारण्येन। जातीनामसत्त्वं साधयति यदर्थेकति। यन्न जनकं न तत् सद्व्यवहारविषय इत्यर्थः। न च सामान्यजन्यं किञ्चिदस्तीति भावः।

आद्य इति। आकाराकारिणोरभेदादेकमेव गवाकारानुगतं

न्यायलीलावतीप्रकाशः

स्य गृहीतुमशक्यत्वात् शक्यतावच्छेदको धर्मः स्वीकर्त्तव्य इत्याह असत्यभेदेति। अतद्व्यावृत्त्या अगोव्यावृत्त्येत्यर्थः। आकारसाधारण्येनेति। साधारण्यं सादृश्यं तच्चैकशब्दप्रयोजनकत्वमित्यर्थः। यदर्थक्रियायामिति। हानादावित्यर्थः। यद्यपि सद्व्यवहारयोग्यत्वमेवार्थक्रियोपयोग इति साध्यावैशिष्ट्यं, तथापि यदर्थक्रियायां नोपयुज्यते इत्यस्य यदर्थक्रियोपयोगित्वेन न प्रतीयत इत्यर्थः।

ननु साधारणाकारज्ञानविषयत्वमेव तदर्थो भविष्यतीत्यत आह आकारस्येति। आद्य इति। साधारणाकारस्य ज्ञानाभिन्नतया ज्ञान-

न्यायलीलावतीप्रकाशविवृतिः

ति। यद्यप्येकं प्रवृत्तिनिमित्तं विनैकशब्दप्रयोगजनकत्वमप्यसम्भवि, तथापि सास्नादिमत्त्वमेवादाय ज्ञानाकारस्य तथात्वमिति भावः। ननु साधारणेति। यद्यप्याकारसाधारण्येन वेति द्वितीयकल्पदूषणपरमिदं मूलमिति प्रथमपक्षखण्डनमसङ्गतत्वेनैव तदवतारणमयुक्तम्,

कारः। आकारस्य च किं साधारण्यं(१) साधारणस्वभावत्वं साधारणसंसर्गित्वं वा ? आद्ये ज्ञानस्थैर्यप्रसङ्गः। नेतरः। जातिस्वीकारापत्तेः। अविपर्यस्तप्रतीतिविषयत्वेन(२) वस्तुसत्त्वप्रतीतावर्थक्रियाविरहस्याहेतुत्वात्। स्वप्रतीतिलक्षणायां वा अर्थक्रियायां व्यक्त्यन्तरेऽसंसर्गमाश्रित्य व्यतिरेकस्थितौ हेतोरसिद्धेः।

न्यायलीलावतीकण्ठाभरणम्

ज्ञानं सर्वव्यक्तिसाधारणमिति वाच्यं, तथाचातीतानागतगोव्यक्तिष्वप्येकमेव ज्ञानं स्यादित्यर्थः। क्रियाविषयत्वेन वस्तुत्वं न त्वर्थक्रियाजनकत्वेनेत्यनुमानमपि सोपाधीत्यर्थः। विषयतया-स्वगोचरसाक्षात्कारजनकत्वेन। हेतोरसिद्धिमाह स्वप्रतीतीति। नन्वन्वयव्यतिरेकगम्यं कारणत्वं, व्यतिरेकश्च जातेर्व्यापकत्वान्नित्यत्वाच्च नास्तीत्यत आह व्यक्त्यन्तर इति। महिषादौ गोत्वव्यतिरेकात्तत्प्रतीतिव्यतिरेक इत्यर्थः। ननु व्यापकत्वात् महिषादावपि तदसंसर्गोऽनुपपन्न

न्यायलीलावतीप्रकाशः

स्यापि स्थैर्यप्रसङ्गादविनाशित्वप्रसङ्गादित्यर्थः। वस्तुतो ज्ञाननिष्ठसादृश्यमप्येकधर्मनिर्वाह्यं, स च विषयवृत्तिरेव धर्म इत्यर्थः। यदर्थक्रियायामित्यनुमानं दूषयति अविपर्यस्तेति। प्रत्यक्षबाधितो हेतुरित्यर्थः। ननु हानाद्यभावेऽपि ज्ञानादिलक्षणक्रियास्तीत्याह स्वप्रतीतीति। ननु स्वप्रतीतावपि जातेर्न कारणत्वमन्वयव्यतिरेकाभावादित्यत आह व्यक्त्यन्तर इति। यद्यपि जातेर्व्यतिरेको नास्ति तथापि यस्यां व्यक्तौ जातिरस्ति तस्यां प्रतीतिं जनयति यस्यां च

न्यायलीलावतीप्रकाशविवृतिः

तथापि इत्यत आहेत्यस्य इत्यतोऽप्याहेत्यर्थः। तथाचोभयखण्डनपरमेव मूलमिति भावः। अक्षणिकतायामिष्टापत्तेराह—अविनाशित्वेति। ननु ज्ञानत्वेन ज्ञानस्य विनाशित्वेऽप्याकारतयाऽविनाशित्वं स्यादतोऽपरितोषादाह वस्तुत इति। स चेति। गोत्वविषयत्वमेव सादृश्यमिति भावः। व्यतिरेको नास्ति स्वरूपसम्बन्धावच्छिन्नः कालोपाधौ दि·

---

(१) साधारण्यं च किं-प्रा० पु० पाठः। (२) विषयतयेति अत्र मिश्रसम्मतो पाठो बोध्यः।

व्यापकस्य कोऽसंसगार्थः, असंसर्गिणो वा को व्यापकार्थ इति चेन्न । वैशेषिकनये तस्य पिण्डमात्रगतत्वात् । प्रलये सर्वपिण्डानां समुच्छेदे सामान्यमप्युच्छिद्येतेति चेन्न । (सर्व)(१)सम्बन्धिविगमे(ऽपि) स्वसत्ताव्यवस्थितेः । इयमेवहि तर्हि सर्वगततेति चेत् । न । तस्याः स्वसम्बन्धिसत्तामाश्रित्य प्रवृत्तेः, अन्यथा नित्यतैव सर्वगततेति महत्पाण्डित्यम् । सर्वगतत्वं च सर्वत्र समवायो वा, सम्बन्धान्तरं वा ? तदितरोपलम्भकहानिप्रयुक्तोपलक्षितव्यतिरेकित्वं वा ? नाद्यः, सर्वत्राप्रतीतेः । तद्व्यञ्जकसहकारिविरहाद-

---

न्यायलीलावतीकण्ठाभरणम्

इत्याह व्यापकस्येति । वैशेषिकनय इति । गोत्वस्य समवायः सास्नादिमत्स्वेव व्यक्तिषु न त्वन्यत्रेत्यर्थः । अन्यमते तु सर्वत्र गोत्वसमवायसत्त्वेऽपि गोत्वात्यन्ताभावनिबन्धनो महिषादौ तदव्यवहारः, न त्वत्यन्ताभावाप्रतियोगित्वमेव व्यापकत्वमिति भावः । ननु यदि पिण्डेष्वेव वर्त्तते तदाऽऽश्रयाभावात् प्रलये न स्यादित्यनित्यत्वं पर्यवस्येदित्याह प्रलय इति । इयमेवेति । सार्वदिकी स्वरूपसत्तैवेत्यर्थः । तस्या इति । यदि सर्वत्रास्याः सम्बन्धः स्यात्तदा सर्वगतता स्यादित्यर्थः । सार्वदिकीति हि सत्ता नित्यता सा तु सर्वत्र गतेत्याह अन्यथेति । तदितरेति । व्यतिरेकप्रयुक्तोपलब्धिव्यतिरेकराहितत्वमित्यर्थः । अन्यथा

न्यायलीलावतीप्रकाशः

नास्ति तस्यां न जनयति इत्येवंरूपान्वयव्यतिरेकाभ्यां जातेः कारणत्वमित्यर्थः । पिण्डमात्रेति । पिण्डमात्रं सास्नादिमद्रूपं तद्गतत्वाद्गोत्वस्येत्यर्थः । सर्वसम्बन्धीति । आश्रयाशेषव्यक्तिनाशेऽपि स्वरूपसत्तायाः सद्भावादित्यर्थः । इयमेवेति । स्वरूपसत्तैवेत्यर्थः । तस्याः सर्वगततायाः इत्यर्थः । तदितरेति । सामान्यस्याप्रतीतिस्तदितरसहकार्यभावव्यावृत्तेत्यर्थः । सर्वत्रेति । सामान्यस्येति शेषः । तद्व्यञ्जकेति । सामान्यव्यञ्-

न्यायलीलावतीप्रकाशविवृतिः

गुपाधौ वेति शेषः । सर्वव्यक्तिपरत्वे विरोधोऽत आह सास्नादिमदिति ।

---

(१) ( ) एतच्चिह्नान्तर्गतः पाठो मा० पु० नास्ति किन्तु प्रकाशकर्तुरभिमतः ।

प्रतीतिरिति चेत् । न । सम्बन्धिद्वययोग्यताया एव तत्प्रयो-
जकत्वात्, अन्यथा पवनादावपि रूपसम्भेदापत्तेः, नाश्वे गो-

न्यायलीलावतीकण्ठाभरणम्

घटादावपि इयं सर्वगतता स्यात् । सम्बन्धिद्वयेति । समवायः सम्ब-
न्धिद्वये गृह्यमाणे गृह्यत एवेत्यर्थः । अन्यथेति । यदि समवाये सत्यपि
तद्विशिष्टप्रतीतिः तत्रेत्युपेयमित्यर्थः । नाश्वे गोत्वमिति । तदत्यन्ताभाव
एव तत्र गृह्यत इति कथं तदपि स्यादित्यर्थः । ननु समवायस्यैक्ये
कथमेवं स्यात्, नहि स्पर्शसमवायादन्यो रूपसमवायो, न वा अश्व-
त्वसमवायादन्यो गोत्वसमवाय इति चेन्न । एकोऽपि समवायो निरू-
पकभेदाद् भिन्नः कालवत्, नहि य एव रूपनिरूपितः समवायः स
एव स्पर्शनिरूपितः, अन्यथा वायौ रूपसमवायो नास्तीति प्रतीतिर्न
स्यात् । रूपं नास्तीति तत्प्रतीतेर्विषय इति चेत् । न । समवाये नञ्स
म्बन्धात्, अन्यथा रूपं नष्टमित्यस्य रूपसमवायो नष्ट इति कल्पना
स्यात्, तथाच जितं मीमांसकैः । तथाच विशेष्याभेदेऽपि विशिष्ट-

न्यायलीलावतीप्रकाशः

केत्यर्थः । सम्बन्धिद्वयेति । जातिव्यक्तियोग्यता यथा गोत्वगोव्यक्त्यो-
स्तथा गोत्वाश्वव्यक्त्योरपीति तत्रापि गौरितिप्रतीत्यापत्तेरित्यर्थः ।
तत्प्रयोजकत्वात्-सामान्यप्रतीतिप्रयोजकत्वादित्यर्थः। यदि च यत्राश्र-
याश्रितस्वरूपमेव योग्यता तत्रापि तदाश्रितानुपलम्भः कथञ्चिद्वा-
च्यस्तत्राह अन्यथेति । ननु समवायस्यैकत्वे कथं रूपवन्नीरूपव्यवस्था?
न च घटेन सह रूपसम्बन्धरूपत्वं समवायस्य न वाय्वादिनेति वा-
च्यम्, रूपसम्बन्धरूपत्वं हि समवायस्य यदि स्वरूपमेव तदा रस-
सम्बन्धरूपत्वं न स्यात्, तयोर्विरोधात् अन्यच्च दुर्वचम । उच्यते ।
वायौ रूपसमवायेऽपि रूपस्यात्यन्ताभावोऽस्ति न घटे। कथमेवम्? अधि
करणस्वभावात् अबाधितरूपवन्नीरूपप्रतीतेश्च । वायौ रूपविशिष्टस्य
समवायस्याभावो भवत्येव, विशेषणाभावे विशिष्टाभावस्यावश्यक-

न्यायलीलावतीप्रकाशविवृतिः

ननु समवायस्येति । तथाच नाश्वे गोत्वमित्यपि प्रतीतिरयुक्तैवेति भावः ।
वायौ रूपेति । तथाच न समवायमात्रं विशिष्टप्रतीतिनियामकमपि तु
विशेषणतापि, सा च प्रतीतिबलकल्पनीयेति भावः । 'सविशेषणे

त्वमिति प्रतीतेश्च । न द्वितीयः, षट्पदार्थातिरिक्तपदार्थास्वीकारात् । असत्येव सम्बन्धे आनुमानिकसम्बन्धबुद्धिजनकं (१)रूपमेवेवमिति चेत् । न । तथा सति सर्वत्रानुमानेऽनाश्वासापत्तेः । न तृतीयः, तद्व्यतिरेकेणैव घटादावपि तद्बुद्ध्यभावात् । स्वव्यतिरेकेणापि घटस्यानुपलम्भो न तु सामान्यस्य कस्यचिदिति चेत् । न । नित्यतैषा न सर्वगतता । ततो गोव्यक्तिभिन्नपिण्डेऽप्यसत्त्वेन न सर्वगतत्वमिति सर्वमनाकुलमिति ।

सामान्यं द्विविधं परमपरं च । तत्र परं सत्ता । नन्विद-

न्यायलीलावतीकण्ठाभरणम्

भेदात्, यथा कालस्याभेदेऽपि वर्तमानादीनां भेद इति । षट्पदार्थेति । सम्बन्धान्तरस्य परिगणितपदार्थेऽन्तर्भावादित्यर्थः । नन्वनुत्पन्नायां गवि तत्रास्य सामान्यं कथं समवेयादिति तद्देशादौ तत् सम्बन्धोऽनुमीयते, न तु तत्र परमार्थतः सम्बन्धो देशस्यापि गोत्वापत्तेरित्याह– असत्येवेति । तथासतीति । अनाभासमनुमानमसदपि यदि विषयीकुर्य्यादित्यर्थः । तद्व्यतिरेकेणैवेति । तदितरोपलम्भकस्यालोकादेर्व्यतिरेकेणेत्यर्थः । नित्यतैषेति । यद्यपि महिषादौ न गोत्वव्यतिरेकप्रयुक्तस्तदनुपलम्भः किन्तु सास्नादिव्यतिरेकप्रयुक्त इति व्यापकतैव पर्य्यवस्येत, तथापि नाश्वे गोत्वमित्यबाधितप्रत्ययादसर्वगतत्वमित्यर्थ इति भावः ।

न्यायलीलावतीप्रकाशः

त्वादित्यन्ये । घटेतरसहकारिविरहेऽनुपलम्भस्य घटादावपि तुल्यत्वादित्याह तद्व्यतिरेकेणैवेति ।

यदि प्रमाणग्राह्यत्वमेव सत्त्वं स्यात्तदा प्रमित्यविषयत्वदशायां

न्यायलीलावतीप्रकाशविवृतिः

ही'ति न्यायेन विशेष्यवति विशिष्टाभावोऽपि विशेषणविरहपर्यवसन्न एवेति पूर्वकल्प एव पर्यवसानमित्यरुचेराह–अन्य इति । प्रमाणग्राह्यत्वमिति । प्रमाणजन्यज्ञानोपहितत्वमित्यर्थः । तेन नेश्वरज्ञानमादाय

(१) अनकत्वरूप–इति मु० पु० पाठः ।

मसम्बद्धं, प्रमाणग्रहणयोग्यतैव सत्ता, प्रमाणग्रहणयोग्यता वस्तूनां स्वरूपं, तत् व्यावृत्तं चेदननुगतव्यवहारासिद्धिः, अनुवृत्तं चेत्सैव सत्तेति चेन्न। व्यावृत्तमेव हि स्वरूपं सत्ता, अनुवृत्तव्यवहारस्तु प्रमितत्वोपाध्यालम्बनः, सच्छब्दप्रवृत्तिरपि तत्रैव। यद्वा सामान्यविशेषसमवाय(१)व्यावृत्तेष्वेव रूपेषु सदित्यनुगतव्यवहारोऽस्तु।

अत्रोच्यते। प्रमितत्वेन तुल्येषु पदार्थेषु भावाभावव्यवहार-

न्यायलीलावतीकण्ठाभरणम्

परं व्यापकमपरं व्याप्यम्। व्याप्यसत्तामाक्षिपति प्रमाणेति। अतएव शशविषाणादावसत्त्वव्यवहार इति भावः। सच्छब्दप्रवृत्तिरपीति। सत्पदसंकेतोऽपि प्रमितत्वोपाधिनिबन्धनो न तु सत्तानिबन्धन इत्यर्थः। यद्वा यत्रैव वैशेषिकानामर्थपदं पारिभाषिकं तासु व्यक्तिषु सदित्यनुगतव्यवहार इत्याह यद्वेति।

प्रमितत्वेनेति। भावाभावव्यवहारवैचित्र्येणान्यथानुपपत्त्या भावमात्रवृत्तिः कश्चिद्धर्म्मोऽभ्युपगम्यत एवेत्यर्थः। ननु तथापि सत्ता

न्यायलीलावतीप्रकाशः

सतोऽप्यसत्त्वं स्यादित्यत उक्तं योग्यतेति। प्रमितत्वेति। परम्परासम्बन्धभ्रमत्वजातिनिबन्धन इत्यर्थः। तत्रैवेति। प्रमितत्वोपाधिविशिष्ट इत्यर्थः। यत्रापि न सत्तासमवायस्तत्रापि तन्निबन्धः सद्व्यवहार इत्यावश्यकत्वात् तदेव निमित्तमित्याह यद्वेति।

सत्तास्वीकारे तु न भावाभावव्यवहारवैचित्र्यानुपपत्तिरित्याह भावव्यवहारेति। भावस्यैवेति। अभावव्यावृत्तधर्मविशेषस्यैवेत्यर्थः। सत्ता हि द्रव्यगुणकर्मसु समवायेन वर्त्तते सामान्यविशेषयोश्चैकार्थसमवायेन,

न्यायलीलावतीप्रकाशविवृतिः

व्यक्त्यसम्भवः। भ्रमत्वजातीति। अनुभवत्वजातीत्यर्थः। तन्निबन्धन इति। व्यावृत्तस्वरूपमात्रनिबन्धन इत्यर्थः। ननु सत्ताया भावत्वव्यवहारोपपादकत्वे सामान्यादौ तद्व्यवहारो न स्यादित्यत आह सत्ता हीति।

---

(१) समवायवद्व्यावृत्तेषु–मु० पु० पाठः।

वैचित्र्यानुपपत्तेः। भावव्यवहारगोचरस्य भावस्यैव सत्तास्वभावत्वात्। प्रमितत्वम् भावव्यवहारगोचरो भावविरोधित्वं चाभावव्यवहारगोचर इति चेत्। न। अभावव्यवहारगोचरस्य(१) प्रमितत्वेन विरुद्धभावाभावव्यवहारप्रसङ्गात्। भवत्येवेति चेत्। न। घटाघटादिव्यवहारमर्यादया निषेध्यनिषेधव्यवहारयोः परस्प-

न्यायलीलावतीकण्ठाभरणम्

याः किमायातमित्यत आह भावव्यवहारेति। अभावव्यवहारेति। यदि प्रमितत्वमभावाद्यावृत्तं स्यात्तदाऽसाधारण्येन भावव्यवहारं जनयेन्न त्वेवमित्यर्थः। प्रमितत्वोपाधिनिबन्धनमेव विरुद्धभावाभावव्यवहारप्रसङ्गमापादयति विरुद्धेति। आशयमविद्वानाह भवत्येवेति। आशयमुद्घाटयति घटाघटेति। यथा घटाघटव्यवहारो नैकसामान्यनिबन्धन-

न्यायलीलावतीप्रकाशः

समवाये चानवस्थाभिया समवायानङ्गीकारेऽपि स एव समवायस्तत्र वर्त्तते। न चैवमननुगमः, वृत्तीनां भेदेऽपि समवायस्यैकत्वात्। न चाभावेनापि समं तस्य यथाकथंचित्सम्बन्धोऽस्तीति वाच्यम्। उक्तत्रयेण नियमादिति सम्प्रदायविदः। भावविरोधित्वं द्रव्यत्वादिषट्कात्यन्ताभाववत्त्वमित्यर्थः। अभावत्वमनुगतमज्ञात्वापि अत्यन्ताभावव्यक्तिविशेषस्य प्रमितत्वात्। यदि च भावव्यवहारगोचरः प्रमितत्वं, तर्हि तत्रापि, तथाच तत्त्वमभावव्यवहारगोचर इति वदतो व्याघातापत्तिरभावस्यापि प्रामितत्वादित्याह अभावव्यहवाराविषयस्येति।

न्यायलीलावतीप्रकाशविवृतिः

उक्तेति। तथाच यत्र सत्तायाः सम्बन्धे समवायाः पतति स भाव इति भावः। ननु विरोधः सहानवस्थानं भावसामान्येन सहासम्भवि, प्रतियोगिपरत्वेऽपि भावपदस्यान्योन्याभावाव्याप्तेः, वध्यघातकत्वं च विरोधोऽत्र न सम्भवत्येवेत्यत आह द्रव्यत्वादीति। ननु भावत्वाज्ञानेऽत्यन्ताभाववत्त्वमपि दुर्ज्ञेयमत आह अभावत्वमिति। तर्हि तत्रापि अभावेऽपि, एतदनन्तरं तथाचेति शेषः। तत्त्वं भावविरोधित्वम्। क्वचिद्विरोधित्वमिति पाठः, स सुगम एव। अत्राभावानुमाने विपक्ष

(१) विषयस्य-प्रा० पु० पाठः प्र० अ०।

रविरुद्धप्रतिबन्धसिद्धौ(१) भावाभावव्यवहारयोरपि परस्परविरुद्धनिमित्तकत्वव्यवस्थितेः। तस्माद्विमतिविषयाणि द्रव्यगुणकर्माण्येकसामान्यवन्ति अनित्यत्वात् गोवत्। न चेदेवं गोत्वमपि न स्यात्, सास्नादिमत्त्वेनैव गोव्यवहारोपपत्तेः। न च भिन्नानां

न्यायलीलावतीकण्ठाभरणम्

स्तथा भावाभावव्यवहारोऽपि प्रमितत्वमात्रनिबन्धनो न भवितुमर्हतीत्यर्थः। बिमतिविषयाणीति प्रत्यक्षाणामेव द्रव्यगुणकर्मणा पक्षता, तेन न हेतोर्भागासिद्धिः। तदुत्तरमुपादेयवृत्तिपरसामान्यस्य उपादेयवृत्तित्वं साधनीयम्। एकसामान्यवन्ति परस्परवृत्तिसामान्यवन्तीत्यर्थः। न चाप्रसिद्धिः, श्रवणधारणादौ तथा सिद्धेः, इह तु पक्षधर्मताबलात् परस्परत्वमेषामेव स्यात् तथाच सत्तासिद्धिः। यद्वा रूपादयो द्रव्यवृत्तिजातिमन्तः जातिमत्त्वात् घटवत्। न च कर्मणि व्यभिचारः, पक्षसमत्वात्। न च द्रव्यत्वमुपाधिः, सदाकारानुगतप्रतीत्यन्यथानुपपत्त्या गुणेऽपि तत्सत्त्वेन साध्याव्यापकत्वात। द्र·

न्यायलीलावतीप्रकाशः

निमित्तकत्वस्थितेरिति। तथाच नैकस्यां व्यक्तौ भावव्यवहार इत्यर्थः। अपि च भिन्नेषु सदित्यनुगतव्यवहारस्य अननुगतप्रयोज्यत्वस्थितेरनुगतधर्मस्य साक्षात्सम्बन्धे बाधकादेव परम्परासम्बन्धसिद्धिः प्रमाणप्रवृत्तेः प्राक् सदितिबुद्ध्यनापत्तेः, अतीतानागतयोरपि प्रामाणिकतया सदितिबुद्ध्यापत्तेश्च। तस्मदिति। नन्वेकसामान्यवत्त्वसाधने सिद्धसाधनम्, द्रव्यादित्रयवृत्त्येकसामान्यसाधने च सा·

न्यायलीलावतीप्रकाशविवृतिः

बाधकं वदन्नेव प्रमितत्वात्सत्ताया भेदकान्तरमाह अपि चेति। प्रमाणेति। तदप्रतिसन्धानेऽपि सद्व्यवहारादिति भावः। अतीतेति। यद्यपि वर्त्तमानत्वप्रत्ययाभावेऽपि तयोः सद्बुद्धिरिष्टैवान्यथा सत्तास्वीकारेऽप्यगतेः, तथापि पूर्वोक्तयुक्त्योरेव तात्पर्यम्। विमतिविषयाणीति मूलं भागासिद्धिवारकम्। यद्यपि विषयशब्दस्याजहल्लिङ्गत्वादयुक्तं, तथापि विषयशब्दस्य विषयिलक्षणयान्यपदार्थमाश्रित्य समाधेयम्। सिद्धसाधन·

---

(१) स्थितौ-पु० पु० पाठः।

सामान्यविशेषसमवायवदाभिन्नव्यवहारगोचरत्वम्, सर्वत्र सामान्योच्छेदप्रसङ्गात् । सामान्यादौ चारोपितसत्ताबलेनैव तदुपपत्तेः । अपरं द्रव्यत्वादि(१) ।

न्यायलीलावतीकण्ठाभरणम्

व्यत्वगुणत्वकर्म्मत्वानि जातिव्याप्यानि जातिमन्निष्ठात्यन्ताभावप्रतियोगित्वात घटवत् । न चाप्रयोजकत्वम, सदाकारबुद्धीन्द्रियसाधारण्यात्, अन्यथा अनुपपत्तेरिति भावः । ननु यथा सामान्यानां विशेषाणां चानुगमः सामान्यमन्तरेण तथा प्रकृतेऽपि स्यादित्यत आह नचेति । समवायग्रहणं सम्पातायातम। तर्हि गोत्वादिकमपि त्वदभ्युपगतं न स्यादित्यर्थः । ननु भावबुद्धिवैचित्र्यानुरोधात्तदा सत्ता अभ्युपेयेत यदि सा तत्र वर्त्तेतेत्यत आह सामान्यादाविति । तदुपपत्तेः–भाव·

न्यायलीलावतीप्रकाशः

व्याप्रसिद्धिः । मैवम् । रूपादयो द्रव्यवृत्तिजातिमन्तः जातिमत्त्वात् घटवत् । न च द्रव्यत्वमुपाधिः, उक्तविपक्षबाधकाद्धेतोः साध्यव्याप्यत्वेन तदव्यापकतया साध्याव्यापकत्वात । यद्वा द्रव्यत्वादीनि जातिव्याप्यानि जातिमन्निष्ठात्यन्ताभावप्रतियोगिजातित्वात् घटत्ववदिति विवक्षितत्वात् ।

न्यायलीलावतीप्रकाशविवृतिः

मिति । द्रव्यत्वादिकमादायेति भावः । न च लाघवसाहित्यादेकसामान्यसिद्धिरिति वाच्यम् । तस्य कल्पनीयत्वेनैकत्वलाघवानादरादिति भावः । रूपादय इति । आदिपदग्राह्यं कर्म, तथाच लाघवान्नितयवृत्तिरेकैव जातिः सिद्ध्यतीति न द्रव्यवृत्तिजात्याऽर्थान्तरं कल्पनीयतायास्तुल्यत्वात् । न च गुणकर्मद्रव्यैकदेशवृत्तिजात्याऽर्थान्तरं द्रव्यत्वेन सङ्करापत्त्या बाधात् । यद्वेति । व्याप्यत्वं भेदगर्भमतो नार्थान्तरम् । जातित्वादौ व्यभिचारादन्तिमजातिपदम् । अनवस्थावाचकत्वेन सामान्यसिद्धव्यभिचारवारकत्वेन वा प्रथमविशेषणसार्थकता, निर्विकल्पकानुमाने विशिष्टपदवत् । रजतत्वकलशत्वयोरपि द्रव्यत्वादा·

---

(१) त्तेः–ननु इति प्रा० पु० पाठः ।

ननु परापरव्यतिरिक्तमपि सामान्यमस्तु रजतत्वकलशत्ववत्, न । परस्परपरिहारवतोः सामान्ययोः समावेशे तदतज्जातीयविरोधोच्छेदापत्तेः । कलशजातीयं च रजतसामान्यपेक्षकार-

---

न्यायलीलावतीकण्ठाभरणम्

बुद्ध्युपपत्तेः ।

परापरव्यतिरिक्तमपीति । परस्परात्यन्ताभावसमानाधिकरणयोरपि जात्योः सामानाधिकरण्यमस्त्वित्यर्थः । तदतज्जातीयेति । गोत्वागोत्वयोः समावेशे गवाश्वाकार एक एव पिण्डः स्यान्न च तथास्ति, तथा च न समावेश इत्यर्थः । यदि रजतत्वकलशत्वयोः समावेशस्तदा गोत्वाश्वत्वयोरपि कदाचित् स्यात् । यत्तु करम्बितपिण्डानुपलम्भान्न तथा तदा इदानीं तथा दर्शनाभावेऽपि कदाचित् प्रक्ष्यत इत्यत आह कलशजातीयं चेति । तथापि न समावेशः, किन्तु रजतत्वादिव्याप्यं भिन्नमेव कलशत्वं संस्थानविशेषवृत्ति च न कलशत्वं बहान्नीलो घटश्चलतीति प्रतीत्या द्रव्यत्वसिद्धेः । किंच संस्थानवृत्तित्वेऽपि अन्यतर-

न्यायलीलावतीप्रकाशः

परापरव्यतिरिक्तमपीति । परापरभावं विनापि सामान्यमस्त्वित्यर्थः । रजतेति । ननु संस्थानवृत्त्येव घटत्वं न द्रव्यवृत्तीति न तयोः समावेशः । संस्थानं ह्यवयववृत्तिः संयोग एव, युक्तं चैतत्, कथमन्यथा तस्मिन्नेव रजते तत्संस्थानसत्त्वासत्त्वाभ्यां घटतदभावव्यवहारः । मैवम् । तत्राप्यन्यतरकर्मजत्वादिना सङ्करप्रसङ्गात्, कथमन्यथा तस्मिन्गुणगतजातौ सङ्करो न दोष इति तु निर्बीजमेव वैजात्यमेवेति । नन्वेवं तन्तुपटयोरिव घटरजतयोरभेदानुभवः कदापि न स्यात् । अत्राहुः । रजतत्वादिव्याप्यं नानैव घटत्वम् न चैवं रजतादिघटेष्वनुगतव्यवहारो न स्यात् घटत्वस्य रजतादिप्रत्येकविश्रान्ततया व्यक्तिस्थानीयत्वादिति वाच्यम् । तादृक्संस्थानवत्त्वेनोपाधिना तथा व्यवहारात् ।

न्यायलीलावतीप्रकाशविवृतिः

इह परापरेति । परस्परपरापरेत्यर्थः । ननु करम्बिताकारवस्तूपलम्भापत्तिस्तादृशजातिद्वयबाधिका, सा च गुणगतजातौ नास्त्येव, गुणस्य निराकारत्वादत आह गुणगतजाताविति । एतज्जातीयताविरोधिभङ्गप्रस-

७० जागदीशीपञ्चलक्षणी सिंहव्याघ्रलक्षणं च। श्रीजगदीशतर्कालङ्कारकृतम्। न्यायाचार्य पं० शिवदत्तमिश्र विरचित गंगानिर्झरिणीव्याख्यया टिप्पण्यादिभिर्भूषितं च। [न्यायवि० ९] रु० ०—८

७१ (१) ब्रह्मसूत्रशाङ्करभाष्यम्। चतुःसूत्र्यन्त पूर्णानन्दीय व्याख्या सहितया श्रीगोविन्दानन्द प्रणीतया रत्नप्रभया समन्वितम्। द्वितीयाध्यायस्य द्वितीयपादान्तो प्रथमोभागः। [वेदान्तविभागे ९] रु० २—८

७१ [२] ब्रह्मसूत्रशाङ्करभाष्यम्। श्री गोविन्दानन्द प्रणीतया रत्नप्रभया समन्वितम्। द्वितीयाध्यायस्य तृतीयपादमारभ्य समाप्तिपर्यन्तम्। द्वितीयोभागः। [वेदान्त वि० ९] रु०२—८

७२ [१]–सिद्धान्तशिरोमणिः। श्रीभास्कराचार्य विरचितः। "गणिताध्यायः" वासनाभाष्य सहितः ज्योतिषाचार्य म० म० श्री ६ बापूदेवशास्त्रिकृतटिप्पणी सहितः। [ज्यो० वि० ४] रु० २—०

७२–[२]–सिद्धान्तशिरोमणिः। " " "गोलाध्यायः" वासनाभाष्य सहितः। ज्योतिषाचार्य म० म० श्री ६ बापूदेवशास्त्रि कृत टिप्पणी सहितः। [ज्यो० वि० ४] रु० २—०

७३ काकचण्डीश्वरकल्पतन्त्रम्। पण्डित रामकृष्ण शर्म्मणा सम्पादितम्। पण्डित बटुकनाथ शर्म्मा एम. ए. साहित्योपाध्याय इत्येतेन लिखितया प्रस्तावनया सनाथीकृतम्। [आयुर्वेद शास्त्रविभागे १] रु० ०—८

७४ किरातार्जुनीयम्। श्रीमत्कविकुलचूडामणिभारविविरचितम् मल्लिनाथसूरिकृतया घण्टापथसमाख्यव्याख्यया तथा पं० श्रीगङ्गाधरशर्मणा कृतया सुधाऽऽख्यव्याख्यया समलङ्कृतम्। [सर्गत्रयमात्रम्]। [काव्य वि० १०] रु० ०—१२

७५ चन्द्रालोकः। पीयूषवर्षश्रीजयदेवकवि प्रणीतः। श्रीमत्पद्मनाभमिश्रापराभिधान प्रद्योतनभट्टाचार्य विरचितया चन्द्रालोकप्रकाशापराख्य 'शरदागम' टीकया सङ्कलितः। साहित्याचार्येण खिस्ते इत्युपाख्यनारायणशास्त्रिणा भूमिकादिभिः सम्भूष्य सम्पादितः। [अलङ्कार वि० ३] रु० ०—१०

७६ किरातार्जुनीयम्। श्रीमत्कविकुलचूडामणिभारविविरचितम्। मल्लिनाथसूरिकृतया घण्टापथसमाख्यया तथा पं० श्रीकनकलालशर्मणा कृतया भावार्थदीपिनीव्याख्यया समलङ्कृतम्। [सर्गत्रयमात्रम्] [काव्य वि० ११] रु० ०—६

७७ शक्तिवादः, श्रीगदाधरभट्टाचार्यप्रणीतः, पण्डितप्रवरश्रीहरिनाथतर्कसिद्धान्तभट्टाचार्यविरचितविवृतिसहितः। [न्यायविभागे १०] रु० ३—०

७८ माथुरीपञ्चलक्षणी। पं श्रीउमानाथज्योतिकृतव्याख्या सहिता तथा माथुरीसिंहव्याघ्रलक्षणम्। पं० श्रीहरिरामशुक्ल विरचितया व्याख्यया सहितं तथा पं० श्रीहरिहरशास्त्रि सङ्कलित माथुरीपञ्चलक्षणी क्रोडपत्रेण च। [न्याय वि० ११] रु० ०—६

७९ रसाध्यायः। टीकया संवलितः। [आयुर्वेदशास्त्र वि० २] रु० ०—१०

८० (१) पाणिनिव्याकरणे वादरत्नम्। न्यायव्याकरणाचार्य मीमांसक शिरोमणि पं० सूर्यनारायणशुक्लेन विरचितम्। (तत्र च न्यास परिष्कारपरिशिष्ट भेदेन प्रकरण त्रयम् यत्र पञ्चन्यून सार्धशतसूत्रेषु १४५ महताटोपेन न्यासाविचारताः तत्र प्रथमं प्रकरणं मुद्रितं प्रथमो भागः। [व्या० वि १०] रु० १—८

८० (२) पाणिनीव्याकरणे वादरत्नम्। द्वितीयोभागः [न्या० वि०] रु० १—४

८१ गणितकौमुदी। [हिन्दीभाषाटीकासहिता] प्रथमापरीक्षापाठ्यनिर्द्धारितगणितसंग्रहपुस्तकम्। [गणितविभागे १] रु० ०—६

८२ छन्दः कौमुदी। [हिन्दीभाषाटीकासहिता] प्रथमापरीक्षापाठ्यनिर्द्धारितछन्दसंग्रहपुस्तकम्। [छन्दोविभागे ३] रु० ०—६

८३ योगदर्शनम् । महर्षिप्रवरपतञ्जलिप्रणीतम् । तत्र (१) भोजवृत्तिः, [२] भावागणेशवृत्तिः, [३] नागोजीभट्टवृत्तिः, [४] मणिप्रभा, [५] योगचन्द्रिका, [६] योगसुधाकराख्य टीका षट्कसमेतम् । सटिप्पण । [योग० विभागे १] रु० २—८

८४-[१] रघुवंशमहाकाव्यम् । श्रीकालिदासविरचितम् । म० म० मल्लिनाथकृत सञ्जीविनीटीका तथा पं० ब्रह्मशङ्करमिश्रकृतपरीक्षोपयोगि सुधाऽऽख्यव्याख्यया सहितः । १ से ४ सर्गः । मूल्यम् रु० १-४-० तथा १ से ५ सर्गः । रु० १—८

८४-[२] रघुवंशमहाकाव्यम् । श्रीकालिदासविरचितम् । म० म० मल्लिनाथ कृत सञ्जीविनीटीका पं० श्रीसुदामामिश्रकृत परीक्षोपयोगि सुधाऽऽख्य व्याख्यया सहितः । ६ से १० सर्ग । (काव्य वि० १२) रु० १—८

८५ योगदर्शनम् । पं० श्रीबलदेवमिश्रकृत योगसूत्रप्रदीपिकाख्यव्याख्यया सहितम् । सटिप्पण । [योग वि० २] १—०

८६ काव्यमीमांसा । राजशेखरविरचिता । साहित्याचार्य पं० श्रीनारायणशास्त्रि खिस्ते कृत काव्यमीमांसा—चन्द्रिका टीका सहित [१ से ५ अध्याय] प्रथमो भागः । [काव्यविभागे १३] रु० ०—८

८७ नागानन्दनाटकम् । श्रीहर्षदेवप्रणीतम् । काशीविश्वविद्यालयाध्यापकेन एम० ए० साहित्याचार्येति पदवी विभूषितेन पण्डित श्री बलदेव उपाध्यायेन स्वप्रणीतया भावार्थदीपिकाख्यया व्याख्यया समलङ्कृत्य बृहत् भूमिका हिन्दीभाषानुवादादिभिः सनाथीकृत्य सम्पादितम् । [नाटक विभागे १] रु० १—४

८८ मेघदूतकाव्यम् । महाकवि श्रीकालीदास विरचितम् । मल्लिनाथकृत सञ्जीविन्या, चारित्रवर्द्धनाचार्य विरचित चारित्रवर्द्धिन्या तथा साहित्याचार्य पं० श्री नारायण शास्त्री खिस्तेकृत भावप्रबोधिनीव्याख्या टिप्पण्या च सहितम् । [काव्य० १४] रु० ०—८

८९ जागदीशोऽव्यधिकरणम् । न्यायाचार्यश्रीशिवदत्तमिश्रविरचित गंगाख्यव्याख्या टिप्पणी सहितम् । (न्यायविभागे १२) रु० २—०

९० काव्यकल्पलतावृत्तिः । श्रीअमरचन्द्रयतिनिमिता अरिसिंहकृतसूत्रसहिता । (अलङ्कारविभागे ४) रु० १—४

९१ वैयाकरणसिद्धान्तचन्द्रिका । श्रीरामाश्रमप्रणीता । श्रीसदानन्दकृत-सुबोधिन्या, श्रीलोकेशकरकृत-तत्त्वदीपिकया व्याख्यया च सहिता । पं० श्रीनवकिशोरशास्त्रिणानिर्मितया चक्रधराख्य टिप्पण्या च संवलिता उत्तरार्द्ध।(व्या० वि० ११) रु० २—८

९२ त्रिपुरारहस्यम् (महात्म्यखण्डम्) साङ्ख्ययोगशास्त्राचार्य श्रीमुकुन्दलाल शास्त्रिणा संशोधितम् । साहित्याचार्य खिस्ते-इत्युपाख्य पं० श्रीनारायणशास्त्रिणा निबद्धाभ्यां भूमिकाऽध्यायानुक्रमणिकाभ्यां च सहितम्।(पुराणेतिहास वि०१) रु० ५—०

९३ आपस्तम्बधर्मसूत्रम् । श्रीमद्धरदत्तमिश्र विरचितया उज्ज्वलाख्यया वृत्त्या संवलितम् । (कर्मकाण्डविभागे७) रु० ४—०

९४ अवच्छेदकत्वनिरुक्तिः । श्रीजगदीशतर्कालङ्कारकृताः । न्यायाचार्य श्रीशिवदत्तमिश्रविरचित गंगाख्यव्याख्या टिप्पणी सहितः । (न्याय वि० १३) रु० १—४

९५ संस्कारदीपकः । गणेशपूजादिग्रहयागान्त-पूर्वाङ्ग-निरूपणात्मकः प्रथमो भागः । म० म० पण्डित श्रीनित्यानन्दपन्त पर्वतीयविरचितः । (कर्मकाण्ड वि० ८) रु० २—०

९६ वर्षकृत्यदीपकः । कालनिर्णयव्रतोद्यापनसहितः । म० म० पं० नित्यानन्दपन्त पर्वतीय विरचितः । (कर्मकाण्ड वि० ९) रु० ३—

९७ श्रौतसूत्रम् । (सामवेदीयं) श्रीमन्महर्षि-लाट्यायनप्रणीत अग्निष्टोमान्तम् । सरलावृत्तिसहितम् । (कर्मकाण्ड वि० १०) रु० २—०

९८ नलचम्पूः अथवा दमयन्तीकथा । महाकविश्रीत्रिविक्रमभट्टविरचिता । विषमपदप्रकाशाख्यव्याख्यया सहिता । भावबोधिनी टिप्पणी सहिता । (का० वि०१६) रु० १-४

प्राप्तिस्थानम्—चौखम्बा संस्कृत पुस्तकालय, बनारस सिटी ।